3 1761 05498204 6

PK
5013
V24K75
1903
c.1
ROBA

Rs5/-

Sarasvativilasa Series No. 111.

THE

# KSHATTRACHUDAMANI

OF

# VADIBHASIMHA

WITH CRITICAL AND EXPLANATORY NOTES

BY

T. S. KUPPUSWAMI SASTRIYAR,
*Assistant, Government Upper Secondary Training School, Tanjore.*

TANJORE:
PRINTED AT THE SRI KRISHNA VILASA PRESS.

1903.

*All Rights Reserved.*] [*Copy right Registered.*

— esq.
, deri.

॥ श्रीः ॥

श्रीवादीभसिंहसूरिविरचितः

# क्षत्रचूडामणिः ।

## प्रथमो लम्बः ।

श्रीपतिर्भगवान्पुष्याद्भक्तानां वः समीहितम् ।
यद्भक्तिः शुल्कतामेति मुक्तिकन्याकरग्रहे ॥ १ ॥
संक्षेपेण प्रवक्ष्यामि चरितं **जीवकोद्भवम्** ।
पीयूषं न हि निःशेषं पिबन्नेव सुखायते ॥ २ ॥
**श्रेणिक**प्रश्नमुद्दिश्य **सुधर्मो** गणनायकः ।
यथोवाच मयाप्येतदुच्यते मोक्षलिप्सया ॥ ३ ॥

---

**श्लो. १.** अस्य समानाभिप्रायः श्लोकः —

'श्रियः पतिः पुष्यतु वः समीहितं त्रिलोकरक्षानिरतो जिनेश्वरः ।
यदीयपादाम्बुजभक्तिशीकरः सुरासुराधीशपदाय जायते ॥'

इति गद्यचिन्तामणौ १ ल. १ श्लो.

**श्लो. २.** जीवतादिति जीवकः । **जीवक** इति **जीवंधरस्यैव** नामान्तरम् । जातमात्रोऽयं शिशुर्**गन्धोत्कटेन** वैश्यवरेणादीयमानः क्षुतमकरोत् । तत्क्षणमन्तरिक्षे 'जीव' इत्यशरीरिणी वागश्रावि । अतस्तदेव नाम समकल्पयदस्य गन्धोत्कटश्रेष्ठी । इत्युत्तरत्र तन्नामकरणे हेतुमाह कविः ।

**श्लो. ३.** **श्रेणिको** नाम वर्धमानतीर्थंकरस्य ऋष्यार्यकश्रावकश्राविकाभेदेन चतुर्विधेषु साक्षात्समाराधकेषु श्रावककोटिप्रविष्टो मण्डलेश्वरो राजा । तत्र ऋषिकोटिप्रविष्टेष्वेकादशसु गणधरेषु सुधर्मस्तुरीयो गणधरः ।

इहास्ति भारते खण्डे जम्बूद्वीपस्य मण्डने ।
मण्डलं हेमकोशाभं **हेमाङ्गद**समाह्वयम् ॥ ४ ॥

तत्र **राजपुरी** नाम राजधानी विराजते ।
राजराजपुरीसृष्टौ स्रष्टुर्या मातृकायते ॥ ५ ॥

तस्यां **सत्यंधरो** नाम राजाभूत्सत्यवाङ्मयः ।
वृद्धसेवी विशेषज्ञो नित्योद्योगी निराग्रहः ॥ ६ ॥

महिता महिषी तस्य विश्रुता **विजया**ख्यया ।
विजयाद्विश्वनारीणां पातिव्रत्यादिभिर्गुणैः ॥ ७ ॥

सत्यप्यन्तःपुरस्त्रीणां समाजे राजवल्लभा ।
सैवासीन्नापरा काचित्सौभाग्यं हि सुदुर्लभम् ॥ ८ ॥

निष्कण्टकाधिराज्योऽयं राजा राज्ञीमनारतम् ।
रमयन्नान्यदज्ञासीत्प्राज्ञप्राग्रहरोऽपि सन् ॥ ९ ॥

विषयासक्तचित्तानां गुणः को वा न नश्यति ।
न वैदुष्यं न मानुष्यं नाभिजात्यं न सत्यवाक् ॥ १० ॥

पराराधनजाद्दैन्यात्पैशुन्यात्परिवादतः ।
पराभवात्किमन्येभ्यो न बिभेति हि कामुकः ॥ ११ ॥

पाकं त्यागं विवेकं च वैभवं मानितामपि ।
कामार्ताः खलु मुञ्चन्ति किमन्यैः स्वं च जीवितम् ॥ १२ ॥

पुनरैच्छदयं दातुं **काष्ठाङ्गाराय** काश्यपीम् ।
अविचारितरम्यं हि रागान्धानां विचेष्टितम् ॥ १३ ॥

---

**श्लो. ९.** प्राग्रहरः, श्रेष्ठः ।

**श्लो. १३.** काश्यपीं, भूमिम् । क्षत्रियान्तकरः **परशुरामः कार्तवीर्यार्जुनं** हत्वा सर्वां भूमिमात्मसात्कृत्य **कश्यपाय** ददाविति पौराणी कथा ।

तावता तं समभ्येत्य मन्त्रिमुख्या अबूबुधन् ।
देव देवैरपि ज्ञातं विज्ञाप्यं श्रूयतामिदम् ॥ १४ ॥

हृदयं च न विश्वास्यं राजभिः किं परो नरः ।
किंतु विश्वस्तवद्दृश्यौ नटायन्ते हि भूभुजः ॥ १५ ॥

परस्पराविरोधेन त्रिवर्गो यदि सेव्यते ।
अनर्गलमतः सौख्यमपवर्गोऽप्यनुक्रमात् ॥ १६ ॥

ततस्त्याज्यौ न धर्मार्थौ राजभिः सुखकाम्यया ।
अदः काम्यति देवश्चेदमूलस्य कुतः सुखम् ॥ १७ ॥

नाशिनं भाविनं प्राप्यं प्राप्ते च फलसंततिम् ।
विचार्यैव विधातव्यमनुतापोऽन्यथा भवेत् ॥ १८ ॥

इति प्रबोधितोऽप्येष धुरि राज्ञां न्यवेशयत् ।
**काष्ठाङ्गार**महो मोहाद्बुद्धिः कर्मानुसारिणी ॥ १९ ॥

विषयान्ध्यविचारेण विरक्तानां नृपस्य तु ।
प्रकृष्यमाणरागेण कालो विलयमीयिवान् ॥ २० ॥

सा तु निद्रावती स्वप्नमद्राक्षीत्क्षणदाक्षये ।
अस्वप्नपूर्वं जीवानां न हि जातु शुभाशुभम् ॥ २१ ॥

वैभातिकविधेरन्ते विभोरन्तिकमीयुषी ।
अर्धासननिविष्टेयमभाषिष्ट च भूभुजः ॥ २२ ॥

---

श्लो. १५. 'निजहृदयमपि सर्वथा न विश्वसनीयं, किमुत जनान्तरम् । किंतु सर्वेषामपि स्वीयत्वेन विश्वसनीयत्वेन च ज्ञातव्यो यथा चन्द्रसूर्यौ ।' इति जीवंधरचम्पुकाव्ये.

श्लो. १९. बुद्धिः कर्मानुसारिणी—'विधिविहितं बुद्धिरनुसरति' इति भावः ।

श्लो. २१. 'இல்லை, கனவுமூர்த்துரு தவினை.' பழமொழி.

श्रुत्वा स्वप्नत्रयं राजा ज्ञात्वा च फलमक्रमात् ।
प्रतिवक्तुमुपादत्त किंचिन्न्यञ्चन्मना भवन् ॥ २३ ॥

पुत्रमित्रकलत्रादौ सत्यामपि च संपदि ।
आत्मीयापायशङ्का हि शङ्कुः प्राणभृतां हृदि ॥ २४ ॥

देवि दृष्टस्त्वया स्वप्ने बालाशोकः समौलिकः ।
आचष्टे सोदयं सूनुमष्टमालास्तु तद्वधूः ॥ २५ ॥

आर्यपुत्र ततः पूर्वं दृष्टनष्टस्य किं फलम् ।
कङ्केलेरिति चेद्देवि कथयत्येष किंचन ॥ २६ ॥

इतीशवाक्यं शुश्रूषी महिषी भुवि पेतुषी ।
मूर्च्छिता तन्मुखग्लानिर्वक्त्रं वक्ति हि मानसम् ॥ २७ ॥

---

श्लो. २३. न्यञ्चन्मनाः, कुण्ठीभूतमानसः ।

श्लो. २४. शङ्कुः, कील इव मर्मभेदीत्यर्थः । 'आत्मापायशङ्काशङ्कुनिचितचेतनः' इति जी. च. का.

श्लो. २५.

'நன்முலை நின்மக னூறு மாலைக
ளன்னவ னுலம ரப்படுந் தேவியர்
நன்முடி நின்மக னுக்கம தாமெனப்
பின்னத னற்பயன் பேசலன் விட்டான்.'

ஜீவகசிந்தாமணி.

श्लो. २६. कङ्केलेः, अशोकवृक्षस्य ।

श्लो. २७. पेतुषी, पपात । 'क्वसुश्च' इति क्वसुप्रत्ययः । 'उगितश्च' इति ङीप् । 'संतानकमयी वृष्टिर्भवने चास्य पेतुषी' । इति रघुवंशे.१० स. ७७ श्लो.

वक्त्रं वक्ति हि मानसम्—

'அடுத்தது காட்டும் பளிங்குபோ னெஞ்சங்
கடுத்தது காட்டு முகம்.' திருக்குறள்.

तन्मोहान्मोहितो राजा तामेवायमबूबुधत् ।
सत्यामप्यभिषङ्गार्तौ जागर्त्येव हि पौरुषम् ॥ २८ ॥

स्वप्नदृष्टकृते सद्यो नष्टासुं किं तनोषि माम् ।
न हि रक्षितुमिच्छन्तो निर्दहन्ति फलद्रुमम् ॥ २९ ॥

विपदः परिहाराय शोकः किं कल्पते नृणाम् ।
पावके न हि पातः स्यादातपक्लेशशान्तये ॥ ३० ॥

ततो व्यापत्प्रतीकारं धर्ममेव विनिश्चिनु ।
प्रदीपैर्दीपिते देशे न ह्यस्ति तमसो गतिः ॥ ३१ ॥

इत्यादिस्वामिवाक्येन लब्धाश्वासा यथापुरम् ।
पत्या साकमसौ रेमे दुःखचिन्ता हि तत्क्षणे ॥ ३२ ॥

---

श्लो. २६–२७.
‘இற்றத ஞற்பய னென்னென வேந்திழை
யுற்றதின் னேயிடை யூறெனக் கென்றழு
மற்றுரை யாடல ளாய்மணி மாநிலத்
தற்றதோர் கோதையிற் பொற்றொடி சோர்ந்தாள்.’

ஜீவகசிந்தாமணி.

श्लो. २९. ‘स्वप्नेन दृष्टेन सरोजनेत्रे किं मां विनष्टासुमितस्तनोषि ।
संत्रातुकामाः किल साधुवृक्षं नराः कदाचिन्न हि निर्दहन्ति ॥’

इति जी. च. का.

श्लो. ३०. ‘किं कल्पते कुरङ्गाक्षि शोचनं दुःखशान्तये ।
आतपक्लेशनाशाय पावकस्य प्रवेशवत् ॥’

इति जी. च. का.

श्लो. ३२. ‘इत्यादिसान्त्ववचनैः कान्तां परिसान्त्वयंल्लब्धाश्वासया तया समं यथापुरं नरपतिर्विषयसुखपारवश्येन रममाणः कानिचिदहान्यतिवाहयाञ्चक्रे ।’

इति जी. च. का.

अथ प्रबोधितं स्वप्नादप्रबुद्धममुं पुनः ।
बोधयन्तीव पत्नीयमन्तर्वत्नीधुरां दधौ ॥ ३३ ॥
सदोहलामिमां वीक्ष्य दुःस्वप्नफलनिश्चयात् ।
अनुशेते स्म राजायमात्मरक्षापरायणः ॥ ३४ ॥
मन्त्रिणां लङ्घितं वाक्यमभाग्येन मया मुधा ।
विपाके हि सतां वाक्यं विश्वसन्त्यविवेकिनः ॥ ३५ ॥
न ह्यकालकृता वाञ्छा संपुष्णाति समीहितम् ।
किं पुष्पावचयः शक्यः फलकाले समागते ॥ ३६ ॥
इत्यार्तो वंशरक्षार्थं केकियन्त्रमचीकरत् ।
आस्था सतां यशःकाये न ह्यस्थायिशरीरके ॥ ३७ ॥
आक्रीडे दौहृदक्रीडामनुभोक्तुं विशांपतिः ।
व्यजीहरच्च यन्त्रस्थां पत्नीं वर्त्मनि वार्मुचाम् ॥ ३८ ॥
तावतैव कृतप्राख्यां राजवाख्यां च साधयन् ।
स्वविधेयां भुवं चेति **काष्ठाङ्गारो** व्यचीचरत् ॥ ३९ ॥

---

श्लो. ३३. अन्तर्वत्न्या धूः, अन्तर्वत्नीधुरा । तां अन्तर्वत्नीधुराम् । 'ऋक्पूरब्धूःपथामानक्षे' इत्यप्रत्ययः ।

श्लो. ३४. अनुशेते स्म, पश्चात्तापपराहतात्मा बभूव । 'तावत्सदोहलां महिलां दृष्ट्वा, स्मृत्वा च दुःस्वप्नफलं, पश्चात्तापपराहतस्वान्तो महीकान्तोऽयमात्मरक्षापरायणश्चिन्तामेवमकरोत् ।' इति जी. च. का.

श्लो. ३६. 'अथवा कृतमनयास्थानपतितया वाञ्छया । किंतु, फलकालिककलिकावचयवाञ्छेवोपहास्यतां प्राप्नोति ।' इति जी. च. का.

श्लो. ३७. 'एवं विचिन्त्य धरणीरमणस्तदानीं
वंशस्य रक्षणविधौ परिक्लृप्तचित्तः ।
आस्थां यशस्युपरतिं च शरीरवृत्तौ
कुर्वन्नचीकरदसाविह केकियन्त्रम् ॥' इति जी. च. का.

जीवितात्तु पराधीनाज्जीवानां मरणं वरम् ।
मृगेन्द्रस्य मृगेन्द्रत्वं वितीर्णं केन कानने ॥ ४० ॥

अचीकथच्च मत्रिभ्यो राजद्रोहो विधीयताम् ।
इति राजद्रुहा नित्यं दैवतेनाभिधीयते ॥ ४१ ॥

स्वन्तं किं नु दुरन्तं वा किमुदर्कं वितर्क्यताम् ।
अतर्कितमिदं वृत्तं तर्करूढं हि निश्चलम् ॥ ४२ ॥

जिह्रेमि वक्तुमप्येतदुक्तिर्दैवभयादिति ।
मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यद्धि पापिनाम् ॥ ४३ ॥

---

श्लो. ४०. 'लोके पराधीनं जीवितं विनिन्दितम् । निजबलविभवसमार्जितमृगेन्द्रपदसंभावितस्य मृगेन्द्रस्येव स्वतन्त्रजीवनमविनिन्दितमभिनान्दितमनवद्यमतिहृद्यमिति ।' इति जी. च. का.

श्लो. ४१. कथादेरदन्तत्वादचीकथदिति रूपं चिन्त्यम् ।

श्लो. ४१—४२.

'राजद्रोहसमुद्यतं प्रतिदिनं दैवं हि मां बाधते
द्रोहं राज्ञि समाचरेति तदिदं किं वा सुखान्तं भवेत् ।
यद्वा दुःखफलं ममेति हृदयं डोलायते मन्त्रिण-
स्तत्तर्कप्रतितर्कणैर्नियमितैर्निश्चेयमन्यादृशैः ॥' इति जी. च. का.

'மன்ன வன்பகை யாயதோர் மாதெய்வ
மென்னை வந்திடங் கொண்டஃதி ராப்பகற்
றன்னி னின்றுசெ குத்திடு நீயெனு
மென்னை யான்செய்வ கூறுமி னென்னவே.'

*ஜீவகசிந்தாமணி.*

श्लो. ४२. स्वन्तं, शुभोदर्कम् । दुरन्तं, अशुभोदर्कम् ।

'स्वन्तमित्यलघयत्स तद्वयथाम् ।' इति रघुवंशे ११ स. ६२ श्लो.

श्लो. ४३. दैवं, दैवतम् ।

'वक्तुं निवर्तमानापि ह्रियैतत्परिनिन्दितम् ।
दैवतस्य भयादेव प्रह्वा जिह्वा प्रवर्तते ॥' इति जी. च. का.

तद्वाक्याद्वाच्यतो वंश्या यमिनः प्राणिहिंसनात् ।
क्षुद्रा दुर्भिक्षतश्चैव सभ्याः सर्वे हि तत्रसुः ॥ ४४ ॥

आत्मद्रोहिणी धर्मदत्ताख्यः सचिवो वाचमूचिवान् ।
गाढा हि स्वामिभक्तिः स्यादात्मप्राणानपेक्षिणी ॥ ४५ ॥

राजानः प्राणिनां प्राणास्तेषु सत्स्वेव जीवनात् ।
तत्तत्र सदसत्कृत्यं लोक एव कृतं भवेत् ॥ ४६ ॥

एवं राजद्रुहां हन्त सर्वद्रोहित्वसंभवे ।
राजध्रुगेव किं न स्यात्पञ्चपातकभाजनम् ॥ ४७ ॥

---

'मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यद्दुरात्मनाम् ।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ॥' इति पञ्चतन्त्रे.

'மனம்வேறு சொல்வேறு மன்னு தொழில்வேறு
வினைவேறு பட்டவர்பால் மேவும்—மனமே
மனமொன்று சொல்லொன்று வான்பொருளு மொன்றே
கனமொன்று மேலவர்தங் கண்.' நீதிவெண்பா.

श्लो. ४४. 'इत्थं कृतावहित्थात्काष्ठाङ्गारवचनबन्धात्सत्कुलप्रसूता इव वचनीयात्, यमिजना इव प्राणिगणपरिपीडनात्, दरिद्रा इव दुर्भिक्षयोगात्, सभास्तारास्तत्र तत्रसुः' इति जी. च. का.

श्लो. ४६. 'प्राणा नृपालाः सकलप्रजानां यत्तेषु सत्स्वेव च जीवनानि ।
भूपेषु या द्रोहविधानचिन्ता सर्वप्रजास्वेव कृता भवित्री ॥ ९१ ॥'
इति जी. च. का.

श्लो. ४७. 'समस्तपातकानां हि सामानाधिकरण्यभूः ।
राजध्रुगेव भविता सर्वद्रोहित्वसंभवात् ॥ ९२ ॥'
इति जी. च. का.

पञ्च पातकानि, यथा— स्वर्णस्तेयसुरापानगुरुतल्पगमनब्रह्महत्याः, तत्पातकिनां समागमश्च.

रक्षन्त्येवात्र राजानो देवान्देहभृतोऽपि च ।
देवास्तु नात्मनोऽप्येवं राजा हि परदेवता ॥ ४८ ॥
किंचात्र दैवतं हन्ति दैवतद्रोहिणं जनम् ।
राजा राजद्रुहां वंशं वंश्यानन्यच्च तत्क्षणे ॥ ४९ ॥
अर्थिनां जीवनोपायमपायं चाभिभाविनाम् ।
कुर्वन्तः खलु राजानः सेव्या हव्यवहा यथा ॥ ५० ॥
इति धर्म्यवचोऽप्यासीन्मर्मभित्तीव्रकर्मणः ।
पित्तज्वरवतः क्षीरं तिक्तमेव हि भासते ॥ ५१ ॥
स कार्तघ्न्यादिदोषं च गुरुद्रोहं च किं परैः ।
परिवादं च नाद्राक्षीद्दोषं नार्थी हि पश्यति ॥ ५२ ॥
**मथनो** नाम तत्स्यालस्तद्वाचं बह्वमन्यत ।
तद्धि पाणौ कृतं दात्रं परिपन्थिविधायिनः ॥ ५३ ॥
प्राहैषीच्च बलं हन्तुं राजानं हन्त पापधीः ।
पयो ह्यास्यगतं शक्यं पाननिष्ठीवनद्वये ॥ ५४ ॥
दौवारिकमुखादेतदुपलभ्य रुषा नृपः ।
उदतिष्ठत संग्रामे न हि तिष्ठति राजसम् ॥ ५५ ॥

---

श्लो. ५१. 'इति नीतिविदां वरिष्ठस्य सचिवप्रेष्ठस्य वचनं पित्तोपहत इव मधुरतरक्षीरं राजद्रोहगुरुद्रोहादिषु बद्धान्तरङ्गः काष्ठाङ्गारः स्वहितं मनसि न चकार, चकार च विकारजनिताविद्वेषम् ॥ ९५ ॥' इति जी. च. का.

श्लो. ५२. 'दोषं नार्थी हि पश्यति' इति हेतुः । अर्थी, कार्यार्थी ।
'न पश्यति मदान्धोऽपि कामान्धोऽपि न पश्यति ।
चक्षुर्हीना न पश्यन्ति चार्थी दोषं न पश्यति ॥' इत्यन्यत्रापि ।

श्लो. ५५. उदतिष्ठत, ववृधे; 'उदोऽनूर्ध्वकर्मणि' इत्यात्मनेपदम् ।

तावताधासनाक्रष्टां नष्टासुं गर्भिणीं प्रियाम् ।
दृष्ट्वा पुनर्न्यवर्तिष्ट स्त्रीष्ववज्ञा हि दुःसहा ॥ ५६ ॥
अबोधयच्च तां पत्नीं लब्धबोधो महीपतिः ।
तत्त्वज्ञानं हि जागर्ति विदुषामार्तिसंभवे ॥ ५७ ॥
शोकेनालमपुण्यानां पापं किं न फलप्रदम् ।
दीपनाशे तमोराशिः किमाह्वानमपेक्षते ॥ ५८ ॥
यौवनं च शरीरं च संपच्च व्येति नाद्भुतम् ।
जलबुद्बुदनित्यत्वे चिन्त्रीया न हि तत्क्षये ॥ ५९ ॥
संयुक्तानां वियोगश्च भविता हि नियोगतः ।
किमन्यैरङ्गतोऽप्यङ्गी निःसङ्गो हि निवर्तते ॥ ६० ॥
अनादौ सति संसारे केन कस्य न बन्धुता ।

---

श्लो. ५८. 'मायाकार्यं जगदपि तथा तत्त्वदृष्ट्या विलोक्य
प्राज्ञः कुर्वन्परपुरुषयोरैकतां वेदवाक्यैः ।
आसीतैकोऽन्वहमिति न चेन्मायया मोहितः स्या-
दाह्वातव्यस्तिमिरनिकरः किं प्रदीपे प्रशान्ते ॥

इति लोकोक्तिमुक्तावल्याम्.

श्लो. ५९. 'शम्पानिभा संपदिदं शरीरं चलं प्रभुत्वं जलबुद्बुदाभम् ।
तारुण्यमारण्यसरित्सकाशं क्षयिष्णुनाशो हि न शोचनीयः ॥'

इति जी. च. का.

श्लो. ६०. 'संयुक्तयोर्वियोगो हि संध्याचन्द्रमसोरिव ।
रक्तयोरपि दम्पत्योर्भविता नियतेर्वशात् ॥ १०४ ॥'

इति जी. च. का.

'स्वशरीरशरीरिणावपि श्रुतसंयोगविपर्ययौ यदा ।
विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम् ॥'

इति रघुवंशे. ८ स. ८१ श्लो.

श्लो. ६१. 'बन्धुत्वं शत्रुभूयं च कल्पनाशिल्पिनिर्मितम् ।

सर्वथा शत्रुभावश्च सर्वमेतद्धि कल्पना ॥ ६१ ॥
इति धर्म्यं वचस्तस्या लेभे नैव पदं हृदि ।
दग्धभूम्युप्तबीजस्य न ह्यङ्कुरसमर्थता ॥ ६२ ॥
अयं त्वापन्नसत्त्वां तामारोप्य शिखियन्त्रकम् ।
स्वयं तद्भ्रामयामास हन्त क्रूरतमो विधिः ॥ ६३ ॥
वियतास्मिन्गते योद्धुं स मोहादुपचक्रमे ।
न ह्यङ्गुलिरसाहाय्या स्वयं शब्दायतेतराम् ॥ ६४ ॥
अथ युद्ध्वा चिरं योद्धा मुधा प्राणिवधेन किम् ।
इत्यूहेन विरक्तोऽभूद्भत्यधीनं हि मानसम् ॥ ६५ ॥
विषयासङ्गदोषोऽयं त्वयैव विषयीकृतः ।
सांप्रतं वा विषप्रख्ये मुञ्चात्मन्विषये स्पृहाम् ॥ ६६ ॥
भुक्तपूर्वमिदं सर्वं त्वयात्मन्भुज्यते ततः ।

---

अनादौ सति संसारे तद्द्वयं कस्य केन न ॥ १०५ ॥'
इति जी. च. का.

श्लो. ६२. 'इति नरनाथवचनपरिपाटी निष्टप्तलोहपतितवारिधारेव शोकानलज्वालालीढे देव्या मनसि किंचिदप्यार्द्रतामनापादयन्ती निर्दग्धभूम्युप्तबीजराजिरिव विफला बभूव ॥ १०६ ॥' इति जी. च. का.

श्लो. ६३. 'राजा समारोप्य शिखण्डियन्त्रमापन्नसत्वां सरसीरुहाक्षीम् ।
संभ्रामयामास च मेघमार्गे हाहा बत क्रूरविधेर्विपाकः ॥१०७'
इति जी. च. का.

श्लो. ६५. 'किमनेन कृपाविकलजनसमुचितेन सकलप्राणिमारणविहरणरसेनेति जनितवैराग्यः ।' इति ग. चि. म.

'अथ **काष्ठाङ्गारोऽपि** * * बहुधा युद्ध्वा वैराग्यायत्तचित्ततया प्राणिगणवधविरतं तं वयस्य इव स्वस्थतां निनाय ।' इति जी. च. का.

श्लो. ६७. 'भुक्तोज्झितं तदुच्छिष्टं भोक्तुमेवोत्सुकायसे ।

उच्छिष्टं त्यज्यतां राज्यमनन्ता ह्यसुभृद्भवाः ॥ ६७ ॥
अवश्यं यदि नश्यन्ति स्थित्वापि विषयाश्चिरम् ।
स्वयं त्याज्यास्तथा हि स्यान्मुक्तिः संसृतिरन्यथा ॥ ६८ ॥
त्यज्यते रज्यमानेन राज्येनान्येन वा जनः ।
भज्यते त्यज्यमानेन तत्त्यागोऽस्तु विवेकिनाम् ॥ ६९ ॥
इति भावनया राजा वैराग्यं परमीयिवान् ।
त्यक्त्वा सङ्गं निजाङ्गं च दिव्यां संपदमासदत् ॥ ७० ॥
पौरा जानपदाः सर्वे निर्वेदं प्रतिपेदिरे ।
पीडा ह्यभिनवा नृणां प्रायो वैराग्यकारणम् ॥ ७१ ॥
अधिस्त्रि रागः क्रूरोऽयं राज्यं प्राज्यमसून्नपि । good
तद्वञ्चिता हि मुञ्चन्ति किं न मुञ्चन्ति रागिणः ॥ ७२ ॥
नारीजघनरन्ध्रस्थविण्मूत्रमयचर्मणा ।
वराह इव विड्भक्षी हन्त मूढः सुखायते ॥ ७३ ॥
किं कीदृशं कियत्केति विचारे सति दुःसहम् ।
अविचारितरम्यं हि रामासंपर्कजं सुखम् ॥ ७४ ॥

---

अभुक्तं मुक्तिसौख्यं त्वमतुच्छं हन्त नेच्छसि ॥ ३९ ॥'
इति ११. लम्बके.

श्लो. ६८. 'नियोगतश्चेद्भोगानां वियोगः स्वयं त्यागात्किमिति लोकोऽयं बिभेति । ते भजन्तमात्मानं त्यजन्तः स्वातन्त्र्यात्स्वान्तमस्य सुतरां तुदन्ति । स्वयं त्यक्तास्तु तदानीं मनःप्रसत्तये पुनर्मुक्तये च भोगा भवेयुरिति भूयो व्यरज्यत ।' इति ग. चि. म.

श्लो. ६९. 'भोगेन हि भुज्यमानेन रज्यमानेनापि त्यज्यते जनः । तस्मादहमेव तावदैहिकभोगेषु मुह्यन्मनो जह्याम् ।' इति ग. चि. म.

निवारिताप्यकृत्ये स्यान्निष्फला दुष्फला च धीः ।
कृत्ये तु नापि यत्नेन कोऽत्र हेतुर्निरूप्यताम् ॥ ७५ ॥

निश्चित्याप्यघहेतुत्वं दुश्चित्तानां निवारणे ।
येनात्मन्निपुणो नासि तद्धि दुष्कर्मवैभवम् ॥ ७६ ॥

हेये स्वयं सती बुद्धिर्यत्नेनाप्यसती शुभे ।
तद्धेतुकर्म तद्वन्तमात्मानमपि साधयेत् ॥ ७७ ॥

कोऽहं कीदृग्गुणः क्त्यः किंप्राप्यः किंनिमित्तकः ।
इत्यूहः प्रत्यहं नो चेदस्थाने हि मतिर्भवेत् ॥ ७८ ॥

मुह्यन्ति देहिनो मोहान्मोहनीयेन कर्मणा ।
निर्मितान्निर्मिताशेषकर्मणा धर्मवैरिणा ॥ ७९ ॥

किं नु कर्तुं त्वयारब्धं किं नु वा क्रियतेऽधुना ।
आत्मन्नारब्धमुत्सृज्य हन्त बाह्येन मुह्यसि ॥ ८० ॥

इदमिष्टमनिष्टं वेत्यात्मन्संकल्पयन्मुधा ।
किं नु मोमुह्यसे बाह्ये स्वस्वान्तं स्ववशीकुरु ॥ ८१ ॥

लोकद्वयाहितोत्पादि हन्त स्वान्तमशान्तिमत् ।
न द्वेक्षि द्वेक्षि ते मौढ्यादन्यं संकल्प्य विद्विषम् ॥ ८२ ॥

अन्यदीयमिवात्मीयमपि दोषं प्रपश्यता ।
कः समः खलु मुक्तोऽयं युक्तः कायेन चेदपि ॥ ८३ ॥

इत्याद्यूहपरे लोके केकी तु वियता गतः ।
पातयमास राज्ञीं तां तत्पुरप्रेतवेश्मनि ॥ ८४ ॥

---

श्लो. ७७. सती, अभिमुखी; असती, विमुखी; बुद्धिः कर्त्री; तद्धेतुकर्म, आभिमुख्यवैमुख्ययोर्हेतुभूतं कर्म; तद्वन्तं, तादृशकर्मविशिष्टम् ।

जीवानां पापवैचित्रीं श्रुतवन्तः श्रुतौ पुरा ।
पश्येयुरधुनेतीव श्रीकल्पाभूदकिंचना ॥ ८५ ॥
क्षणनश्वरमैश्वर्यमित्यर्थं सर्वथा जनः ।
निरणैषीदिमां दृष्ट्वा दृष्टान्ते हि स्फुटा मतिः ॥ ८६ ॥
पूर्वाह्णे पूजिता राज्ञी राज्ञा सैवापराह्णके ।
परेतभूशरण्याभूत्पापाद्बिभ्यतु पण्डिताः ॥ ८७ ॥
सा तु मूर्च्छापराधीना सूतिपीडामजानती ।
मासि वैजनने सूनुं सुषुवे हन्त तद्दिने ॥ ८८ ॥
तावता देवता काचिद्धात्रीवेषेण संन्यधात् ।
तत्रैव पुत्रपुण्येन पुण्ये किं वा दुरासदम् ॥ ८९ ॥
तां पश्यन्त्या अभूत्तस्या उद्वेलः शोकसागरः ।
संनिधौ हि स्वबन्धूनां दुःखमुन्मस्तकं भवेत् ॥ ९० ॥

---

श्लो. ८५.

'உண்டெனவுரையிற்கேட்பா ருயிருறுபாவமெல்லாங்
கண்டினித்தெளிகவென்று காட்டுவாள்போலவாகி
விண்டொடநிவந்தகோயில் விண்ணவர்மகளிற்சென்றாள்
வெண்டலைபயின்றகாட்டுள் விளங்கிழைதமியளானாள்'

ஜீவகசிந்தாமணி.

श्लो. ८६. इत्यर्थम्, एवंरूपं विषयम् ।

श्लो. ८८. वैजनने मासि, सूतिमासे ।

'अजानती कश्मलपारवश्यात्प्रसूतिपीडां नरपालजाया ।
मासे तदा वैजनने दिनेऽस्मिन्प्रासूत सूनुं तपनं यथा द्यौः ॥'

इति जी. च. का.

श्लो. ९०. 'तस्या सुखेन्दोरवलोकनेन शोकाम्बुधिर्वृद्धिमवाप देव्याः ।

देवता तु समाश्वास्य जातमाहात्म्यवर्णनैः ।
ऊर्णादिदर्शनोद्भूतैर्देवीं तामित्यवोचत ॥ ९१ ॥

पुत्राभिवर्धनोपाये देवि चिन्ता निवर्त्यताम् ।
क्षत्रपुत्रोचितं कश्चिदेनं संवर्धयिष्यति ॥ ९२ ॥

इत्युक्ते कोऽपि दृष्टोऽभूद्विसृष्टप्रेतसूनुकः ।
सूनुं सूनृतयोगीन्द्रवाक्यात्तत्र गवेषयन् ॥ ९३ ॥

true sincere गवेषयन् to search

---

अभ्यग्रभावः खलु बान्धवानां सुखस्य दुःखस्य च वृद्धिहेतुः ॥'
इति जी. च. का.

'तमवेक्ष्य रुरोद सा भृशं स्तनसंबाधमुरो जघान च ।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ॥'
इति कुमारसंभवे. ४ स. २६ श्लो.

श्लो. ९१. ऊर्णा, भ्रूमध्यगावर्तविशेषः । जातस्य, तनयस्य ।

'इयं च बिभ्रती स्पष्टतरतामष्टमीचन्द्रसौन्दर्यहासिनि ललाटपट्टे मुक्तकण्ठमूर्णा वर्णयत्यर्णवाम्बराधिपत्यम् ।' इति ग. चि. म.

'अस्य संध्यांशुरक्तबालशशिकलाकारे ललाटपट्टे नलिननालभङ्गतन्वीयमूर्णा परिस्फुरति ।' इति कादम्बर्याम् ।

श्लो. ९२. क्षत्रपुत्रोचितम्, क्षत्रपुत्रस्य यथा योग्यं स्यात्तथा ।

'परित्यज्यतां च परित्राणचिन्ता । चिन्तामणिकल्पः कोऽपि वणिजामधिपतिग्धुनैवागत्य तव तनयं ग्रहीष्यति, वर्धयिष्यति च महाराजसुतोऽयमिति ।' इति ग. चि. म.

'पुत्रस्य वर्धनविधौ विजहाहि चिन्तां
संवर्धयिष्यति सुतं तव कश्चिदेनम् ।
चन्द्रश्चकोरमिव चूततरुर्यथा वा
बालं पिकं कमलिनीविसरो मरालम् ॥ १२० ॥'
इति जी. च. का.

श्लो. ९३. सूनृतम्, सत्यं प्रियं च ।

'तदात्व एवात्र मृतं तनूजं विसृज्य गन्धोत्कटवैश्यनाथः ।

तद्दर्शनेन तद्वाक्यं प्रमाणं निर्णिनाय सा ।
निश्चलादविसंवादाद्वस्तुनो हि विनिश्चयः ॥ ९४ ॥

ततो गत्यन्तराभावाद्देवताप्रेरणाच्च सा ।
पित्रीयमुद्रयोपेतमाशास्यान्तरधात्सुतम् ॥ ९५ ॥

गन्धोत्कटोऽपि तं पश्यन्नातृपद्वैश्यनायकः ।
एधोन्वेषिजनैर्दृष्टः किं वा न प्रीतये मणिः ॥ ९६ ॥

हर्षकण्टकिताङ्गोऽयमादधानस्तमङ्गजम् ।
जीवेत्याशिषमाकर्ण्य तन्नाम समकल्पयत् ॥ ९७ ॥

अमृतं सूनुमज्ञानात्संस्थितं कथमभ्यधाः ।
इति क्रुध्यन्स्वभार्यायै सानन्दोऽयमदात्सुतम् ॥ ९८ ॥

---

योगीन्द्रवाक्यस्मरणेन सूनुं गवेषयंल्लोचनगोचरोऽभूत् ॥१२१॥'
इति जी. च. का.

श्लो. ९४. 'तं दृष्ट्वा देवतावाक्यं प्रमाणं निश्चिकाय सा ।
संवादेन हि सर्वेषां प्रामाण्यमवगम्यते ॥ १२२ ॥'
इति जी. च. का.

श्लो. ९६. 'महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।'
इति कुमारसंभवे ।

श्लो. ९६-९७. 'पितृवनवनमध्ये बालसूर्यप्रकाशं
सुतमतिविततताभ्यां लोचनाभ्यां पिबन्सः ।
तृषित इव सरोन्तश्चातको यद्वदभ्र-
प्रसृतजलकणालिं नातृपद्वैश्यनाथः ॥ १२४ ॥'
इति जी. च. का.

श्लो. ९७-९८. संस्थितम्, मृतम् ।

'अयं च, एधोन्वेषिजन इव महानिधिं महीशसुतमासाद्य, सद्य एवाङ्कुरितपुलकापदेशेन हृदयालवालसंजातमञ्जुलमोदलताकोरकानिव बिभ्राणः, प्रीतेः परां कोटिमात्मजं चादधानः, * * * * * * जीवेत्याशीर्वचनमाकर्ण्य तमनङ्गरूपधेयं महाभागधेयमङ्गजं तन्नामधेयेनालंचकार ।' इति जी. च. का.

अभ्यनन्दीत्सुनन्दापि नन्दनस्यावलोकनात् ।
प्रागवत्प्रीतये पुत्रा मृतोत्पन्नास्तु किं पुनः ॥ ९९ ॥
देवता जननीमस्य बन्धुवेश्मपराङ्मुखीम् ।
**दण्डकारण्य**मध्यस्थमनैषीत्तापसाश्रमम् ॥ १०० ॥
कृत्वा च तां तपस्यन्तीं सतोषा सा मिषादगात् ।
समीहितार्थसंसिद्धौ मनः कस्य न तुष्यति ॥ १०१ ॥
अवात्सीद्राजपत्नी च वत्सं निजमनोगृहे ।
जिनपादाम्बुजं चैव ध्यायन्ती हन्त तापसी ॥ १०२ ॥
अनल्पतूलतल्पस्थसवृन्तप्रसवादपि ।
निर्भरं हन्त सीदन्त्यै दर्भशय्याप्यरोचत ॥ १०३ ॥
स्वहस्तलूननीवारोऽप्याहारोऽस्याः परेण किम् ।
अवश्यं ह्यनुभोक्तव्यं कृतं कर्म शुभाशुभम् ॥ १०४ ॥
अथ **गन्धोत्कटा**यार्थमर्भकार्थं महोत्सवम् ।
आत्मार्थं गणयन्मूढः **काष्ठाङ्गारो**ऽप्यदान्मुदा ॥ १०५ ॥

---

श्लो. १००. 'बान्धवालयपराङ्मुखीमिमां दण्डकावननिवासमनैषीत् ।'
इति जी. च. का.

श्लो. १०३. 'या हंसतूलशयनस्थलतान्तवृन्त-
क्लेशासहा पुरि पुराजनि काननान्ते ।
दर्भेषु हन्त शयनं बहुमन्यते स्म
सा मालतीकुसुमकोमलगात्रवल्ली ॥१३२॥' जी. च. का.

श्लो. १०४. 'अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥' प्राचीनः श्लोकः ।

श्लो. १०५.
அழுகுரன் மயங்கிய வல்ல லாவணத்
தெழுகிளை மகிழ்ந்தெம தரசு வேண்டினேன்

तत्क्षणे तत्पुरे जाताञ्जातानपि तदाज्ञया ।
लब्ध्वा वैश्यपतिः पुत्रं मित्रैः सार्धमवर्धयत् ॥ १०६ ॥
अथ जातः **सुनन्दाया नन्दाख्यो** नाम नन्दनः ।
तेन **जीवंधरो** रेजे सौभ्रात्रं हि दुरासदम् ॥ १०७ ॥
एवं सद्बन्धुमित्रोऽयमेधमानो दिनेदिने ।
अतिशेते स्म शीतांशुमकलङ्काङ्कभावतः ॥ १०८ ॥
ततः शैशवसंभूष्णुसर्वव्यसनदूरगः ।
पञ्चमं च वयो भेजे भाग्ये जाग्रति का व्यथा ॥ १०९ ॥
अथानर्थकमव्यक्तमतिहृद्यं च वाङ्मयम् ।
मुक्त्वातिव्यक्तगीरासीत्स्वयं वृण्वन्ति हि स्त्रियः ॥ ११० ॥
आचार्यकवपुः कश्चि**दार्यनन्दी**ति कीर्तितः ।
आसीदस्य गुरुः पुण्याद्गुरुरेव हि देवता ॥ १११ ॥

---

கழிபெருங் காதலான் கந்து நாமனேன்
றழிதரு பெருநிதி யுவப்ப நல்கினன்.'
சீவகசிந்தாமணி.

श्लो. १०७. सुनन्दा, गन्धोत्कटस्य भार्या ।

श्लो. १०५–१०. 'तावन्नन्दनसमागमसंजातमोदबन्धोत्कटेन **गन्धोत्कटेन** तन्तन्यमानं महोत्सवसार्थमात्मार्थं गणयता सकलसद्धर्मपरमकाष्ठाङ्गारेण **काष्ठाङ्गा-रेण** दापितमर्थजातं तत्क्षणजातैस्तदाज्ञासमानीतैरितरैरपत्यैः सह लब्ध्वायमूरुजप-तिरितरात्मजैः समं निजात्मजमविशेषेण वर्धयामास ।' इति जी. च. का.

श्लो. ११०. अतिव्यक्तगीः ; अत्र 'समुदञ्चितव्यक्तवचनप्रपञ्चः'। जी. च. का.

श्लो. १११. आचार्यकम्, आचार्यत्वम् ; तदेव वपुर्यस्य, आचार्यकवपुः ।

निष्प्रत्यूहेष्टसिद्ध्यर्थं सिद्धपूजादिपूर्वकम् ।
सिद्धमातृकया सिद्धामथ लेभे सरस्वतीम् ॥ ११२ ॥

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्रचूडामणौ सरस्वतीलम्भो नाम प्रथमो लम्बः ।

---

## द्वितीयो लम्बः ।

अथ विद्यागृहं किंचिदासाद्य सखिमण्डितः ।
पण्डिताद्विश्वविद्यायामध्यगीष्टातिपण्डितः ॥ १ ॥

तस्य प्रश्रयशुश्रूषाचातुर्याद्गुरुगोचरात् ।
स्मृता इवाभवन्विद्या गुरुस्नेहो हि कामसूः ॥ २ ॥

अनु **जीवक**मेवात्र जीवलोके विपश्चितः ।
इति निश्चयतः सूरिः सुतरां प्रीतिमव्रजत् ॥ ३ ॥

आत्मकृत्यमकृत्यं च सफलं प्रीतये नृणाम् ।
किं पुनः श्लाघ्यभूतं तत्किं विद्यास्थापनात्परम् ॥ ४ ॥

अथ प्रसन्नधीः सूरिरन्तेवासिनमेकदा ।
एकान्ते हि निजप्रान्तमावसन्तमचीकथत् ॥ ५ ॥

---

**श्लो. ११२.** 'प्रत्यूहव्यूहपरिहाराय परिकलितसिद्धनमस्यः सिद्धमातृकया प्रसिद्धां सरस्वतीं परिशीलयामास ।' इति जी. च. का.

'सिद्धं नम इति पूर्वपदप्रशस्तां सिद्धमातृकारूपिणीं वाणीं जीवंधरः सप्रणामं प्रत्यग्रहीत् ।' इति ग. चि. म.

**श्लो. ५.** 'प्रसन्नचित्तवृत्तिरयं सूरिरेकदा विजने निजप्रान्तमावसन्तमन्तेवासिनमेनमित्थमचीकथत् ।' इति जी. च. का.

श्रुतशालिन्महाभाग श्रूयतामिह कस्यचित् ।
चरितं चरितार्थेन यदत्यर्थं दयावहम् ॥ ६ ॥

विद्याधरास्पदे लोके **लोकपाला**ह्वयान्वितः ।
लोकं वै पालयन्भूपः कोऽपि कालमजीगमत् ॥ ७ ॥

क्षणक्षीणत्वमैश्वर्ये क्षीबाणामिव बोधयत् ।
क्षेपीयः पश्यतां नश्यदभ्रमैक्षिष्ट सोऽधिराट् ॥ ८ ॥

तद्वीक्षणेन वैराग्यं विजजृम्भे महीभुजः ।
पम्फुलीति हि निर्वेगो भव्यानां कालपाकतः ॥ ९ ॥

ततोऽयं पुत्रनिक्षिप्तराज्यभारः क्षितीश्वरः ।
जैनीं दीक्षामुपादत्त यस्यां कायेऽपि हेयता ॥ १० ॥

तपांसि तप्यमानस्य तस्य चासीदहो पुनः ।

---

**श्लो. ६.** 'श्रुताम्बुधेः पारगतः शृणु त्वं प्रवीण कस्यापि चरित्रभावम् ।
अवाप्य यः श्रोत्रपथेन चित्तं दयानटीनर्तनसूत्रधारः ॥'

**श्लो. ७.** 'विद्याधराणां विनिवासलोके कालं नृपः कश्चिदजीगमद्यः ।
कृत्येन नाम्नापि च लोकपालो विद्याधरोऽभूद्विबुधेश्वरोऽपि ॥'
इति जी. च. का.

**श्लो. ८.** क्षेपीयः, अतित्वरितम् ।

**श्लो. ९.** पम्फुलीति, भृशं फलति; निर्वेगः, वैराग्यम्; भव्यानाम्, मोक्षेच्छूनां जीवानाम् ।

**श्लो. ८–१०.** 'एकदा महीपतिरयं कंचन जलधरं क्षीबाणां क्षितिपानामैश्वर्यं क्षणक्षीणमिति बोधयन्तमिव तत्क्षणमन्तर्हितमवलोक्य निजनन्दननिक्षिप्तराज्यभारो, विजृम्भितवैराग्यसाम्राज्यप्रतिष्ठामधितिष्ठन्, सकलसांसारिकदुःखशमनदक्षां जैनीं दीक्षामाससाद।' इति जी. च. का.

**श्लो. ११–१५.** नाफलः, व्याधः । विष्किरान्, पक्षिणः ।
'तपांसि भूपः स हि तप्यमानस्तपस्यया प्रापितरुग्विलासः ।

भस्मकाख्यो महारोगो भुक्तं यो भस्मयेत्क्षणात् ॥ ११ ॥
न हि वारयितुं शक्यं दुष्कर्माल्पतपस्यया ।
विस्फुलिङ्गेन किं शक्यं दग्धुमार्द्रमपीन्धनम् ॥ १२ ॥
अशक्त्यैव तपः सोऽयं राजा राज्यमिवात्यजत् ।
श्रेयांसि बहुविघ्नानीत्येतन्नह्यधुनाभवत् ॥ १३ ॥
तपसाच्छादितस्तिष्ठन्स्वैराचारी हि पातकी ।
गुल्मेनान्तर्हितो गृह्णन्विष्किरानिव नाफलः ॥ १४ ॥
अवर्तिष्ट यथेष्टं स पाषण्डितपसा पुनः ।
चित्रं जैनी तपस्या हि स्वैराचारविरोधिनी ॥ १५ ॥
अथ भिक्षुर्बुभुक्षुः सन् **गन्धोत्कटगृहं** गतः ।
उपतापरुजोऽप्येष धार्मिकाणां भिषक्तमः ॥ १६ ॥
धार्मिकाणां शरण्यं हि धार्मिका एव नापरे ।
अहेर्नकुलवत्तेषां प्रकृत्यान्ये हि विद्विषः ॥ १७ ॥
तत्र मध्येगृहं भिक्षुरद्राक्षीत्पुत्रपुंगवम् ।

---

तदनु दिनेदिने वर्द्धमानं भस्मकरोगमल्पेन तपसा विस्फुलिङ्गेनेवार्द्रेन्धनं, खद्योतेनेव संतमसं नखरञ्जकयेव महारण्यं शमयितुमशक्नुवानः, पूर्वं राज्यमिव तपःसाम्राज्यमपि परित्यजन्, पाषण्डितपसा समाच्छादितः, स्वैराहारान्नाफल इव गुल्मान्तर्हितो विष्किरान्समाददानो यथेष्टमवर्तिष्ट ।' इति जी. च. का.

श्लो. १३. 'श्रेयांसि बहुविघ्नानि' इति वचो नाधुनिकम्, किंतु सर्वानुभवसिद्धं लोकप्रसिद्धं पुरातनं वचनमित्यर्थः ।

'श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।
अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः ॥' प्रा. श्लो.

श्लो. १७. 'सन्त एव सतां नित्यमापदुद्धरणक्षमाः ।
गजानां पङ्कलग्नानां गजा एव धुरंधराः ॥' इति पञ्चतन्त्रे.

अङ्ग त्वां त्वं च तं वीक्ष्य तद्बुभुक्षामलक्षयः ॥ १८ ॥
भोक्तुमारभमाणस्त्वं पौरोगवमचीकथः ।
भोज्यतामयमित्येष पुनरेनमबूभुजत् ॥ १९ ॥
अन्नैस्तद्गृहसंपन्नैर्नाभूत्तत्कुक्षिपूरणम् ।
अहो पापस्य घोरत्वमाशाब्धिः केन पूर्यते । २० ।
अभुञ्जानस्त्वमाश्चर्यादासीनोऽस्मै वितीर्णवान् ।
कारुण्यादस्य पुण्याद्वा करस्थं कबलं मुदा ॥ २१ ॥
वर्णिनो जठरं पूर्णं तदास्वादनतः क्षणात् ।
आशाब्धिरिव नैराश्यादहो पुण्यस्य वैभवम् ॥ २२ ॥
परिव्राडपि संप्राप्य सौहित्यं तत्क्षणे चिरात् ।
महोपकारिणोऽस्याहं किं करोमीत्यचिन्तयत् ॥ २३ ॥
अपश्चिमफलां विद्यां निश्चित्यात्र प्रतिक्रियाम् ।
आयुष्मन्तमसौ पश्चाद्विपश्चितमकल्पयत् ॥ २४ ॥
विद्या हि विद्यमानेयं वितीर्णापि प्रकृष्यते ।
नाकृष्यते च चोराद्यैः पुष्यत्येव मनीषितम् ॥ २५ ॥
वैदुष्येण हि वंश्यत्वं वैभवं सदुपास्यता ।
सदस्यतालमुक्तेन विद्वान्सर्वत्र पूज्यते ॥ २६ ॥

---

श्लो. १९. 'एनं कुहनातापसं भवान्भवनमानीय तदीयभोजनकृते पौरोगवमादिदेश ।' इति जी. च. का.

श्लो. २४. 'परमोत्कृष्टफलां कलां तुभ्यं प्रतिपादयामास' इति जी. च. का

श्लो. २५. 'न चोरहार्यं नृपतेर्न हार्यं न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ॥' प्रा. श्लो.

श्लो. २६. 'विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन ।

वैपश्चित्यं हि जीवानामाजीवितमनिन्दितम् ।
अपवर्गेऽपि मार्गोऽयमदः क्षीरमिवौषधम् ॥ २७ ॥

इत्युदन्तं गुरोः श्रुत्वा शिष्यो नोत्तरमूचिवान् ।
स्ववाचा किंतु वक्रेण शैष्योपाध्यायिका हि सा ॥ २८ ॥

विज्ञातगुरुशुद्धिः स विशेषात्पिप्रियेतराम् ।
माणिक्यस्य हि लब्धस्य शुद्धेर्मोदो विशेषतः । २९ ॥

रत्नत्रयविशुद्धः सन्पात्रस्नेही परार्थकृत् ।
परिपालितधर्मो हि भवाब्धेस्तारको गुरुः ॥ ३० ॥

गुरुभक्तो भवाद्भीतो विनीतो धार्मिकः सुधीः ।
शान्तस्वान्तो ह्यतन्द्रालुः शिष्टः शिष्योऽयमिष्यते ॥ ३१ ॥

गुरुभक्तिः सती मुक्त्यै क्षुद्रं किं वा न साधयेत् ।

---

स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते ॥' प्राचीनः श्लोकः.

**श्लो. २८–२९.** 'इति गुरोरुदन्तमाकर्ण्य कर्णरसायनं, मौनमेवोत्तरमादधानो, वदनवनजे मानससरसि च प्रश्रयमृणालीमधिमुखमादधतीं शैष्योपाध्यायिकामरालीं खेलयन्, गुरुशुद्धिविज्ञानेन लब्धमणिपरिशुद्धिज्ञानेनेव मोदजलधेः परं पारं गतोऽपि, गुरूपदिष्टे सागारधर्मसागरे ममज्ज सज्जनहृदयचन्दनो नन्दनः ।' जी. च. का. शैष्योपाध्यायिका, तयोर्भावः कर्म वा; 'द्वन्द्वमनोज्ञादिभ्यश्च' इति वुञ् ।

**श्लो. ३०.** रत्नत्रयविशुद्धः, रत्नत्रयसंपन्नः ॥ सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥ येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेणार्हता प्रतिपादितेऽर्थे विपरीताभिनिवेशराहित्यरूपं श्रद्धानं सम्यग्दर्शनम् ॥ येन स्वभावेन जीवादयो व्यवस्थितास्तेनैव स्वभावेन संशयसंमोहरहितोऽवबोधः सम्यग्ज्ञानम् । तद्धि श्रद्धावतो जीवस्य गुरूपदिष्टश्रवणमननाद्यभ्यासपाटवेन ज्ञानावरकाणां मिथ्यादर्शनाविरतिप्रमादादीनामुपशमे सति स्वयमेव समुदेति ॥ संसरणकर्मोच्छेदायोद्यतस्य श्रद्दधानस्य ज्ञानवतो जीवस्य पापकर्मभ्यो निवृत्तिः सम्यक्चारित्रम् ॥ एतानि सम्यग्ज्ञानादीनि समुदितान्येव मोक्षकारणं न तु प्रत्येकम् । एतत्त्रयं रत्नत्रयपदेन व्यवह्रियते ॥

त्रिलोकीमूल्यरत्नेन दुर्लभः किं तुषोत्करः ॥ ३२ ॥

गुरुद्रुहां गुणः को वा कृतघ्नानां न नश्यति ।
विद्यापि विद्युदाभा स्यादमूलस्य कुतः स्थितिः ॥ ३३ ॥

गुरुद्रुहो न हि क्वापि विश्वास्यो विश्वघातिनः ।
अबिभ्यतां गुरुद्रोहादन्यद्रोहात्कुतो भयम् ॥ ३४ ॥

अथ कृत्यविदाचार्यः कृतकृत्यं यथाविधि ।
छात्रं प्रबोधयामास सद्धर्मं गृहमेधिनाम् ॥ ३५ ॥

पुनश्च राजपुत्रत्वमपि बोधयितुं गुरुः ।
अनुगृह्याभ्यधात्तस्य तदुदन्तमिदंतया ॥ ३६ ॥

**काष्ठाङ्गार**मसौ ज्ञात्वा राजघ्नं गुरुवाक्यतः ।
**सत्यंधरा**त्मजः क्रोधात्संनाहं तद्वधे व्यधात् ॥ ३७ ॥

मुहुर्निवार्यमाणोऽपि सूरिणा न शशाम सः ।
हन्तात्मानमपि घ्नन्तः क्रुद्धाः किं किं न कुर्वते ॥ ३८ ॥

वत्सरं क्षम्यतामेकं वत्सेयं गुरुदक्षिणा ।
गुरुणेति निषिद्धोऽभूत्कोऽनन्धो लङ्घयेद्गुरुम् ॥ ३९ ॥

---

**श्लो. ३२.** उत्करः समूहः ।

**श्लो. ३६–३७.** 'तदनु विजनं देशं नीत्वा गुरुः सुतपुंगवं
व्यवृणुत गिरा राजोदन्तं दुरन्तमिदंतया ।
विदितजनकोदन्तः सत्यंधरस्य सुतस्तदा
सुलभजनुषा रोषेणासीज्जगन्ति दहन्निव ॥'
इति जी. च. का.

**श्लो. ३९.** 'गुरुरपि * * * न पुनरयमन्यथा विरमतीति निश्चयमपि हृदयपुटके निधाय वत्स वत्सरमेकं क्षमैव मह्यं गुरुदक्षिणा विधेयेति कथंकथमपि सात्यंधरेरायोधनसंनाहसंधानं निवारयामास ।' इति जीवंधरचम्पूकाव्ये ।

पश्यन्कोपक्षणे तस्य पारवश्यमसौ गुरुः ।
अशिक्षयत्पुनश्चैनमपथघ्नी हि वाग्गुरोः ॥ ४० ॥

अवशः किमहो मोहादकुपः पुत्रपुङ्गव ।
सति हेतौ विकारस्य तदभावो हि धीरता ॥ ४१ ॥

अपकुर्वति कोपश्चेत्किं न कोपाय कुप्यसि ।
त्रिवर्गस्यापवर्गस्य जीवितस्य च नाशिने ॥ ४२ ॥

दहेत्स्वमेव रोषाग्निर्नापरं विषयं ततः ।
क्रुध्यन्निक्षिपति स्वाङ्गे वह्निमन्यदिधक्षया ॥ ४३ ॥

हेयोपादेयविज्ञानं नो चेद्व्यर्थः श्रमः श्रुतौ ।
किं व्रीहिखण्डनायासैस्तण्डुलानामसंभवे ॥ ४४ ॥

तत्त्वज्ञानं च मोघं स्यात्तद्विरुद्धप्रवर्तिनाम् ।
पाणौ कृतेन दीपेन किं कूपे पततां फलम् ॥ ४५ ॥

---

श्लो. ४१. 'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।'
इति कुमारसंभवे स. १ श्लो. ५९.

श्लो. ४२. 'चेद्विरोधिनि ते कोपः कोपे कोपः कुतो न ते ।
कोपः सर्वविरोधी यत्किंचिद्रोधीतरत्पुनः ॥' प्राचीनः श्लोकः.

श्लो. ४४. 'श्रवणग्रहणधारणानुस्मरणप्रमुखविविधप्रयाससाध्यस्य शास्त्रावगमस्य प्रयोजनं पुंसां हेयोपादेयपरिज्ञानस्वरूपपुरुषार्थसिद्धिः । तन्मूलत्वादपवर्गप्राप्तेः । सा चेन्न स्याद्व्रीहिखण्डनायास इव तण्डुलत्यागिनः * * * विफलः सकलोऽप्ययं प्रयासः स्यात् ।' इति गद्यचिन्तामणौ ।

श्लो. ४५. 'मायान्धकारं तरितुं प्रदीपं वेदान्तविज्ञानमपि प्रपन्नाः ।
कुर्वन्त्यहो कर्म जुगुप्सितं च दीपं गृहीत्वा हि पतन्ति कूपे ॥'
इति लोकोक्तिमुक्तावल्याम् ।

'न कार्यः क्रोधोऽयं श्रुतजलधिमग्नैकहृदयै-
र्न चेद्व्यर्था शास्त्रे परिचयकलाचारविधुरा ।

तत्वज्ञानानुकूलं तदनुष्ठातुं त्वमर्हसि ।
मुषितं धीधनं न स्याद्यथा मोहादिदस्युभिः ॥ ४६ ॥

स्त्रीमुखेन कृतद्वारान्स्वपथोत्सुकमानसान् ।
दुर्जनाहीञ्जहीहि त्वं ते हि सर्वंकषाः खलाः ॥ ४७ ॥

स्पृष्टानामहिभिर्नश्येद्गात्रं खलजनेन तु ।
वंशवैभववैदुष्यक्षान्तिकीर्त्यादिकं क्षणात् ॥ ४८ ॥

खलः कुर्यात्खलं लोकमन्यमन्यो न कंचन ।
न हि शक्यं पदार्थानां भावनं च विनाशवत् । ४९ ॥

सज्जनास्तु सतां पूर्वं समावर्ज्याः प्रयत्नतः
किं लोके लोष्टवत्प्राप्यं श्लाघ्यं रत्नमयत्नतः ॥ ५० ॥

जाग्रत्त्वं सौमनस्यं च कुर्यात्सद्वागलं परैः ।

---

निजे पाणौ दीपे लसति भुवि कूपे निपततां
फलं किं तेन स्यादिति गुरुरथोऽशिक्षयदमुम् ॥' जी.च.का.

श्लो. ४६. दस्युभिः, चौरैः; 'चौरैकागारिकस्तेनदस्युतस्करमोषकाः ।' इत्यमरः ।

श्लो. ४७. स्त्रीमुखेन, योषिन्मुखेन; पक्षे वम्रीमुखेन; 'वम्रिकायोषितौ स्त्रियौ' इति कोशः । सर्वंकषाः, सर्वप्राणिहिंसकाः; 'सर्वकूलाभ्रकरीषेषु कषः' इति खश्प्रत्ययः ।

श्लो. ४९. अन्यः, खलादन्यः सज्जनः । कंचन लोकम् । अन्यं, सज्जनम् । न कुर्यात्, कर्तुं न शक्नुयात् । हि, यतः । पदार्थानां, वस्तूनाम् । विनाशवत्, विनाशनमिव । भावनम्, उत्पादनम् । शक्यम्, सुकरम् । न, न भवतीत्यर्थः । यथा दुर्जनो लोकानात्मवद्दुर्जनीकर्तुं शक्नोति तथा सज्जनस्तानिव सज्जनीकर्तुं न शक्नोति । वस्तूनां विनाशनमेव सुकरम् । न पुनस्तेषामुत्पादनम् । इति तात्पर्यम् ।

श्लो. ५०. पूर्वम्, प्रथमतः; यावद्दुर्जनवचनवागुरासु निपतितो न भवति, तावदेवेति तात्पर्यम् । समावर्ज्याः, संपादनीयाः ।

श्लो. ५१. सद्वाक्, सतां वाक्; कर्त्री ।

अजलाशयसंभूतममृतं हि सतां वचः ॥ ५१ ॥
यौवनं सत्त्वमैश्वर्यमेकैकं च विकारकृत् ।
समवायो न किं कुर्यादविकारोऽस्तु तैरपि ॥ ५२ ॥
न हि विक्रियते चेतः सतां तद्धेतुसंनिधौ ।
किं गोष्पदजलक्षोभी क्षोभयेज्जलधेर्जलम् ॥ ५३ ॥
देशकालखलाः किं तैश्चला धीरेव बाधिका ।
अवहितोऽत्र धर्मे स्यादवधानं हि मुक्तये ॥ ५४ ॥
शिक्षावचःसहस्रैर्वा क्षीणपुण्ये न धर्मधीः ।
पात्रे तु स्फायते तस्मादात्मैव गुरुरात्मनः ॥ ५५ ॥

---

'उपदेशवचनं नाम मर्त्यानाममन्दरमथनपरिश्रमसाध्यममृतपानम्।' ग. चि. म.

श्लो. ५२. 'यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥' इति हितोपदेशे.
'वयोरूपविभूतीनामेकैकं मदकारणम् ।
तानि तस्मिन्समस्तानि न तस्योत्सिषिचे मनः ॥'
इति रघुवंशे. १७ स. श्लो ४३

'गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वं चेति महतीयमनर्थपरम्परा। सर्वाविनयानामेकैकमप्येषामायतनम्। किमुत समवायः।' कादम्बर्याम्।

'अविनयविहङ्गलीलावनं यौवनम्, अनङ्गभुजङ्गनिवासरसातलं सौन्दर्यम्, स्वैरविहारशैलूषनृत्तास्थानमैश्वर्यम्, पूज्यपूजाविलङ्घनजननी महासत्त्वता च, प्रत्येकमपि प्रभवति जनानामनर्थाय। चतुर्णां पुनरेकत्र संनिपातः सद्म सर्वानर्थानामित्यर्थेऽस्मिन्का संशीतिः।' इति ग. चि. म.

श्लो. ५३. गोष्पदजलक्षोभी, स्वल्पजलसंक्षोभनचतुरो दर्दुरः।

श्लो. ५४. देशकालखलाः सन्तीति शेषः। किं तैः, तैर्न कोऽपि प्रत्यवाय इत्यर्थः।

श्लो. ५५. स्फायते, स्फारीभवति। 'स्फायी वृद्धौ' इति धातुः।

न शृण्वन्ति न बुध्यन्ति न प्रयान्ति च सत्पथम् ।
प्रयान्तोऽपि न कार्यान्तं धनान्धा इति चिन्त्यताम् ॥ ५६ ॥

इत्याशास्य तमाश्वास्य कृच्छ्रं स तपसे गतः ।
प्रागप्रयाणवेलायां न हि लोके प्रतिक्रिया ॥ ५७ ॥

प्रव्रज्याथ तपःशक्त्या नित्यमानन्दमव्रजत् ।
निष्प्रत्यूहा हि सामग्री नियतं कार्यकारिणी ॥ ५८ ॥

तपोवनं गुरौ प्राप्ते शुचं प्रापत्स कौरवः ।
गर्भाधानक्रियामात्रन्यूनौ हि पितरौ गुरुः ॥ ५९ ॥

तत्त्वज्ञानजलेनाथ शोकाग्निं निरवापयत् ।
शैत्ये जाग्रति किं नु स्यादातपार्तिः कदाचन ॥ ६० ॥

अथास्मिन्विद्यया कान्त्या विदुषां योषितां हृदि ।
रथे च योग्यया भाति तत्र प्रस्तुतमुच्यते ॥ ६१ ॥

अथैकदा समभ्येत्य राजाङ्गणभुवि स्थिताः ।
गावोऽवस्कन्दिता व्याधैरिति गोपा हि चुक्रुशुः ॥ ६२ ॥

---

श्लो. ५६. 'वदन्ति चेदपि चेतस्विनः, क्षमापतयः प्रतापज्वररयबधिरितकर्णा इव तन्नावकर्णयन्ति । कथंचिदाकर्णयन्तोऽपि, नूनमदत्तावधानाः खेदयन्तः स्वहितोपदेशकारिणः सूरीन्, तदुक्तं नानुतिष्ठन्ति । अनुतिष्ठन्तोऽपि न फलपर्यन्तं कुर्वन्ति कार्यम् ।' इति ग. चि म.

श्लो. ५७. आशास्य, आशिषं प्रयुज्य; कृच्छ्रम्, कथंकथमपि ।

श्लो. ५९. कौरवः, जीवंधरः ।

श्लो. ६०. 'जीवंधरस्तत्स्मरणसंधुक्षितगुरुविरहाशुशुक्षणिं तत्त्वज्ञानपयःपूरेण निर्वापयामास ।' इति जी. च. का.

श्लो. ६१. योग्यया, शस्त्राभ्यासचातुर्येण; 'अभ्यासः खुरली योग्या' इति त्रिकाण्डशेषः । भातीति सप्तम्येकवचनम् । भाति प्रकाशमाने सति ।

**काष्ठाङ्गारो**ऽपि रुष्टोऽभूत्तदाक्रोशवचःश्रुतेः ।
असमानकृतावज्ञा पूज्यानां हि सुदुःसहा ॥ ६३ ॥

पराजेष्ट पुनस्तेन गवार्थं प्रहितं बलम् ।
स्वदेशे हि शशप्रायो बलिष्ठः कुञ्जरादपि ॥ ६४ ॥

व्यजेष्ट व्याधसेनेति श्रुत्वा घोषोऽपि चुक्षुभे ।
न बिभेति कुतो लोक आजीवनपरिक्षये ॥ ६५ ॥

**नन्दगोपा**ह्वयः कोऽपि तज्जयार्थं व्यचीचरत् ।
किं स्यात्किंकृत इत्येवं चिन्तयन्ति हि पीडिताः ॥ ६६ ॥

धनार्जनादपि क्षेमे क्षेमादपि च तत्क्षये ।
उत्तरोत्तरवृद्धा हि पीडा नृणामनन्तशः ॥ ६७ ॥

यथाशक्ति प्रतीकारः करणीयस्तथापि चेत् ।
व्यर्थः किमत्र शोकेन यदशोकः प्रतिक्रिया ॥ ६८ ॥

---

श्लो. ६३. 'तदनु गोपाक्रोशवशविदितवृत्तान्तः काष्ठाङ्गारोऽप्यसमानकृतामवज्ञां मृगाधिप इव शृगालकृतामसहमानः * * * रथकड्यया पादातेन च समधिकमर्नाकं **कालकूट**बलपाटनाय प्राहिणोत् ।' इति जी. च. का.

श्लो. ६४. 'तद्दशायां स्वदेशगतः शशः कुञ्जरातिशायीति किंवदन्तीं यथार्थं कर्तुमिच्छया वा तुच्छेतरजीवककुमारपराक्रमविषयस्य भावितया वा नाफलबलनिष्ठुरहुंकारभीतः काष्ठाङ्गारवाहिनीनिवहस्तिमिरपरिभूतः पश्चिमादिगङ्गनासंगतपतङ्ग इव प्रतापपराङ्मुखः प्रतिसंहृतकरव्यापृतिरपसर्तुमारभत ।' इति गद्यचिन्तामणौ.

श्लो. ६५. घोषः, आभीरपल्ली ।

'तदनु * * * व्याधयोधैर्निरन्तरनिर्मुक्तनाराचधारापूरिताङ्गेषु काष्ठाङ्गारसैनिकेषु व्याधसेना व्यजेष्टेति घोषो घोषान्तरमुत्तरङ्गयामास ।' जी.च.का.

श्लो. ६६. किं किंकृते स्यात्,— क्रियमाणं किं कार्यं कस्मै फलाय स्यात् ।

इत्यूहेन स वीराय विजये हि वनौकसाम् ।
सप्तकल्याणपुत्रीभिर्देया पुत्रीत्यघोषयत् ॥ ६९ ॥

सात्यंधरिस्तु तच्छ्रुत्वा तद्घोषणमवारयत् ।
उदात्तानां हि लोकोऽयमखिलो हि कुडुम्बकम् ॥ ७० ॥

जित्वाथ **जीवकस्वामी** किरातानाहरत्पशून् ।
तमो ह्यभेद्यं खद्योतैर्भानुना तु विभिद्यते ॥ ७१ ॥

ननन्द **नन्दगोपो**ऽपि गोधनस्योपलम्भतः ।
असुमतामसुभ्योऽपि गरीयो हि भृशं धनम् ॥ ७२ ॥

अथानीय सुतां दातुं स्वामिने वार्यपातयत् ।
कृत्याकृत्यविमूढा हि गाढस्नेहान्धजन्तवः ॥ ७३ ॥

**जीवंधर**स्तु जग्राह वार्धारां तेन पातिताम् ।
**पद्मास्यो** योग्य इत्युक्त्वा न ह्ययोग्ये स्पृहा सताम् ॥ ७४ ॥

माम मामेव **पद्मास्यं** पश्येति पुनरब्रवीत् ।
गात्रमात्रेण भिन्नं हि मित्रत्वं मित्रता भवेत् ॥ ७५ ॥

**गोदावरी**सुतां दत्तां **नन्दगोपेन** तुष्यता ।
परिणिन्येऽथ **गोविन्दां पद्मास्यो** वह्निसाक्षिकम् ॥७६॥

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्रचूडामणौ गोविन्दालम्भो नाम द्वितीयो लम्बः ।

---

श्लो. ६९–७०. 'तदनु पुलिन्दसंदोहतो गोविमोक्षणं विधास्यते, दास्यते गोपेन्द्रनन्दगोपनन्दिनी सप्तचामीकरपुत्रिकाभिः साकमिति, पटुतरं पुटभेदनचत्वरे काष्ठाङ्गारेण कारितां घोषणां निशम्य, विशालतरकुतुकः सात्यंधरिस्तद्धोषं निवारयामास ।' इति जी. च. का.

# तृतीयो लम्बः ।

अथोपयम्य **गोविन्दां पद्मास्ये** रमयत्यलम् ।
वीरश्रियं कुमारे च तत्र प्रस्तुतमुच्यते ॥ १ ॥

आसीत्तत्पुरवास्तव्यो वैश्यः **श्रीदत्तनामकः** ।
वित्तायास्पृहयत्सोऽयं धनाशा कस्य नो भवेत् ॥ २ ॥

अर्थार्जननिदानं च तत्फलं चायमोहत ।
निरङ्कुशं हि जीवानामैहिकोपायचिन्तनम् ॥ ३ ॥

अस्तु पैतृकमस्तोकं वस्तु किं तेन वस्तुना ।
रोचते न हि शौण्डाय परपिण्डादिदीनता ॥ ४ ॥

स्वापतेयमनायं चेत्सव्ययं व्येति भूर्यपि ।
सर्वदा भुज्यमानो हि पर्वतोऽपि परिक्षयी ॥ ५ ॥

दारिद्र्यादपरं नास्ति जन्तूनामप्यरुन्तुदम् ।
अत्यक्तं मरणं प्राणैः प्राणिनां हि दरिद्रता ॥ ६ ॥

---

श्लो. ४. अस्तोकम्, अनल्पम् ; परपिण्डादिदीनता, परपिण्डादनशीलस्य या दीनता दौःस्थ्यं सा ; 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः ।

श्लो. ५. स्वपतौ साधु, स्वापतेयम्, धनम् ।

श्लो. ६. अरूंषि तुदतीत्यरुंतुदम्, मर्मभेदि ; 'विध्वरुषोस्तुदः' इति खश्-प्रत्यये मुमागमः । अत्यक्तमिति— 'பணமில்லாதவன் பிணம்.'

பழமொழி.

श्लो. ४-६. 'अस्मत्पितृपितामहादिभिरर्जितमस्तोकमस्ति चेदपि वस्तु, स्वहस्तार्जितमित्योन्नतचित्तस्य न चित्तप्रसादमावहति । आवहतु वा । कथं तदायरहितं धनमव्ययं स्यात् । शश्वदुपभोगे गिरिरपि नश्यतीति श्रुतेः । वीतवित्ततायाश्च किमपरमरुंतुदम् । असुभृतां हि दारिद्र्यमसुभिर्युक्तं मरणम् ।' इति ग. चि. म.

रिक्तस्य हि न जागर्ति कीर्तनीयोऽखिलो गुणः ।
हन्त किं तेन विद्यापि विद्यमाना न शोभते ॥ ७ ॥

स्यादकिंचित्करः सोऽयमाकिंचन्येन वञ्चितः ।
अलमन्यैः स साकूतं धन्यवक्त्रं च पश्यति ॥ ८ ॥

संपल्लाभफलं पुंसां सज्जनानां हि पोषणम् ।
काकार्थफलनिम्बोऽपि श्लाघ्यते न हि चूतवत् ॥ ९ ॥

लोकद्वयहितं चापि सुकरं वस्तु नासताम् ।
लवणाब्धिगतं हि स्यान्नादेयं विफलं जलम् ॥ १० ॥

इत्यूहान्नावमारुह्य प्रतस्थे स वणिक्पतिः ।
वार्धिमेव धनार्थी किं गाहते पार्थिवानपि ॥ ११ ॥

द्वीपान्तरान्न्यवर्तिष्ट पुष्टः सांयात्रिको धनैः ।
अतर्क्यं खलु जीवानामर्थसंचयकारणम् ॥ १२ ॥

अवारान्तमथ प्रापत्पारावारस्य नाविकः ।
चुक्षुभे नौरिहासारान्न हि वेद्यो विपत्क्षणः ॥ १३ ॥

---

श्लो. ७. एकस्य दारिद्र्यमात्रस्य सत्त्वे, सर्वेऽपि सद्गुणा विनष्टप्रायतामुपयान्तीत्यर्थः । अमुमेवाशयमनुरुन्धानः कश्चिदन्योऽपि कविः, 'एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः' ( कुमारसंभवे. १ स. ३ श्लो ) इति कालिदासोक्तौ दोषं पश्यन्, 'एको हि दोषो गुणसंनिपाते निमज्जतीन्दोरिति यो बभाषे । नूनं न दृष्टं कविनापि तेन दारिद्र्यदोषो गुणराशिनाशी ॥' इति कवयामास ।

श्लो. ८. अकिंचित्करः, सर्वकार्याक्षमः ; आकिंचन्येन, दारिद्र्येण ; साकूतम्, साभिप्रायम् ।

श्लो. १०. सुकरम्, शुभकृत् ; नादेयम्, नदीसंबन्धि ।

'सुस्वादुतोयप्रवहा हि नद्यः समुद्रमासाद्य भवन्त्यपेयाः ।' भर्तृहरिः ।

श्लो. १३. अवारान्तम्, अर्वाक्तीरस्य समीपम् ; 'पारावारे परार्वाची तीरे' इत्यमरः ; अत्रार्वाक्त्वं च स्वदेशापेक्षयेति बोध्यम् । आसारात्, धारासंपातात् ;

पूर्वमेव तु नौनाशाच्छोकाब्धि पोतगा गताः ।
काष्ठागतस्य दुःखस्य दृष्टान्तं तद्धि नौक्षये ॥ १४ ॥
सांयात्रिकस्तु तत्वज्ञो विकारं नैव जग्मिवान् ।
अज्ञात्प्राज्ञस्य को भेदो हेतोश्चेद्विक्रतिर्द्वयोः ॥ १५ ॥
भाविन्या विपदो यूयं विपन्नाः किं बुधाः शुचा ।
सर्पशङ्काविभीताः किं सर्पास्ये करदायिनः ॥ १६ ॥
विपदस्तु प्रतीकारो निर्भयत्वं न शोकिता ।
तच्च तत्त्वविदामेव तत्त्वज्ञाः स्यात तद्बुधाः॥ १७ ॥
इत्यप्यबोधयत्सोऽयं वणिक्पोताश्रितान्सुधीः ।
तत्त्वज्ञानं हि जीवानां लोकद्वयसुखावहम् ॥ १८ ॥
तावता नावि नष्टायां दृष्टोऽभूत्कूपखण्डकः ।
सत्यायुषि हि जायेत प्राणिनां प्राणरक्षणम् ॥ १९ ॥

---

'पपात तरणौ तदा बहलवर्षबिन्दूत्करः ।' इति जी. च. का.
न हि वेद्यो विपत्क्षणः,— 'गोचरो न हि विपत्क्षणः प्राणिनाम्' । जी. च. का

**श्लो. १४.** 'यानपात्रध्वंसनात्प्रागेव प्राप्तशोकसागरान्नाविकानालोक्य * * अयमभिदधे ।' इति ग. चि. म.

तत्,— पोतभङ्गात्प्रागेव तद्विनाशविनिश्चयेन शोकाम्बुधिमग्नत्वम्; काष्ठां गतस्य, परां कोटिमापन्नस्य; दृष्टान्तम्, निदर्शनम्; 'दृष्टान्तावुभे शास्त्रनिदर्शने' इत्यमरः ।

**श्लो. १५** सांयात्रिकः, अत्र श्रीदत्तः; विकारं नैव जग्मिवान्, स्वयमपगताधिरभवदित्यर्थः ।

**श्लो. १६.** सर्पेति । भवेयुरिति शेषः ।

**श्लो. १७.** तच्च, निर्भयत्वं च; तत्, ततो हेतोः ।

**श्लो. १९.** कूपखण्डकः, नौमध्यरज्जुबन्धनकाष्ठस्य खण्डः ।

श्रीदत्तस्तु तमारुह्य प्रासदद्द्वीपसंश्रितः ।
राज्यभ्रष्टोऽपि तुष्टः स्याल्लब्धप्राणो हि जन्तुकः ॥ २० ॥

नष्टशेवधिरप्येष मृष्टमेवमतर्कयत् ।
दुःखार्थोऽपि सुखार्थो हि तत्त्वज्ञानधने सति ॥ २१ ॥

तृष्णाग्निदह्यमानस्त्वं मूढात्मन्किं नु मुह्यसि ।
लोकद्वयहितध्वंसोर्न हि तृष्णारुषोर्भिदा ॥ २२ ॥

लोकद्वयहितायात्मन्नैराश्यनिरतो भव ।
धर्मसौख्यच्छिदाशा ते तरुच्छेदः फलार्थिनाम् ॥ २३ ॥

संसारासारभावोऽयमहो साक्षात्कृतोऽधुना ।
यस्मादन्यदुपक्रान्तमन्यदापतितं पुनः ॥ २४ ॥

अत एव हि योगीन्द्रा अपीन्द्रत्वार्हसंपदम् ।
त्यक्त्वा तपांसि तप्यन्ते मुक्त्यै तेभ्यो नमो नमः ॥ २५ ॥

इत्यूहोऽपि स दृष्टस्य कस्यचित्स्वार्तिमूचिवान् ।
मध्येमध्ये हि चापल्यमा मोहादपि योगिनाम् ॥ २६ ॥

यादृच्छिक इवायातस्तत्कृच्छ्रं सोऽपि शुश्रुवान् ।
संसृतौ व्यवहारस्तु न हि मायाविवर्जितः ॥ २७ ॥

---

'तिमिङ्गिले च तरङ्गिः; संनिहिते च कोऽपि कूपखण्डः ।' ग. चि. म.

श्लो. २१. शेवधिः, निधिश्चयः; मृष्टम्, अव्याकुलम् ।

श्लो. २२. भिदा, भेदः । ध्वंसोरिति क्विबन्तं रूपम् ।

श्लो. २६. इत्यूहोऽपि, एवंविचारोऽपि; आ मोहात्, यावन्मोहनीयकर्मणः सावशेषत्वं तावत् ।

श्लो. १९–२७. 'शनैः शनैर्नावि नष्टायां दिष्टेनेव संनिधापितं दृष्टं कूपखण्डमारुह्यात्मानं लब्धप्राणं मन्यमानो नष्टशेवधिरपि संतुष्टहृदयः किंचन द्वीपमासाद्य

श्रुत्वा मिषेण केनापि नीत्वा राजतभूधरम् ।
स्वागतेः कारणं सर्वमभाणीत्स वणिक्पतेः ॥ २८ ॥
**विजयार्धगिरा**वस्ति **दक्षिणश्रेणि**मण्डने ।
**गान्धार**विषये ख्याता **नित्यालोका**ह्वया पुरी ॥२९॥
**गरुडवेग**नामास्यां राजा राज्ञी तु **धारिणी** ।
पुत्री **गन्धर्वदत्ता**भूदभूत्सापि यवीयसी ॥ ३० ॥
वीणाविजयिनो भार्या **राजपुर्या**मियं भवेत् ।
भूमाविति मुहूर्तज्ञा जन्मलग्ने व्यजीगणन् ॥ ३१ ॥
तदर्थं पार्थिवः सार्धमेकान्ते कान्तया तया ।
मन्त्रयित्वा तदन्ते माममन्दप्रीतिरादिशत् ॥ ३२ ॥
कुलक्रमागता मैत्री **श्रीदत्ते**नास्ति नस्ततः ।
गत्वा सत्वरमत्रैव सोऽयमानीयतामिति ॥ ३३ ॥
भवन्तं परतन्त्रोऽहं नौभ्रंशभ्रान्तिमावहन् ।
नाम्ना **धरः** कृतेर्भूम्ना पुनरानीतवानिति ॥ ३४ ॥

---

तत्र याद‍ृच्छिकमिवागतं कंचन विद्याधरं प्रति चापलवशेन निजोदन्तं प्रतिपादयामास ।' इति जी. च. का.

श्लो. २८. राजतभूधरम्, **विजयार्धगिरिम्** ।

'श्रुत्वाथ तेन च मिषेण स नीयमानो
रूप्याचलं स्मितनिभं धरणीरमण्याः ।
* * * *
दुर्वर्णभूधरे तत्र सर्वं स्वागतिकारणम् ।
अभाणीत्खेचरः सोऽयं स्पष्टमेव वणिक्पतेः ॥' जी. च. का.

श्लो. ३०. यवीयसी, अतिशयेन युवतिः ।

श्लो. ३४. नौभ्रंशभ्रान्तिमावहन्, नौविनाशविभ्रान्तिमापादयन्; कृतेर्भूम्ना, कार्यगौरवात् ।

**श्रीदत्तो**ऽपि तदाकर्ण्य तुतोष सुतरामसौ ।
दुःखस्यानन्तरं सौख्यमतिमात्रं हि देहिनाम् ॥ ३५ ॥
असुखायत वैश्योऽपि खेचरेन्द्रावलोकनात् ।
मित्रं धात्रीपतिं लोके कोऽपरः पश्यतः सुखी ॥ ३६ ॥
नभश्चराधिपः पश्चात्तदायत्तां सुतां व्यधात् ।
प्राणेष्वपि प्रमाणं यत्तद्धि मित्रमितीष्यते ॥ ३७ ॥
**श्रीदत्तं** सत्वरं तस्मात्खेचरेशो न्यवर्तयत् ।
अङ्गजायां हि सूत्यायामयोग्यं कालयापनम् ॥ ३८ ॥
गृहस्थानां हि तद्दौःस्थ्यमतिमात्रमरुन्तुदम् ।
कन्यानामप्रमादेन रक्षणादिसमुद्भवम् ॥ ३९ ॥
तयामा स्वपुरं प्राप्य **श्रीदत्तो**ऽप्यथ तत्कथाम् ।
पत्न्याः प्रकटयामास स्त्रीणामेव हि दुर्मतिः ॥ ४० ॥
वीणाविजयिनो योग्या भोग्या पुत्री ममेति सः ।
कटके घोषयामास राजानुमतिपूर्वकम् ॥ ४१ ॥
अकुतोभीतिता भूमेर्भूपानामाज्ञयान्यथा ।

---

श्लो ३५. 'श्रीदत्तोऽपि तदाकर्ण्य बहुधा मुमुदेतराम् ।
नष्टस्यार्थस्य संप्राप्तिः कामदोग्ध्रिर्मुदां न किम् ॥ इति जी. च. का.
'यदेवोपवनं दुःखात्सुखं तद्रसवत्तरम् ।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥' इत्यन्येऽपि.

श्लो. ३८. सूत्यायाम्, युवत्यां सत्याम्; 'क्रौड्यादिभ्यश्च' इति ष्यङ्प्रत्ययः ।

श्लो. ४०. तयामा, तया सह ।

श्लो. ४१. कटके, राजधान्याम्; राजानुमतिपूर्वकम्, काष्ठाङ्गारानुमत्या सह । 'स्वयंवरमण्डपं परिकल्प्य राजानुमतिपूर्वकं तदुदन्तं कटकेषु घोषयमास ।'
इति जी. च. का.

आस्तामन्यत्सुवृत्तानां वृत्तं च न हि सुस्थितम् ॥ ४२ ॥
वीणामण्डपमासेदुस्तावता धरणीभुजः ।
स्त्रीरागेणात्र के नाम जगत्यां न प्रतारिताः ॥ ४३ ॥
कन्यायाः परिवादिन्यां पराजेषत पार्थिवाः ।
अपुष्कला हि विद्या स्यादवज्ञैकफला क्वचित् ॥ ४४ ॥
**जीवंधर**कुमारस्तु घोषवत्यां जिगाय ताम् ।
अनवद्या हि विद्या स्याल्लोकद्वयफलावहा ॥ ४५ ॥
पराजयं जयाच्छ्लाघ्यं मत्वा सापि तमासदत् ।
अन्तिकं कृतपुण्यानां श्रीरन्विष्य हि गच्छति ॥ ४६ ॥
आमुमोचाथ मोचोरुः स्रजं **जीवक**वक्षसि ।
कुर्वन्तु तप इत्येवं सर्वेभ्यो ब्रुवतीव सा ॥ ४७ ।
**काष्ठाङ्गार**स्तु तद्वीक्ष्य क्षितिपान्समधुक्षयत् ।
अन्याभ्युदयखिन्नत्वं तद्धि दौर्जन्यलक्षणम् ॥ ४८ ॥
क्रयविक्रययोर्योग्यः कुप्यानां वैश्यसूनुकः ।
कथं लभेत स्त्रीरत्नं शस्तं वस्तु हि भूभुजाम् ॥ ४९ ॥

---

**श्लो. ४४.** अपुष्कला, असंपूर्णा ; अवज्ञैकफला, अवज्ञैव मुख्यं फलं यस्याः सा । 'एको मुख्यान्यकेवलाः' इत्यमरः ।

**श्लो. ४५.** घोषवत्याम्, तन्नामवत्यां गन्धर्वदत्ताया वीणायाम् ।

**श्लो. ४७.** मोचोरुः, रम्भोरुः, अत्र **गन्धर्वदत्ता** ।

**श्लो. ४६–४७.** 'तावत्सा गन्धर्वदत्ता पराजयमेव जयं मन्यमाना * * वेत्रवतीकरकालितां मालिकामादाय जीवकस्य वक्षस्यामुमोच ।' जी. च. का.

**श्लो. ४९.** कुप्यम्, सुवर्णरजताभ्यामन्यत् । 'स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताकृते । ताभ्यां यदन्यत्तत्कुप्यम्' इत्यमरः । 'विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः ।' इति किरातार्जुनीये । अकुप्यम्, हेमरजते ।

इति संधुक्षिताश्चक्रुः स्वामिना तेऽपि संयुगम् ।
प्रकृत्या स्यादकृत्ये धीर्दुःशिक्षायां तु किं पुनः ॥ ५० ॥

पराजेषत भूपास्ते धन्विनां चक्रवर्तिनः ।
अलं काकसहस्रेभ्य एकैव हि दृषद्भवेत् ॥ ५१ ॥

स्थाने कन्यामनः सक्तमित्यूचुः सज्जना मुदा ।
सुधासूतेः सुधोत्पत्तिरपि लोके किमद्भुतम् ॥ ५२ ॥

अथ **गन्धर्वदत्तां** तां **श्रीदत्तेना**ग्निसाक्षिकम् ।
दत्तां स **जीवकस्वामी** पर्यणैष्ट यथाविधि ॥ ५३ ॥

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्रचूडामणौ गन्धर्वदत्तालम्भो नाम तृतीयो लम्बः।

## चतुर्थो लम्बः ।

अथ **जीवंधरस्वामी** रेमे रामासमन्वितः ।
संसारेऽपि यथायोग्याद्भोग्यान्ननु सुखी जनः ॥ १ ॥

---

शस्तं वस्तु हि भूभुजाम्— 'रत्नहारी तु पार्थिवः' इति न्यायादित्यर्थः ।

श्लो. ४८–५०. 'तदा दिनदीपायितेन काष्ठाङ्गारेण कुप्यक्रयविक्रययोर्योग्यो वैश्यसुतः कथं स्त्रीरत्नयोग्य इति संधुक्षिताः क्षितिपतयो गतमतयः सर्वाभिसारेण चमूं पुरोधाय विमूढमनसः संयुगमारभन्त ।' इति जी. च. का.

श्लो. ५१. 'ஆயிரங்காக்கைக்கோரு கல்.' பழமொழி.

श्लो. ५२. सुधासूतेः, चन्द्रात् ।

श्लो. १. यथायोग्यात्, सदृशात्; योगाय प्रभवति योग्यम्, 'योगाद्यच्च' इति यत्प्रत्ययः; यथाशब्दस्य योग्यशब्दस्य च 'सुप्सुपा' इति समासः ।

'तयोः परस्परप्रेमप्रवृद्धसुखयोरगात् ।
निर्वृतिः परमां काष्ठां समसंयोगसंभवा ॥' इत्युत्तरपुराणे ।

माधवोऽथ जलक्रीडां पौराणामुदपादयत् ।
रागान्धानां वसन्तो हि बन्धुरग्नेरिवानिलः ॥ २ ॥
जीवंधरकुमारोऽपि मित्रैर्द्रष्टुमयादमूम् ।
नवापगाजलक्रीडां लोको ह्यभिनवप्रियः ॥ ३ ॥
अवधिपुर्द्विजास्तत्र हविर्दूषितभाषणम् ।
क्रूराः किं किं न कुर्वन्ति कर्म धर्मपराङ्मुखाः ॥ ४ ॥
निर्निमित्तमपि घ्नन्ति हन्त जन्तूनधार्मिकाः ।
किं पुनः कारणाभासे नो चेदत्र निवारकः ॥ ५ ॥
तद्व्यथां वीक्षमाणोऽयं कुमारो विषसाद सः ।
तद्धि कारुण्यमन्येषां स्वस्येव व्यसने व्यथा ॥ ६ ॥
प्रत्युज्जीवयितुं श्वानं यत्नेनाप्यथ नाशकत् ।
परलोकार्थमस्यायं पञ्चमन्त्रमुपादिशत् ॥ ७ ॥
न ह्यकालकृतो यत्नो भूयानपि फलप्रदः ।
निर्वाणपथपान्थानां पाथेयं तद्धि किं परैः ॥ ८ ॥

---

श्लो. २. माधवः, वसन्तः ।

श्लो. ४. हविर्दूषितभाषणम्, हविर्दूषितं येन तं भाषणम्, श्वानम् ।

श्लो. ५. कारणाभासे, ईषद्भासः आभासः कारणस्याभासः तस्मिन्; अकारणस्यापि कारणवद्भासमानत्वे सति, इत्यर्थः ।

श्लो. ६. स्वस्य व्यसन इवान्येषां व्यसने या व्यथा तद्धि कारुण्यमित्यन्वयः ।

श्लो. ७. पञ्चमन्त्रम्, मूलमन्त्रम् ।

श्लो. ४–८. 'एवं वनविहारपरेषु पौरेषु, तत्र सप्ततन्तुमारभमाणैर्द्विजैर्हविःस्पर्शनजनितकोपनैर्हन्यमानमन्तरुत्कूलितदुःखाम्बुधिघोषितमिव प्राणमहीपालस्य प्रयाणसंसूचकभेरीभाङ्कारमिवाक्रन्दनारावमातन्वानं * * सारमेयमवलोक्यापारकरुणा-

यक्षेन्द्रोऽजनि यक्षोऽयमहो मन्त्रस्य शक्तितः ।
कालायसं हि कल्याणं कल्पते रसयोगतः ॥ ९ ॥

मरणक्षणलब्धेन येन श्वा देवताजनि ।
पञ्चमन्त्रपदं जप्यमिदं केन न धीमता ॥ १० ॥

स कृतज्ञचरो देवः कृतज्ञत्वात्तदागमत् ।
अन्तर्मुहूर्ततः पूर्तिर्दिव्याया हि तनोर्भवेत् ॥ ११ ॥

कुमारममरो दृष्ट्वा हृष्टस्तुष्टाव मृष्टवाक् ।
उपकारस्मृतिः कस्य न स्यान्नो चेदचेतनः ॥ १२ ॥

---

करो जीवन्धरः प्रत्युज्जीवयितुमशक्नुवानः परलोकसमर्थापनपरतन्त्रं पञ्चमन्त्रमुपादिक्षत् ।' इति जी. च. का.

'तन्निरीक्षणक्षणोपजृम्भमाणकरुणः कारुणिकानामग्रेसरः कुमारः सारमेयोऽयमपगतासुप्रायतया प्रत्युज्जीवयितुमशक्य इति निर्णीय तत्कर्णमूले सादरं सत्वरं सानुक्रोशं च मूलमन्त्रमुपादिक्षत् ।' इति ग. चि. म.

**श्लो. ९.** यक्षः, श्वा; 'यक्ष इन्द्रमृगः श्वालः कपिलो मण्डलः शुनः'। इति भोजनिघण्टुः । यक्षेन्द्रः, यक्षाणां तन्नाम्नां देवयोनिविशेषाणामीश्वरः । कालं च तदयश्च कालायसम्; 'अनोश्मायःसरसां जातिसंज्ञयोः' इति टच्प्रत्ययः । कल्याणम्, सुवर्णम् ।

'சொல்லிய நன்மையில்லாச் சுணங்கனிவ்வுடம்பு நீங்கி
யெல்லொளித்தேவனாகிப் பிறக்குமோ வென்னவேண்டா
கொல்லுலையகத்திட்டூதிக் கூரிரும் பிரதங்குத்த
வெல்லையில் செம்பொனாகி யெறிகிறம்பெற்றதன்றே.'
ஜீவகசிந்தாமணி.

**श्लो. ११.** कृतज्ञः, श्वा; 'जिह्वापानः पुरोगामी कृतज्ञो रात्रिजागरः ।' इति भोजनिघण्टुः । भूतपूर्वः कृतज्ञः, कृतज्ञचरः; 'भूतपूर्वे चरट्'। अन्तर्मुहूर्ततः, मुहूर्तमात्र एव ।

**श्लो. १२.** मृष्टा शोधिता वाग्यस्य स मृष्टवाक् । अमरः, अत्र यक्षेन्द्रः ।

व्यस्मेष्ट तेन न स्वामी मनुमाहात्म्यनिर्णयात् ।
मुक्तिप्रदेन मन्त्रेण देवत्वं न हि दुर्लभम् ॥ १३ ॥

स्मर्तव्योऽस्मि महाभागेत्युक्त्वा देवास्तिरोऽभवत् ।
प्रतिकर्तुं कथं नेच्छेदुपकर्तुः सचेतनः ॥ १४ ॥

सारमेयचरे देवे तमाश्लिष्य मुहुर्मुहुः ।
आपृच्छ्य च गते तस्मिन्नत्र प्रस्तुतमुच्यते ॥ १५ ॥

चूर्णार्थं **सुरमञ्जर्याः** स्पर्धाभूद्**गुणमालया** ।
एकार्थस्पृहया स्पर्धा न वर्धेतात्र कस्य वा ॥ १६ ॥

मा भूत्पराजिता स्नाता नादेये वारिणीति वै ।
संगिराते स्म ते सख्यौ मात्सर्यात्किं न नश्यति ॥ १७ ॥

---

श्लो. १३. स्वामी, **जीवन्धरः**। मनुमाहात्म्यवर्णनात्, मन्त्रमाहात्म्यविनिश्चयेन ।

श्लो. १४. देवः, यक्षेन्द्रः । प्रतिकर्तुं, प्रत्युपकारं विधातुम् । 'आगतवति कृच्छ्रे कचिदनुस्मर्तव्योऽयं जनः, इत्यभिधाय कृतप्रणामः, सप्रणयं परिष्वज्य परोक्षतामभाक्षीत् ।' इति ग. चि. म.

'स्मर्तव्योऽस्मि महाभाग व्यसनोत्सवयोस्त्वया ।
कर्तव्योऽहं कृतार्थश्चेत्युक्त्वा देवस्तिरोदधे ॥' इति जी. च. का.

श्लो. १५. सरमा, शुनी ; 'सरमा शुनी' इत्यमरः । सरमाया अपत्यं पुमान् सारमेयः, श्वा । सारमेयचरे, भूतपूर्वे सारमेये ।

श्लो. १६. चूर्णार्थम्, स्वस्वपटवासचूर्णोत्कर्षवाञ्छया । **सुरमञ्जरी गुणमाला** चेति **राजपुरी**वास्तव्ययोर्वैश्यवरयोः कन्यके ।

'एकामिषप्रभवमेव सहोदराणा-
मुज्जृम्भते जगति वैरमिति प्रसिद्धम् ।
पृथ्वीनिमित्तमभवत्कुरुपाण्डवानां
तीव्रस्तथा हि भुवनक्षयकृद्विरोधः ॥' इति प्रबोधचन्द्रोदये ।

श्लो. १७. नादेये, नदीसंबन्धिनि । वै, अवधारणे, दृढमित्यर्थः ।

कन्ये प्राहिणुतां पश्चाच्चेट्यौ स्वे निकटे सताम् ।
कुत्सितं कर्म किं किं वा मत्सरिभ्यो न रोचते ॥ १८ ॥

अस्थिषातामथागत्य चेट्यौ **जीवक**कोविदे ।
अनवद्या सती विद्या लोके किं न प्रकाशते ॥ १९ ॥

गुणवद्**गुणमालाया**श्चूर्णं निर्वर्ण्य सोऽभ्यधात् ।
पाण्डित्यं हि पदार्थानां गुणदोषविनिश्चयः ॥ २० ॥

चेटी तु **सुरमञ्जर्या**स्तच्छ्रुत्वा रोषणाब्रवीत् ।
अन्यैरप्युक्तमुक्तं तैः किमध्यैष्ट भवानिति ॥ २१ ॥

---

श्लो. १९. **जीवक**कोविदेऽस्थिषाताम्,— कोविदं **जीवकं** निर्णेतृत्वेनाश्रितवत्यौ, इत्यर्थः । 'प्रकाशनस्थेयाख्ययोश्च' इत्यात्मनेपदम् । सती, प्रशस्ता ।

श्लो. १६–१९. '**कुबेरमित्रकुबेरदत्त**नामजलधिसंभूतयो**र्गुणमाला**–**सुरमञ्जरी**नामधेययोः कन्यारत्नयोः, **चन्द्रोदय–सूर्योदया**भिधपरस्परपटवासचूर्णोत्कर्षस्पर्धया पराजिता नवापगाजलस्नाता मा भूदिति कृतसंगरयोः कुट्टन्यौ चूर्णमादाय तत्र तत्र विचार्य क्रमेण **जीवंधर**निकटमागत्य **चन्द्रोदय–सूर्योदययो**र्मध्ये कः श्लाघ्य इति प्रच्छां चक्रतुः ।' इति जी. च. का.

'तद्वचनसमाकर्णनेन निर्वर्ण्य चूर्णे, तूर्णमसौ गुणज्ञः सगुणमिदं **गुणमालिका**चेटिकायाश्चूर्णमित्यवर्णयत् ।' इति ग. चि. म.

श्लो. १९–२०.

'சுண்ண நலலன சூழ்ந்தறிந்தெங்களுக்
கண்ணல் கூறடியேங்குறை யென்றலுங்
கண்ணிற் கண்டிவை நல்ல கருங்குழல்
வண்ணமாலையி னீரேனக் கூறினன்.'

ஜீவகசிந்தாமணி.

श्लो. २१. अन्यैरपि, अत्र अपरिगृहीयाम् । पृथग्जनैरित्यर्थः । तैर्यदुक्तं तदेव त्वयाप्युक्तं विनैव निदर्शनम् । भवांस्तैरेव सहाध्यैष्ट किम् । अविशेषदर्शित्वादिति भावः ।

'श्रुत्वा तद्वचनं **सुरमञ्जरी**परिचारिका परिकुपितहृदया सती भवदादिष्टं

चूर्णयोरलिभिः स्वामी गुणदोषावसाधयत् ।
निर्विवादविधिर्नो चेन्नैपुण्यं नाम किं भवेत् ॥ २२ ॥
आकालिकतया दुष्टं चूर्णमन्यदवर्णयत् ।
न ह्यकालकृतं कर्म कार्यनिष्पादनक्षमम् ॥ २३ ॥

---

वैशिष्ट्यं विशेषदृष्टेः प्राक्स्याचेत्कथमवगन्तव्यम् । परोऽपि जनः पृष्ट एवमन्यथा व्याचष्टे स्म । किमध्यैष्ट भवानप्यमीभिरेवम् । ननु **जीवक** एव जीवलोके विवादपदनिर्णयीत्याकर्ण्य खलु भवति तिष्ठावहे । इत्यभाषिट ।' इति ग. चि. म.

'மற்றிம்மாநகர் மாந்தர்களியாவரு
முற்று நாறியுங்கண்டு முணர்ந்திவை
பொற்ற சுண்ணமெனப்புசழ்ந்தார் நம்பி
கற்றதும்மவர் தங்களோடே கொலோ.

ஐயனே யறியும்மென வந்தனம்
பொய்யதன்றிப் புலமை நுணுக்கி நீ
நொய்திற்றேர்ந்துறை நூற்கடலென்றுதங்
கையிஞற்றேழுதார் கமழ் கோதையர்.'

*ஜீவகசிந்தாமணி.*

**श्लो. २२.** ' * * * तत्र **जीवन्धरेश्वरः** ।
प्रत्ययः कोऽस्य चेद्व्यक्तं दर्शयामीति तद्द्वयम् ।
अवष्टभ्य स्वहस्ताभ्यां विचिक्षेप ततो द्रुतम् ॥

**चन्द्रोदय**मलिव्रातो गन्धोत्कर्षात्परीतवान् ।
दृष्ट्वा सर्वेऽपि तत्रस्थास्तत्तमेवास्तुवन्विदः ॥' इत्युत्तरपुराणे ।

**श्लो. २३.** आकालिकतया,— समानकाल आद्यन्तावस्य, आकालिकम् । अकालभवत्वात् उत्पत्त्यनन्तरविनाशीत्यर्थः । अकालश्च चूर्णसंयुक्तावुक्तेतरकालो वर्षासमयः । 'आकालिकडाद्यन्तवचने' इति समानकालादिकट्प्रत्ययः । प्रकृतेराकाल आदेशश्च निपातितः । आकालिकस्य भावः आकालिकता, तया ।

'अवर्णयच्चायमभियुक्तश्चूर्णयुक्तावुक्तेतरकालकरणादासीदसुरभित्वं **सुरमञ्जरी**चूर्णस्येति ।' इति ग. चि. म.

कुमारादथ कुट्टन्यौ नुत्वा नत्वा च निर्गते ।
निर्विवादं वितन्वाना न स्तुत्याः केन भूतले ॥ २४ ॥

तत्रासीत्सुरमञ्जर्या विरागस्यैव कारणम् ।
न ह्यत्र रोचते न्यायमीर्ष्यादूषितचेतसे ॥ २५ ॥

प्रार्थिताप्यकृतस्नाना सत्वरं **सुरमञ्जरी** ।
न्यवर्तिष्ट महारोषादीर्ष्या हि स्त्रीसमुद्भवा ॥ २६ ॥

**जीवकाद**परान्नेक्षे पुरुषानिति संविदा ।
कन्यागृहमथ प्रापन्न हि भेद्यं मनः स्त्रियाः ॥ २७ ॥

सख्यां तथैव यातायां **गुणमाला** शुशोच ताम् ।
न ह्यनिष्टेष्टसंयोगवियोगाभमरुन्तुदम् ॥ २८ ॥

गन्धसिन्धुरतो भीतिरासीदथ पुरौकसाम् ।
विपदोऽपि हि तद्भीतिर्मूढानां हन्त बाधिका ॥ २९ ॥

---

**श्लो. २४** कुट्टन्यौ, चेट्यौ । 'चुन्दी कुट्टनी शंभली समाः । पोटा वोटी च चेटी च दासी च कुटहारिका ।' इति हेमः ।

'ततः कुमारं कुरुवंशवीरं नत्वा च नुत्वा विनिवृत्य चेट्यौ ।
स्वस्वामिनीसंनिधिमेत्य वेगाद्विज्ञापयामासतुरेवमेव ॥' इति जी. च का.

**श्लो. २५.** तत्,– **सुरमञ्जर्या**श्चूर्णं दुष्टमिति **जीवन्धरेण** वर्णनम् ।

**श्लो. २५–२७.** 'ततः पराभवजनितदुरासदेर्ष्याकलुषितचेतना **सुरमञ्जरी** सख्या **गुणमालया** बहुधा प्रार्थिताकृतस्नानैव निवृत्य **जीवकाद**परं न पश्यामीति निश्चस्य कृतसंधाबन्धा रोषान्धा कन्यागारं प्रविवेश ।' इति जी.च का ।

**श्लो. २८.** तथैव, स्नानमकृत्वैव । अनिष्टेष्टसंयोगवियोगाभम् ,— अनिष्टसंयोगः इष्टवियोगश्च ताभ्यां सदृशम् ।

**श्लो. २९.** गन्धसिन्धुरतः, गन्धहस्तिनः । 'यस्य गन्धं समाघ्राय न तिष्ठन्ति प्रतिद्विपाः । स वै गन्धगजो नाम नृपतेर्विजयावहः ॥' इति मुद्राराक्षस-

परिजनस्तु तं पश्यन्गुणमालामथात्यजत् ।
न हि सन्तीह जन्तूनामपाये सति बान्धवाः ॥ ३० ॥

कृत्वा तां पृष्ठतो धात्री काचिदस्थाद्दयावहम् ।
हतायां मय्यतः पूर्वं कन्येयं हन्यतामिति ॥ ३१ ॥

समदुःखसुखा एव बन्धवो ह्यत्र बान्धवाः ।
दूता एव कृतान्तस्य द्वन्द्वकाले पराङ्मुखाः ॥ ३२ ॥

स्वामी परिणतं वीक्ष्य करिणं तं न्यवारयत् ।
स्वापदं न हि पश्यन्ति सन्तः पारार्थ्यतत्पराः ॥ ३३ ॥

यत्र क्वापि हि सन्त्येव सन्तः सार्वगुणोदयाः ।
क्वचित्किमपि सौजन्यं नो चेल्लोकः कुतो भवेत् ॥ ३४ ॥

---

व्याख्याने । विपदोऽपि, आपदोऽपि । तद्भीतिः, तस्या आपदो भीतिः । आपदागामिनीति मनसिकृत्य या भीतिः सेत्यर्थः । अत्रायं गन्धसिन्धुः **काष्ठाङ्गारस्येति** बोध्यम् ।

**श्लो. ३१.** धात्री काचित्पूर्वं मयि हतायां सत्यामत इयं कन्या हन्यतामिति तां पृष्ठतः कृत्वा दयावहमस्थादित्यन्वयः । अतः, अव्यवहितोत्तरकाल इत्यर्थः । कश्चिद्धात्रीजनः समसुखदुःखतया मां हत्वा सा हन्यतामनेन गन्धसिन्धुरेणेति गुणमालायाः पुरस्तात्स्थित इत्यर्थः ।

'प्रयान्तु ममासवः प्रागेतन्मृतिप्रेक्षणादिति पृष्ठीकृत्य तां बिम्बोष्ठीं बद्धाञ्जलिः कुञ्जरस्य पुरस्तादस्थात् ।' इति ग. चि. म.

**श्लो. ३२.** 'तन्मित्रमापदि सुखे च समक्रियं यत्' इति भर्तृहरिः । द्वन्द्वकाले, आपत्काले ।

**श्लो. ३३.** परिणतं, तिर्यग्दन्तप्रहारिणम् । 'तिर्यग्दन्तप्रहारश्च गजः परिणतो मतः ।' इति हलायुध । परेषामर्थ एवार्थो येषां ते परार्थाः, तेषां भावः पारार्थ्यम् । पारार्थ्ये तत्पराः आसक्ताः पारार्थ्यतत्पराः । 'तत्परे प्रसितासक्तौ' इत्यमरः ।

**श्लो. ३४.** सर्वस्मै हितः, सार्वः । 'सर्वपुरुषाभ्यां णढञौ' इति णः । सार्वो

परिवारोऽप्यथायासीदहंपूर्विकया स्वयम् ।
स्वास्थ्येह्यदृष्टपूर्वाश्च कल्पयन्त्येव बन्धुताम् ॥ ३५ ॥

अन्योऽन्यदर्शनादासीत्कामः कन्याकुमारयोः ।
दुःखस्यानन्तरं सौख्यं ततो दुःखं हि देहिनाम् ॥ ३६

अशान्तस्वान्तसंतापा निशान्तं प्राप सा पुनः ।
नो चेद्विवेकनीरौघो रागाग्निः केन शाम्यति ॥ ३७ ॥

क्रीडाशुकं च प्राहैषीत्सविधे स्वामिनः पुनः ।
योग्यायोग्यविचारोऽयं रागान्धानां कुतो भवेत् ॥ ३८ ॥

चाटुं प्रायुङ्क कीरोऽपि तं पश्यन्स्वेष्टसिद्धये ।
एतादृशेन लिङ्गेन परलोको हि साध्यते ॥ ३९ ॥

विषयेषु समस्तेषु कामं सफलयन्सदा ।
**गुणमालां** जगन्मान्यां जीवयञ्जीवताच्चिरम् ॥ ४० ॥

---

गुणोदयो येषां ते, सार्वगुणोदयाः ।

**श्लो. ३५.** अहंपूर्विकया, अहं पूर्वमहं पूर्वमिति धावनक्रियया । अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम् ।' इत्यमरः ।

**श्लो. ३६.** कामः, रत्युद्देश्यकः प्रेमबन्धः ।

'सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च ॥' इत्यन्येऽपि ।

**श्लो. ३७.** स्वान्तम्, मनः । निशान्तम् गृहम् । विवेकनीरौघः, – विवेकः, सम्यक्ज्ञानम्; तदेव नीरौघः, जलप्रवाहः । रागाग्निः, विषयाभिलापरूपोऽग्निः ।

**श्लो. ३८.** योग्येति–'कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।'

इति मेघसंदेशे. १ स ५ श्लो.

**श्लो. ३९.** चाटुम्, मधुरां वाचम् । लिङ्गेन, चिह्नेन ।

**श्लो. ४०.** 'जीवतात्' इति लोटि मध्यमपुरुषैकवचनम् ।

अप्रतिमरुपगुणशालिनीं सर्वजनश्लाघनीयां त्वदायत्तजीवितां **गुणमालां**

इत्याशिषा कुमारोऽपि तत्संदेशाच्च पिप्रिये ।
इष्टस्थाने सती वृष्टिस्तुष्टये हि विशेषतः ॥ ४१ ॥
प्रतिसन्देशमप्येष कीराय प्रत्यपादयत् ।
प्रेक्षावन्तो वितन्वन्ति न ह्युपेक्षामपेक्षिते ॥ ४२ ॥
मुमुदे **गुणमाला**पि दृष्ट्वा पत्रेण पत्रिणम् ।
स्वस्यैव सफलो यत्नः प्रीतये हि विशेषतः ॥ ४३ ॥
पितरावेतदाकर्ण्य मुमुदाते भृशं पुनः ।
दुर्लभो हि वरो लोके योग्यो भाग्यसमन्वितः ॥ ४४ ॥
अथामुष्यायणौ कौचिन्नीतौ **गन्धोत्कटा**न्तिकम् ।
न हि नीचमनोवृत्तिरेकरूपा स्थिता भवेत् ॥ ४५ ॥

---

परिगृह्य तया सह विषयसुखोपभोगेन तृतीयपुरुषार्थप्रयोजनं साधयंश्चिरं जीव । इत्येकोऽर्थः । कल्याणगुणस्त्वं स्वगुणान्सदा संरक्षन् समीहितसिद्धिं लभमानश्चिरं जीव । इत्यपरोऽर्थः ।

**श्लो. ४४.** वरः, उपयन्ता ।

'तदवस्थामुपलभ्य भृशं प्रीणन्तौ गुणमालैव सत्यमियं **गुणमाला** यदियमपहस्तितास्थानगतास्था सर्वथा योग्ये भाग्यादृते दुर्लभे वल्लभबुद्धिं बध्नातीति स्फारमुपलाल्य दुहितरं तत्कल्याणपरायणावभूताम् ।' इति ग. चि. म.

'तादिदं वृत्तमवेत्य कन्यकायाः
पितराविङ्गितचेष्टितादिभिश्च ।
मुमुदाते स्म वरो हि योग्यभाग्य-
प्रथितो दुर्लभ एव भोभवीति ॥' इति जी. च. का.

**श्लो. ४५.** आमुष्यायणौ, सद्वंशोद्भवौ । अमुष्याप्रत्यक्षीकृतस्यापि सद्वंशत्वेन सच्चरितत्वेन च प्रख्यातस्यापत्यं पुमानामुष्यायणः । नडादित्वात् फक् । षष्ठ्या अलुक् । 'स्यादामुष्यायणोऽमुष्य पुत्रः प्रख्यातवप्तृकः । कुल्यः कुलीनोऽभिजातः कौलेयकमहाकुलौ' इति हेमः ।

अनुमेने तयोर्वाक्यं श्रुत्वा **गन्धोत्कटो**ऽपि सः ।
अदोषोपहतोऽप्यर्थः परोक्त्या नैव दूष्यते ॥ ४६ ॥

सुतां **विनयमालाया गुणमालां** यथाविधि ।
दत्तां **कुबेरमित्रेण** परिणिन्येऽथ **जीवकः** ॥ ४७ ॥

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्रचूडामणौ गुणमालालम्भो नाम चतुर्थो लम्बः ।

## पञ्चमो लम्बः ।

अथ व्यूढामिमां मेने स कुमरोऽतिदुर्लभाम् ।
प्रयत्नेन हि लब्धं स्यात्प्रायः स्नेहस्य कारणम् ॥ १ ॥

नादत्त कबलं दन्ती स्वामिकुण्डलताडितः ।
न हि सोढव्यतां याति तिरश्चां वा तिरस्कृतिः ॥ २ ॥

**काष्ठाङ्गार**स्तदाकर्ण्य चुकोप स्वामिने भृशम् ।
सर्पिष्पातेन सप्तार्चिरुदर्चिः सुतरां भवेत् ॥ ३ ॥

---

**श्लो.** ४६. तयोः, आमुष्यायणयोः । अदोषोपहतः, दोषैरबाधितः ।

**श्लो.** १. व्यूढां, परिणीताम् । दुर्लभाम्,— कृच्छ्रेण लभ्यत इति दुर्लभा, ताम् । 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' । कृच्छ्रं दुःखं दुर्गेऽर्थः ।

**श्लो.** २. **काष्ठाङ्गार**स्याशनिवेगनाम्नि गन्धसिन्धुरे कृत्तशृङ्खले **गुणमालायाः** स्यन्दनं प्रति धावति, **जीवंधर**स्तं बहुधायास्य स्वकुण्डलेन दन्तयोर्मध्ये संताड्य प्रकृतिमानीय हेलयालानबन्धनं प्रापितवानिति पूर्वस्मिँल्लम्बके जीवंधरचम्पूकाव्ये गद्यचिन्तामणौ च प्रस्तावितो विषयोऽत्रानुसन्धेयः । तिरश्चाम्, तिर्यक्प्राणिनाम् ।

'स गुणमालोपद्रवकरः करी तत्कुण्डलाहतिजातवैलक्ष्यः प्रक्षीणतनुरतनुपरीतापपरीतमना महामात्रैर्मन्दितायत्नेन यन्त्रा सानुनयं साक्षेपमर्प्यमाणमतीव स्वादिष्ठमपि नादत्ते कबलम् ।' इति ग. चि. म.

**श्लो.** ३. सर्पिष्पातेन,– 'नित्यं समासेऽनुत्तरपदस्थस्य' इति विसर्गस्य षः ।

सङ्गादनङ्गमालाया विजयाच्च वनौकसाम् ।
वीणाविजयतश्चास्य कोपाग्निः स्थापितो हृदि ॥ ४ ॥

गुणाधिक्यं च जीवानामाधेरेव हि कारणम् ।
नीचत्वं नाम किं नु स्यादस्ति चेद्गुणरागिता ॥ ५ ॥

उपकारोऽपि नीचानामपकाराय कल्पते ।
पन्नगेन पयः पीतं विषस्यैव हि वर्धनम् ॥ ६ ॥

हस्तग्राहं ग्रहीतुं स कुमारं प्राहिणोद्बलम् ।
मूढानां हन्त कोपाग्निरस्थानेऽपि हि वर्धते ॥ ७ ॥

---

श्लो. ४. **अनङ्गमाला** नाम वारविलासिनी । प्राप्तयौवनाऽनन्यपूर्वा च सा स्वस्यामासक्तं **काष्ठाङ्गार**मवमत्य **जीवक**मभिलषन्ती तेन सह संगता । वनौकसां विजयात्,— गोधनावस्कन्दिनां व्याधानां विजयादित्यर्थः ।

'तदेतन्निशम्य विशांपतिर्विशालक्रोधानलं वनौकःसङ्घविजयेन संजातं वल्लकीविजयेन पल्लवितमनङ्गमालासङ्गेन संदीपितं शुण्डालपतिशिरोमण्डलकुण्डलताडनेन जाज्वल्यमानं कुमारनिकारेण शिशमयिषुः **काष्ठाङ्गारः** संगरे भङ्गुरं कुमारं हस्तग्राहं गृहीष्यामिति **मथन**प्रमुखान्नियोज्य च गजतुरगरथपादातशबलेन बलेन सह प्राहैषीत् ।' इति जी. च. का.

श्लो. ६. 'उपकारोऽपि नीचानामपकाराय वर्तते ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥' इति पञ्चतन्त्रे.

श्लो. ७. हस्तग्राहं ग्रहीतुम्, हस्तेन ग्रहीतुमित्यर्थः । 'हस्ते वर्तिग्रहोः' इति णमुल् । कषादित्वाद्ग्रहोऽनुप्रयोगश्च ।

श्लो. ४–७. 'स च शबरचारभटशूरगृहीतगोधनपुनरानयनप्रकटितपराक्रमपाटवाहितेन निजवारवामलोचनावर्गान्तरङ्गीभवदनङ्गमालाङ्गीकरणप्ररूढेन गन्धर्वदत्तापरिणयनसमयसंजातपरिभवपरिणतेन निजाधोरणनिवेदितवारणाहतिश्रवणसमीरसंधुक्षितेन स्फुटितजपाकुसुमपाटलनयनप्रभापटलच्छलादतिप्रभूततया हृदयादपि बहिर्निर्गच्छता तुच्छेतरेण कोपहुतवहेन * *, प्राविष्कृतभैरवाकृतिः परिसरवर्तिनः

कुमारावसथं पश्चात्तत्सैन्यं पर्यवारयत् ।
मृगाः किं नाम कुर्वन्ति मृगेन्द्रं परितः स्थिताः ॥ ८ ॥

प्रारेभे स कुमारोऽपि प्रहर्तुं रोषतश्चमूम् ।
तत्त्वज्ञानजलं नो चेत्क्रोधाग्निः केन शाम्यति ॥ ९ ॥

न्यरौत्सीत्तस्य संनाहमथ **गन्धोत्कटः** शनैः ।
अलङ्घ्यं हि पितुर्वाक्यमपत्यैः पथ्यकाङ्क्षिभिः ॥ १० ॥

पश्चाद्बद्धममुं पश्चादसौ **गन्धोत्कटो** व्यधात् ।
न हि वारयितुं शक्यं पौरुषेण पुराकृतम् ॥ ११ ॥

दृष्ट्वापि तं तथाभूतं हन्तुमाह स दुर्मतिः ।
सतां हि प्रह्वता शान्त्यै खलानां दर्पकारणम् ॥ १२ ॥

**काष्ठाङ्गारं** कुमारोऽयं गुरुवाक्येन नावधीत् ।
न हि प्राणवियोगेऽपि प्राज्ञैर्लङ्घ्यं गुरोर्वचः ॥ १३ ॥

यक्षेण तत्क्षणे स्वामी स्मृतेनादायि कृत्यवित् ।
सचेतनः कथं नु स्यादकुर्वन्प्रत्युपक्रियाम् ॥ १४ ॥

अतिमात्रशुचा लोकः पुनरेवमचिन्तयत् ।
गुणज्ञो लोक इत्येषा किंवदन्ती हि सूनृतम् ॥ १५ ॥

---

पुरुषानादिक्षदानीयतामनेन क्षणेन दुरात्मा **जीवक** इत्यारूढकोपकाष्ठः **काष्ठाङ्गारः** ।' इति ग. चि. म.

श्लो. १०. न पतन्ति पितरोऽनेनेत्यपत्यम् ।

श्लो. १२. आहेति तिङन्तप्रतिरूपकमव्ययम् । 'अस्त्याह कालसामान्ये तिङन्तप्रतिरूपकम् ।' इति त्रिकाण्डशेषः । हन्तुमाह, हन्तुमादिष्टवानित्यर्थः ।

'काष्ठाङ्गारस्तु * * समक्षमवस्थितानारक्षकाध्यक्षानस्य पराक्रममर्दीक्षस्य क्षेपीयः क्षपयतासूनिति सरोषमभाषत ।' इति ग. चि म.

श्लो. १४. यक्षेण, सारमेयचरेण यक्षेन्द्रेण सुदर्शनेनेत्यर्थः ।

अतिलोकमिदं शाठ्यं काष्ठाङ्गारस्य दुर्मतेः ।
एतावदेव किं शाठ्यं स्वामिद्रोहादबिभ्यतः ॥ १६ ॥
समवर्त्यपि दुर्वृत्तिरासीदणकभूपवत् ।
न ह्यसारतया हन्त सोऽपि गृह्णाति दुर्जनान् ॥ १७ ॥
वारि हंस इव क्षीरं सारं गृह्णाति सज्जनः ।
यथाश्रुतं यथारुच्यं शोच्यानां हि कृतिर्मता ॥ १८ ॥
हेत्वन्तरकृतोपेक्षे गुणदोषप्रवर्तिते ।
स्यातामादानहाने चेत्तद्धि सौजन्यलक्षणम् ॥ १९ ॥
युक्तायुक्तवितर्केऽपि तर्करूढविधावपि ।
पराङ्मुखात्फलं किं वा वैदुष्याद्वैभवादपि ॥ २० ॥

---

श्लो. १६. लोकोऽचिन्तयदिति पूर्वत्रोक्तम् । तमेव चिन्ताप्रकारमाह चतुर्भिः श्लोकैः ।

श्लो. १७. समं वर्तितुं शीलमस्येति समवर्ती, यमः; 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः । अणकभूपवत्, निकृष्टराजवत् । 'पापाणके कुत्सितैः' इति परनिपातः । 'कुपूयकुत्सितावद्यगर्ह्यखेटाणकाः समाः ।' इत्यमरः ।

**श्लो. १८.** वारि जले । शोच्यानाम्, शोचनीयानां, खलानामित्यर्थः ।

**श्लो. १९.** हेत्वन्तरेषु कृता उपेक्षा ययोस्ते, हेत्वन्तरकृतोपेक्षे । गुणदोषाभ्यां प्रवर्तिते, गुणदोषप्रवर्तिते । आदानं च हानं च, आदानहाने । कारणान्तरसापेक्षत्वमन्तरेण गुणैकपक्षपातितया गुणग्रहणं तथा तद्विपरीते दोषे वैरस्येन तन्निरसनं च सौजन्यस्य लक्षणमित्यर्थः ।

**श्लो. २०.** युक्तायुक्तवितर्के,– युक्तं चायुक्तं च युक्तायुक्ते तयोर्वितर्के विचारे । अपिः समुच्चयार्थः । तर्करूढविधौ,–तर्कैस्तादृशयुक्तायुक्तविचारैः, रूढः संजातमूलः जातप्रतिष्ठइत्यर्थः, तस्मिन्विधौ विधाने । पूर्ववदपिः समुच्चयार्थः । पराङ्मुखात्, विमुखात् । वैदुष्यात्, विविधप्रयाससाध्यशास्त्रावगमजनितपाण्डित्यात् । वैभवात्, ऐश्वर्यात् । अपिः समुच्चयार्थः । किं वा फलम्, न किमपि प्रयोजनमित्यर्थः ।

इत्यूहादाधिमापन्ने लोके तेऽपि युयुत्सवः ।
सखायः सानुजाः सर्वे पश्चात्तापमुपागमन् ॥ २१ ॥

स्मरन्तौ मुनिवाक्यस्य सप्राणौ पितरौ स्थितौ ।
वितथे मुनिवाक्येऽपि प्रामाण्यं वचने कुतः ॥ २२ ॥

स्वामिनो न विषादो वा प्रसादो वा तदाभवत् ।
किंतु पूर्वकृतं कर्म भोक्तव्यमिति मानसम् ॥ २३ ॥

अथ **चन्द्रोदया**द्वानपर्वतस्थं स्वमन्दिरम् ।
यक्षेन्द्रः स्वामिनं नीत्वा कृतवानभिषेचनम् ॥ २४ ॥

विपञ्च संपदे पुण्यात्किमन्यत्तत्र गण्यते ।
भानुर्लोकं तपन्कुर्याद्विकासश्रियमम्बुजे ॥ २५ ॥

पयोवार्धिपयःपूरैरभिषिच्यायमब्रवीत् ।
पवित्रोऽसि पवित्रं मां श्वानं यत्कृतवानिति ॥ २६ ॥

---

**श्लो. २१.** सानुजाः, अनुजेन **नन्दाढ्येन** सहिताः ।

**श्लो. २२.** मुनिवाक्यस्य स्मरन्तौ,— 'अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी ।

"अथ **सुनन्दाम्,** 'अलं संतापेन, संस्मर पुरा चर्यार्थमागतेन तपोधनेन सविस्तरमुदीरितां कुमाराभिवृद्धिशंसिनीं कथाम्, अवितथवचसो हि मुनयः' इति सान्त्वयति समवगतसुतोदन्तप्रबन्धे **गन्धोत्कटे** * * कृतज्ञः स कुमारोऽपि * * **सुदर्शन**नाम्नो यक्षस्य सस्मार ।" इति ग. चि. म.

**श्लो. २३.**

'விலங்கிவில்லுமிழும்பூணன் விழுச்சிறைப்பட்டபோழ்து
மலங்கலங்தாரிஞன் வந்தருஞ்சிறைவிடுத்தபோழ்தும்
புலம்பலுமகிழ்வுநெஞ்சிற் போலிதலுமின்றிப்பொன்ஞர்ந்
துலங்கலந்துயர்ந்ததோளா ஞழ்விஇனயென்றுவிட்டான்.'

ஜீவகசிந்தாமணி.

**श्लो. २६.** यत् श्वानं मां पवित्रीकृतवानसि तत् त्वं पवित्रोऽसीत्यन्वयः । प-

कामरूपविधौ गाने विषहाने च शक्तिमत् ।
यक्षेन्द्रः स्वामिने पश्चान्मन्त्रत्रयमुपादिशत् ॥ २७ ॥
एकहायनमात्रेण धुरि राज्ञां प्रवेक्ष्यसि ।
मोक्षस्यैव पवित्र त्वं पश्चादिति च सोऽब्रवीत् ॥ २८ ॥
तथा संभाव्यमानस्य स्वामिनस्तेन सन्ततम् ।
देशान्तरादिदृक्षाभूद्भाव्यधीनं हि मानसम् ॥ २९ ॥

---

योवार्धिपयःपूरैः, दुग्धसागरपयःप्रवाहैः ।

'अकार्षीच्च तत्र हर्षोत्फुल्लमुखः शतमखसदनातिशायिसौधाभ्यन्तरस्थापितभद्रासनमध्यमध्यासीनस्य **जीवकस्वामिनः** स्वभर्तृमुखपरिज्ञातकुमारमहोपकारिताकारितात्यादरैर्दारैः सार्धं पयोवार्धिपूरैरभिषेकम् । व्याहार्षीच कुमार मां विश्वदूषणपात्रे भाषणगात्रे स्थितमेवं पवित्रीकृतवतस्ते पवित्रकुमार इति भवितव्यं नाम्नेति ।' इति ग. चि. म.

'திங்களைத்தெளித்திட்டன்ன பாற்கடற்றிரைசெய்தெண்ணீர்
வெங்கள்விட்டலர்ந்தகண்ணி விண்ணவனுரிமைதன்னுன்
மங்கலவகையினட்டி மணியணிகலங்கள்சேர்த்திப்
பங்கயநெடுங்கண்ணனைப் பவித்திரகுமரனென்றான்.
* * *
பிணிக்குலத்தகவயிற்பிறந்தநோய்கெடுத்
தணித்தகையுடம்பெனக்கருளிநோக்கினன்
கணிப்பருங்குணத்தோகைக்காளையென்றனன்
மணிக்கலத்தகத்தமிர்தனையமாண்பினன்.'

*ஜீவகசிந்தாமணி.*

**श्लो. २७.** विषहाने, विषनिवारणे ।

'अदाच्च तस्मै मा स्म कुरुथाः कुरुकुलपते तव प्रेष्यस्य प्रार्थनाकदर्थनेनावज्ञामिति याच्ञापूर्वकं सर्वविषापहरणे गानविद्यावैशारद्यकरणे कामरूपित्वकल्पनेऽप्यनल्पशक्तिकममन्दादरान्मन्त्रत्रयम् ।' इति ग. चि. म.

**श्लो. २७–२९.** 'ततः क्रमेण यक्षाध्यक्षेणोपदिष्टं कामरूपविधानगानविषहानशक्तियुक्तं चिरत्नं मन्त्ररत्नं बहु मन्यमानः, एकहायनमात्रेण राज्यलक्ष्मीकटा-

मनीषितं हितान्वेषी ज्ञात्वा तस्य मनीषिणः ।
अनुमेने स देवोऽपि त्रिकालज्ञा हि निर्जराः ॥ ३० ॥

इदंतया पथोदन्तमुपादिश्याथ संमतः ।
**सुदर्शनेन** सोऽयासीद्धितकृत्त्वं हि मित्रता ॥ ३१ ॥

एकाकी व्यहरत्स्वामी निर्भयोऽयमितस्ततः ।
न हि स्ववीर्यगुप्तानां भीतिः केसरिणामिव ॥ ३२ ॥

एकाकिनोऽपि नोद्वेगो वशिनस्तस्य जातुचित् ।
विक्रिया हि विमूढानां संपदापल्लवादपि ॥ ३३ ॥

अरण्ये क्वचिदालोक्य वनदावेन वारितान् ।
दह्यमानानसौ मह्यस्त्रातुमैच्छदनेकपान् ॥ ३४ ॥

धर्मो नाम कृपामूलः सा तु जीवानुकम्पनम् ।
अशरण्यशरण्यत्वमतो धार्मिकलक्षणम् ॥ ३५ ॥

ववृषुर्वारिदास्तत्र तावतैव सगर्जिताः ।
सुकृतीनामहो वाञ्छा सफलैव हि जायते ॥ ३६ ॥

---

क्षान्प्रवेक्ष्यसीति तद्वचनेन संतुष्टः, संततं प्रश्रयवशंवदैर्यक्षैः संभाव्यमानः कुरुवीरः, कदाचिद्देशान्तरदिदृक्षामिङ्गितैर्यक्षाध्यक्षं ज्ञापयामास ।' इति जी. च. का.

**श्लो. ३०–३१. सुदर्शनेन** संमतः, **सुदर्शनयक्षेण** याहीत्यनुज्ञात इत्यर्थः ।
'मनीषितं तस्य कुरूत्तमस्य ज्ञात्वा मनीषी स हि यक्षराजः ।
मार्गस्य भङ्गीं स्फुटतोऽभिधाय संप्रापयामास तदद्रिसीमाम् ॥'
इति जी. च. का.

**श्लो. ३३.** वशिनः, जितेन्द्रियस्य । उद्वेगः, उद्भ्रमः । 'उद्वेग उद्भ्रमः' इत्यमरः । संपदापल्लवात्, संपदापच्च संपदापदौ तयोर्लवः लेशः तस्मात् ।

**श्लो. ३४.** 'अनेकपकुलं तत्र दह्यमानं दवाग्निना ।
त्रातुमैच्छद्दयापूरजलधिः कुरुकुञ्जरः ॥' इति जी. च. का.

**श्लो. ३६.** शोभनाः कृतयो येषां ते, सुकृतयः तेषां सुकृतीनाम्, पुण्यवताम् ।

अनेकपानसौ वीक्ष्य रक्षितानतृपत्तराम् ।
स्वयं त्वासीत्समः स्वामी स्वस्य बन्धविमोक्षयोः ॥ ३७ ॥

संपदापद्द्वये स्वेषां समभावा हि सज्जनाः ।
परेषां तु प्रसन्नाश्च विपन्नाश्च निसर्गतः ॥ ३८ ॥

ततस्तस्माद्विनिर्गत्य तीर्थस्थानान्यपूजयत् ।
सदसत्त्वं हि वस्तूनां संसर्गादेव दृश्यते ॥ ३९ ॥

अथ संभावयामास यक्षी सा धर्मरक्षिणी ।
धर्ममूर्तिममुं तत्र सम्यक्कशिपुदानतः ॥ ४० ॥

दैवतेनापि पूज्यन्ते धार्मिकाः किं पुनः परैः ।
अतो धर्मरताः सन्तु शर्मणे स्पृहयालवः ॥ ४१ ॥

ततः **पल्लवदेशस्थां चन्द्राभाख्यां** क्रमात्पुरीम् ।
भेजे शुभनिमित्तेन सनिमित्ता हि भाविनः ॥ ४२ ॥

राज्ञो **धनपतेः** पुत्रीमहिदष्टामजीवयत् ।
निर्हेतुकान्यरक्षा हि सतां नैसर्गिको गुणः ॥ ४३ ॥

**लोकपाल**स्तदालोक्य तज्ज्येष्ठस्तमपूजयत् ।
प्राणप्रदायिनामन्या न ह्यस्ति प्रत्युपक्रिया ॥ ४४ ॥

---

**श्लो. ३९–४०.** 'तत्र मानुषरूपिण्या यक्षिण्या परिचर्यमाणस्तीर्थस्थानानि पूजयन्क्रमेण कुरुमल्लः **पल्लवदेशा**नानशे ।' इति जी. च. का.

'तत्रत्यया जिनशासनरक्षियक्षिदेवतया सादरसंपादितकशिपुस्ततो विनिर्गत्य * * * **पल्लवदेश**व्यपदेशं देशमशिश्रियत् ।' इति ग. चि. म.

**श्लो. ४०.** कशिपुदानतः, अन्नवस्त्रादीनां प्रदानेन । 'कशिपु त्वन्नमाच्छादनं द्वयम् ।' इत्यमरः ।

**श्लो. ४१.** स्पृहयालवः, इच्छावन्तः । 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' इत्यालुच्प्रत्ययः ।

पूज्या अपि स्वयं सन्तः सज्जनानां हि पूजकाः ।
पूज्यत्वं नाम किं नु स्यात्पूज्यपूजाव्यतिक्रमे ॥ ४५ ॥
प्राज्ञेषु प्रह्वतावश्यमात्मवश्योचिता मता ।
प्रह्वतापि धनुष्काणां कार्मुकस्येव कामदा ॥ ४६ ॥
वपुर्वीक्षणमात्रेण निरणाय्यस्य वैभवम् ।
वपुर्वक्ति हि माहात्म्यं दौरात्म्यमपि तद्विदाम् ॥ ४७ ॥
अर्धराज्यं च कन्यां च पार्थिवः स्वामिने ददौ ।
पात्रतां नीतमात्मानं स्वयं यान्ति हि संपदः ॥ ४८ ॥
**तिलोत्तमा**सुतां पश्चा**ल्लोकपाल**समर्पिताम् ।
पर्यणैषीत्पवित्रोऽयं **पद्मा**ख्यां तां यवीयसीम् ॥ ४९ ॥

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्रचूडामणौ पद्मालम्भो नाम पञ्चमो लम्बः ।

## षष्ठो लम्बः ।

अथोपयम्य **पद्मां** तां रमयन्नप्ययात्ततः ।
असक्तो हि सुखं भुङ्क्ते कृतार्थोऽपि जनः कृती ॥ १ ॥
**पद्मा** तु तद्वियोगेन दुःखसागरसादभूत् ।
तत्त्वज्ञानविहीनानां दुःखमेव हि शाश्वतम् ॥ २ ॥

---

**श्लो. ४९.** 'प्राते च शुभमुहूर्ते जीवंधरस्वामी **धनपति**नरपतिना वारिधारापुरःसरं प्रतिपादितां **तिलोत्तमा**सुतां पद्मां पाणौ परिजग्राह।' इति जी. च. का.

**श्लो. १.** कृतार्थोऽपि कृती जनोऽसक्तः सन् सुखं भुङ्क्ते इत्यन्वयः ।

'अथैवं मनोरथदुरासदं सततं तया सारङ्गदृशा समं शमनुभवन्नपि विषयेष्वसक्ततामात्मनो विवरीतुमिव विजयासूनुर्विषयान्तरमन्तर्हित एव गन्तुमनाः समजनि ।' इति ग. चि. म.

**श्लो. २.** दुःखसागरसात्, दुःखसमुद्राधीना; 'तदधीनवचने' इति सातिप्रत्ययः।

लोकपालजनैर्नायं रोद्धुं शेके गवेषिभिः ।
प्रतिहन्तुं न हि प्राज्ञैः प्रारब्धं पार्यते परैः ॥ ३ ॥
सत्वरं गत्वरः स्वामी तीर्थस्थानान्यपूजयत् ।
पावनानि हि जायन्ते स्थानान्यपि सदाश्रयात् ॥ ४ ॥
सद्भिरध्युषिता धात्री संपूज्येति किमद्भुतम् ।
कालायसं हि कल्याणं कल्पते रसयोगतः ॥ ५ ॥
सदसत्संगमादेव सदसत्त्वे नृणामपि ।
तस्मात्सत्संगताः सन्तु सन्तो दुर्जनदूरगाः ॥ ६ ॥
याजंयाजमटन्नेव तीर्थस्थानानि जीवकः ।
क्रमेणारण्यमध्यस्थं तापसाश्रममाश्रयत् ॥ ७ ॥

---

तत्त्वज्ञानविहीनानाम्, सम्यग्ज्ञानरहितानां जनानाम् ।

श्लो. ३. गवेषिभिः, अन्वेषिभिः । प्रारब्धं, आरब्धं कार्यमित्यर्थः । प्राज्ञैः प्रारब्धं परैः प्रतिहन्तुं न पार्यत इत्यन्वयः ।

'लोकपालजनाः केचिच्चतुर्दिक्षु गवेषिणः ।
प्राज्ञा अपि कुमारस्य नाज्ञासिषुरिहागतिम् । इति जी. च. का.

श्लो. ४. गत्वरः, गमनशीलः; 'गत्वरश्च' इति क्वरप्प्रत्ययः । गमेरनुनासिकलोपोऽपि निपात्यते । सदाश्रयात्, महापुरुषसंबन्धात् ।

श्लो. ६. सदसदिति,– 'संसर्गजा दोषगुणा भवन्ति' इत्यर्थः ।

श्लो. ७. याजंयाजम्, संपूज्य संपूज्य । तीर्थस्थानानि, पुण्यक्षेत्राणि । 'तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः ।' इति हेमः ।

श्लो. ३–७. 'अथ पद्मावल्लभोऽपि पल्लवजनपदपतिचोदितजङ्गालजनव्रातेनाप्यविदित एव लङ्घयन्नलङ्घनीयमरण्याध्वानमभिवन्दिताखिलपुण्याजिनभवनतया पावनतामुल्लाघतां च नीतः पल्लववर्षसीम्नि नाम्ना चित्रकूटं विचित्रचारित्राश्रयं तापसाश्रममध्वश्रमपरिच्छेदाय शिश्रिये ।' इति ग. चि. म.

'तत्र तीर्थस्थानानि याजंयाजं सत्वरं गत्वरः कुरुवीरः * * पञ्चाग्निमध्यतपःप्रचण्डैस्तापसैर्मण्डितं * * तपोवनं ददर्श ।' इति जी. च. का.

असत्तपो विलोक्यासीदनुकम्पी तपस्विनाम् ।
निर्व्याजं सानुकम्पा हि सार्वाः सर्वेषु जन्तुषु ॥ ८ ॥
अतत्त्वज्ञेऽपि तत्त्वज्ञैर्भवितव्यं दयालुभिः ।
कूपे पिपतिषुर्बालो न हि केनाप्युपेक्ष्यते ॥ ९ ॥
तानप्यब्रूबु त्तत्त्वं तत्त्वज्ञः सोऽयमादरात् ।
भव्यो वा स्यान्न वा श्रोता परार्थ्यं हि सतां मनः ॥ १० ॥
न हिंस्यात्सर्वभूतानीत्यस्मिन्प्रवचने सति ।
तप्यध्वं किं बुधा यूयं हिंसामात्रफलं तपः ॥ ११ ॥
जलावगाहने लग्नाञ्जटायां काष्ठगानपि ।
नश्यतः पश्यतां जन्तून्पश्यताग्नौ पुनश्च्युतान् ॥ १२ ॥

---

श्लो. ८. निर्व्याजम्, प्रत्युपकारादिनिरपेक्षमित्यर्थः। सार्वाः, सर्वस्मै हिताः, परहितपरतन्त्रा इत्यर्थः । 'सर्वपुरुषाभ्यां णढञौ' इति णप्रत्ययः ।

श्लो १०. भवतीति भव्यः, साधुः, रत्नत्रयाविर्भवनयोग्य इत्यर्थः। 'भव्यगेय–' इत्यादिना कर्तरि निपातः । परस्मार्थः परार्थः, तस्मिन्साधु परार्थ्यम् ।

श्लो. ८–१०. 'असत्तपो वीक्ष्य कुरुप्रवीरः कृपानटीताण्डवरङ्गचित्तः ।
अबोधयत्ताञ्जिनधर्मसारमुपेक्षते कः पततो हि कूपे ॥'
इति जी. च. का.

श्लो. ११. प्रवचने, वेदवाक्ये। प्रोच्यत इति प्रवचनम्। 'कृत्यल्युटो बहुलम्'। 'व्याहरच्चायं परहितपरतन्त्रो मन्त्रायमाणं वचः । अयि तपोधना न हिंस्यात्सर्वभूतानीति विश्रुतां श्रुतिं विद्वांसोऽपि, किं हिंसानिदाने तपस्येकताना भवन्ति भवन्त इति ।' इति ग. चि. म.

'मुधा जटाजूटयुता हि यूयं निटालदेशे तपनेन तप्ताः ।
बुधास्तपो हिंसनजुष्टमेतत्कर्तुं सदा नार्हथ निष्फलत्वात् ॥' जी. च. का.

श्लो. १२. जलावगाहने जटायां लग्नान्, काष्ठगानपि पुनरग्नौ च्युतान्, पश्यतां (पुरतः) नश्यतो जन्तून् पश्यतेत्यन्वयः ।

पञ्चाग्निमध्यमस्थानं ततो नैवोचितं तपः ।
जन्तुमारणहेतुत्वादाजवञ्जवकारणम् ॥ १३ ॥

ततपो यत्र जन्तूनां संतापो नैव जातुचित् ।
तच्चारम्भनिवृत्तौ स्यान्न ह्यारम्भो विहिंसनः ॥ १४ ॥

आरम्भविनिवृत्तिश्च निर्ग्रन्थेष्वेव जायते ।
न हि कार्यपरार्चीनैर्मृग्यते भुवि कारणम् ॥ १५ ॥

नैर्ग्रन्थ्यं हि तपोऽन्यत्तु संसारस्यैव साधनम् ।
मुमुक्षूणां हि कायोऽपि हेयः किमपरं पुनः ॥ १६ ॥

ग्रन्थानुबन्धी संसारस्तेनैव न परिक्षयी ।
रक्तेन दूषितं वस्त्रं न हि रक्तेन शुध्यति ॥ १७ ॥

---

'जटालानां जटान्ते वो जटालग्ना हि जन्तवः ।
पश्यताग्नौ च्युताः पश्चान्नश्यन्ति बहवः क्षणात् ॥' इति जी. च. का.

'अदीदृशच्च दुर्दृशो जडाञ्जटाजालभ्रष्टजलावगाहनलग्नजलचरविसराणां विविधैधोविवरविसर्पत्सर्पादिजन्तूनामप्यमन्दविभावसौ दन्दह्यमनानां, नयनवतामसह्यं व्यसनम् ।' इति ग. चि. म.

श्लो. १३. आजवञ्जवकारणम्, संसारस्य हेतुः ।

श्लो. १४. तच्च, जन्तुसंतापविहीनं तपश्चेत्यर्थः। आरम्भनिवृत्तौ,— कृषिवाणिज्यादयो वृत्तिविशेषा आरम्भाः, तेषां विनिवृत्तौ सत्याम् । विहिंसनः, हिंसाविहीनः ।

श्लो. १५. निर्ग्रन्थेषु, यतिषु । 'मुमुक्षुः श्रमणो यतिः । वाचंयमो व्रती साधुरनगार ऋषिर्मुनिः । निर्ग्रन्थो भिक्षुः' इति हेमः ।

श्लो. १६. नैर्ग्रन्थ्यम्, यतिधर्मः । परित्याग इत्यर्थः ।

श्लो. १७. ग्रन्थानुबन्धी, रागादिदोषानुवर्ती ।

'வெண்ணிறத்துகிலினங்கண்வீழ்ந்துமாசாகிநின்ற
வொண்ணிறவுதிரந்தன்னையுதிரத்தாலொழிக்கலாமே
பண்ணிறக்கிளவியார்தம்பசையினாற்பிறந்தபாவங்
கண்ணிறமுலையினார்தங்கலவியாற்கழிக்கலாமே.'

ஜீவகசிந்தாமணி.

तत्त्वज्ञानविहीनानां नैर्ग्रन्थ्यमपि निष्फलम् ।
न हि स्थाल्यादिभिः साध्यमन्नमन्यैरतण्डुलैः ॥ १८ ॥
तत्त्वज्ञानं च जीवादितत्त्वयाथात्म्यनिश्चयः ।
अन्यथाधीस्तु लोकेऽस्मिन्मिथ्याज्ञानं हि कथ्यते ॥ १९ ॥

---

**श्लो. १८.** अतण्डुलैः, तण्डुलविहीनैः । अतण्डुलैरन्यैः स्थाल्यादिभिरन्नं न साध्यं हीत्यन्वयः ।

'तण्डुलस्य विरहे जलानलाद्यागमेऽपि सफलो न हि पाकः ।
तत्त्वबोधविगमे तथा तनोर्दण्डनेन सफला न तपस्या ॥' जी. च. का.

**श्लो. १९.** तत्त्वज्ञानम्, सम्यग्ज्ञानम् ।

"जैनमते जीवाजीवाख्ये द्वे तत्त्वे । तत्र बोधात्मको जीवः । अबोधात्मकस्त्वजीवः ॥

अपरे पुनर्जीवाकाशधर्माधर्मपुद्गलभेदाज्जीवाजीवयोरपरं प्रपञ्चमाचक्षते । एवं च जीवादीनि पञ्चतत्त्वानि ॥

तत्र जीवा द्विविधाः संसारिणो मुक्ताश्च । भवाद्भवान्तरप्राप्तिमन्तः संसारिणः । तेऽपि द्विविधाः । समनस्का अमनस्काश्च । शिक्षाक्रियालापादिसंज्ञा येषामस्ति ते संज्ञिनः समनस्काः । अमनस्का अपि त्रसस्थावरभेदाद्द्विविधाः । तत्र त्वग्रसनामात्रवन्तो द्वीन्द्रिया शङ्खगण्डोलप्रभृतयस्त्रसाः । पृथिवीजलतेजोवायुवनस्पतयः स्थावराः । एषु पञ्चसु स्थावरेषु वनस्पतीनामेवामनस्कजीवत्वम् । शिक्षाक्रियालापादिरूपसंज्ञाशून्यत्वे सतीन्द्रियवत्त्वात् । ननु वनस्पतीनां किमस्तीन्द्रियमितिचेत् स्पर्शनमित्यवेहि ॥ भवान्तरप्राप्तिविधुरा मुक्ता जीवाः ॥ अथाकाशो धर्माधर्मौ पुद्गलाश्चेत्येतेऽजीवस्यैव प्रपञ्चभूताः । तत्राद्यास्त्रयोऽनुमेया एव न कदापि प्रत्यक्षा भवन्ति ॥ स्पर्शरसवर्णवन्तः पुद्गलाः । ते द्विविधाः । अणुस्कन्धभेदात् । भोक्तुमशक्या अणवः । द्व्यणुकादयः स्कन्धाः । तत्र द्व्यणुकादिस्कन्धानां भेदादणव उत्पद्यन्ते । अण्वादीनां सङ्घातात् द्व्यणुकादय उत्पद्यन्ते । क्वचिद्भेदसङ्घाताभ्यां स्कन्धोत्पत्तिः । अत एव पूरयन्ति गलन्ति इत्यन्वर्थं नामधेयं पुद्गला इति ॥ ते च पृथिवी जलं तेजो वायुरिति भेदाच्चतुर्विधा इति बोध्यम् ॥

केचिज्जैना जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षाख्यानि सप्त तत्त्वानि कथयन्ति । तत्र जीवः संसारिमुक्तभेदेन द्विविधः पूर्वं निरूपितः । आकाशाद्यो

ह्यजीवा अपि पूर्वं निरूपिता एव । आस्रवो निरूप्यते । औदारिकादिकाया-दिचलनद्वारेणात्मनश्चलनं योगपदव्यपदेश्यमास्रवः । यथा सलिलावगाहि द्वारं नद्या-स्रवणकारणत्वादास्रव इति निगद्यते तथा योगप्रणालिकापि कर्मास्रवणकारणं भव-तीति योग आस्रवपदेन परिभाष्यते । यथा ह्यार्द्रं वस्त्रं समन्ताद्वातानीतं रेणु-जातमुपादत्ते तथा कषायजलार्द्र आत्मा योगवातानीतं कर्मलक्षणं रेणुजातमुपा-दत्ते। यथा वा निष्टप्तायःपिण्डः स्वस्मिन् क्षिप्तमम्भः समन्ताद्गृह्णाति तथैव कषायो-ष्णो जीवो योगानीतं कर्म समन्ताद्गृह्णातीति बोध्यम् ॥ कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः क्रोधो मानो माया लोभश्च ॥ सोऽयं योगपदवाच्य आस्रवो द्विविधः । शुभाशुभभेदात् । तत्राहिंसादिः शुभः काययोगः । सत्यमित-भाषणादिः शुभो वाग्योगः ॥ उक्तयोगद्वयाद्विरुद्धो हिंसानृतभाषणादिरशुभः काया-दियोगः । शुभयोगः पुण्यस्य मूलमशुभयोगस्तु पापस्य ॥

मिथ्यादर्शनाविरतिप्रमादकषायवशाद्योगवशाच्चात्मा सूक्ष्मैकप्रदेशावगाहिना-मनन्तानन्तप्रदेशानां पुद्गलानामाश्लेषणं यत्करोति सोऽयं बन्धः ॥ तत्र मिथ्याद-र्शनं वस्तुतत्त्वानिश्चयः । तच्च द्विविधम् । मिथ्याकर्मोदयान्नैसर्गिकं तत्त्वाश्रद्धानमे-कम् । परोपदेशजन्यं द्वितीयम् ॥ अविरतिर्नाम शब्दादिविषयेभ्य इन्द्रियाणामसंय-मनम् ॥ पुण्यकर्मस्वनुत्साहः प्रमादः ॥ कषाया उक्ताः ॥

आस्रवलक्षणं भवप्रवाहद्वारं संवृणोतीति संवरः । स च गुप्तिसमित्यादिरूपो जीवे प्रविशत्कर्मजातं प्रतिषेधति ॥ संसारकारणादात्मनो गोपनं गुप्तिः । सा चाशुभकर्मभ्यः कायवाङ्मनोनिग्रहरूपा ॥ समितिस्तु प्राणिपीडापरिहारेण सम्यगयनं गमनं सम्यग्वर्तनम् ॥

अर्जितस्य कर्मणः केशोलुञ्चनादितपःप्रभृतिभिर्निर्जरणं निर्जरासंज्ञकं तत्त्वम् । सा च निर्जरा द्विविधेति प्रोच्यते । यथाहुस्तत्त्वविदः । 'संसारबीजभूतानां क-र्मणां जरणादिह । निर्जरा संस्मृता द्वेधा सकामा कामवर्जिता ॥ स्मृता सकामा यमिनामकामा त्वन्यदेहिनाम् ।' इति ॥

निःशेषकर्मबन्धोच्छेदादसंगत्वेनावस्थानं मोक्षः ॥ ननु मुक्तानां कथमूर्ध्व-गतिर्भवतीति चेदित्थम् । यथा मृत्तिकाविलिप्तमलाबुद्रव्यं जलेऽधः पतति पुनर-पेतमृत्तिकाबन्धं सदूर्ध्वं गच्छति । तथा कर्मबन्धविनिर्मुक्त आत्मासंगत्वादूर्ध्वं गच्छति । बन्धमोक्षयोः कारणमुक्तं तत्त्ववेदिभिः । आस्रवो बन्धहेतुः स्यात्संवरो

आप्तागमपदार्थाख्यतत्त्ववेदनतद्रुची ।
वृत्तं च तद्द्वयस्यात्मन्यस्खलद्वृत्ति धारणम् ॥ २० ॥
इति त्रयी तु मार्गः स्यादपवर्गस्य नापरम् ।
बाह्यमन्यत्तपः सर्वं तत्त्रयस्यैव साधनम् ॥ २१ ॥
न च बाह्यतपोहीनमभ्यन्तरतपो भवेत् ।
तण्डुलस्यैव विक्लित्तिर्न हि वह्न्यादिकं विना ॥ २२ ॥

---

मोक्षकारणम् । इतीयमार्हती मुष्टिरन्यदस्याः प्रपञ्चनम् ॥" इत्यार्यविद्यासुधानिधौ.

श्लो. २०. आप्तः, यथार्थोपदेष्टा भ्रमादिशून्यो यथार्थज्ञाता; जिनेश्वर इत्यर्थः; 'देवाधिदेवबोधदपुरुषोत्तमवीतरागाप्ताः' इति हेमः । आगमः, आप्तोपज्ञातं शास्त्रम्; 'आगमस्त्वागते शास्त्रे' इति हेमः । पदार्थाः, जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षाः पापपुण्ये चेति नव पदार्थाः । तेषां तत्त्ववेदनम्, याथार्थ्यज्ञानम्, सम्यग्ज्ञानमित्यर्थः । तद्रुचिः, तेष्वाप्तागमपदार्थाख्येषु रुचिः स्पृहा सम्यक्त्वेन दर्शनम् । तद्द्वयस्य, तयोः सम्यग्दर्शनज्ञानयोर्द्वयोः । आत्मनि, जीवे । अस्खलद्वृत्ति, नियतवृत्ति यथा तथा । धारणम्, धरणम् । वृत्तम्, चारित्रम्, सम्यक्चारित्रमित्यर्थः ।

'जीवाजीवास्रवा बन्धसंवरावपि निर्जरा ।
मोक्षश्चेतीह तत्त्वानि सप्त स्युर्जिनशासने ।
बन्धान्तर्भाविनोः पुण्यपापयोः पृथगुक्तितः ।
पदार्था नव जायन्ते तान्येव भुवनत्रये ॥' इति धर्मशर्माभ्युदये ।

श्लो. २१. त्रयी, त्रितयम् । सम्यग्दर्शनज्ञानचारित्राणि त्रीणीत्यर्थः । 'त्रयी त्रिवेद्यां त्रितये' इति हेमः ॥ बाह्यं तपः षड्विधम् । अनशनम् (अवमोदर्यम्), ऊनोदरम् (अल्पाहारः), वृत्तिपरिसंख्या, रसपरित्यागः, विविक्तशय्यासनम्, कायक्लेश इति ।

श्लो. २२. अभ्यन्तरतपः षड्विधम् । प्रायश्चित्तविनयव्यावृतिस्वाध्यायोत्सर्गध्यानभेदात् ॥ विक्लित्तिः, पाकः ॥

श्लो. २१-२२. 'अनगारमतं किंचिद्धर्मस्त्रैलोक्यमण्डनम् ।

तत्रयं च न मोक्षार्थमाप्ताभासादिगोचरम् ।
ध्यातो गरुडबोधेन न हि हन्ति विषं बकः ॥ २३ ॥
सर्वदोषविनिर्मुक्तं सर्वज्ञोपज्ञमञ्जसा ।
तप्यध्वं तत्तपो यूयं किं मुधा तुषखण्डनैः ॥ २४ ॥
रागादिदोषसंयुक्तः प्राणिनां नैव तारकः ।
पतन्तः स्वयमन्येषां न हि हस्तावलम्बनम् ॥ २५ ॥
न च क्रीडा विभोस्तस्य बालिशेष्वेव दर्शनात् ।
अतृप्तश्च भवेत्तृप्तिं क्रीडया कर्तुमुद्यतः ॥ २६ ॥
स्वैराचारस्वभावोऽपि नेश्वरस्यैश्यहानितः ।
अप्यस्मदादिभिर्द्वैष्यं सर्वोत्कर्षवतः कुतः ॥ २७ ॥

---

अनगारं व्रतं द्वेधा बाह्याभ्यन्तरभेदतः ।
षोढा बाह्यं जिनैः प्रोक्तं तावत्संख्यानमान्तरम् ॥
वृत्तिसंख्यानमौदर्यमुपवासो रसोज्झनम् ।
रहःस्थितितनुक्लेशौ षोढा बाह्यमिति व्रतम् ॥
स्वाध्यायो विनयो ध्यानं व्युत्सर्गो व्यावृतिस्तथा ।
प्रायश्चित्तमिति प्रोक्तं तपः षड्विधमान्तरम् ॥'

इति धर्मशर्माभ्युदये ।

श्लो. २३. आप्ताभासादिगोचरम्,– आप्तवदाभासन्ते इत्याप्ताभासाः मिथ्यादेवाः त एव गोचरा विषया यस्य तत् ॥ तत्त्रयम्, मिथ्यादर्शनज्ञानचारित्राणीत्यर्थः । गरुडबोधेन, गरुड इति बुद्ध्या ।

श्लो. २४. उपज्ञम्, आद्यज्ञातम्; 'उपज्ञा ज्ञानमाद्यं स्यात्' इत्यमरः । सर्वज्ञोपज्ञम्, अर्हत्परमेश्वरेण निरूपितम् ।

श्लो. २५. बालिशेषु, अज्ञेषु; 'शिशावज्ञे च बालिशः' इत्यमरः ।
'पतन्त' इति,— 'दभ्रः किंतु स्वयमपि ग्लालम्बयष्टिर्भवेद्वा ।'

इति लोकोक्तिमुक्तावल्याम्.

श्लो. २७. ऐश्यम्, प्रभुत्वम् ।

अदोषश्चेदकृत्यं च कृतिनः किमु कृत्यतः ।
स्वैराचारविविद्विष्टो मत एव न चोत्तमे ॥ २८ ॥

इति प्रबोधिताः केचिद्बभूवुस्तेषु धार्मिकाः ।
मृत्स्ना ह्यार्द्रत्वमायाति नोपलं जलसेचनात् ॥ २९ ॥

धर्माश्रितान्समालोक्य तापसान्मुमुदे कृती ।
प्रीतये हि सतां लोके स्वोदयाच्च परोदयः ॥ ३० ॥

बोधिलाभात्परा पुंसां भूतिः का वा जगत्त्रये ।
किंपाकफलसंकाशैः किं परैरुदयच्छलैः ॥ ३१ ॥

ततस्तस्माद्विनिर्गत्य देशे **दक्षिण**नामके ।
**सहस्रकूट**माश्रित्य श्रीविमानं नुनाव सः ॥ ३२ ॥

भगवन्दुर्णयध्वान्तैराकीर्णे पथि मे सति ।
सज्ज्ञानदीपिका भूयात्संसारावधिवर्धनी ॥ ३३ ॥

---

**श्लो. २८.** कृतिनः, योग्यस्य । 'कृती स्यात्पण्डिते योग्ये' इति हेमः ।

**श्लो. २९.** मृत्स्ना, प्रशस्ता मृत् । 'प्रशस्ता तु मृत्स्ना मृत्सा च मृत्तिका' इत्यमरः ॥

**श्लो. ३१.** बोधिः, अर्हद्धर्माप्तिः । 'बुध अवगमने ।' 'सर्वधातुभ्य इन् ।' 'नोक्तमनित्यम्' इति न गुणनिषेधः । 'बोधिर्बौद्धसमाधौ चार्हद्धर्माप्तौ च पिप्पले' इति हेमः ।

निन्दितः पाकोऽस्येति किंपाकः, विषवृक्षः (எட்டிமரம்); उदयच्छलैः, उदयः ऐश्वर्यमिति छलं छद्म येषां तैः ।

**श्लो. ३२.** श्रीविमानम्, जिनालयम् । 'विमानं देवतायाने सप्तभूमिगृहेऽपि च' इति हेमः ।

'क्षेमाह्वयमवाप्यास्य वने बाह्ये मनोरमे ।
सहस्रकूटे राजन्तं जिनालयमलोकत ॥' इत्युत्तरपुराणे.

**श्लो. ३३.** दीपिका, हस्तदीपः । 'दीपशब्दात्संज्ञायां कन् ।' 'दीपिका

जन्मजीर्णाटवीमध्ये जनुषान्धस्य मे सती ।
सन्मार्गे भगवन्भक्तिर्भवतान्मुक्तिदायिनी ॥ ३४ ॥

स्वान्तशान्तिं ममैकान्तामनेकान्तैकनायकः ।
**शान्तिनाथो** जिनः कुर्यात्संसृतिक्लेशशान्तये ॥ ३५ ॥

इति स्तोत्रेण तत्रासीदुद्घाटितकवाटकम् ।
मुक्तिद्वारकवाटस्य भेदिना किं न भिद्यते ॥ ३६ ॥

अन्याशक्यमिदं मान्यो वितन्वन्न विसिष्मिये ।
लोकमालोकसात्कुर्वन्नहि विस्मयते रविः ॥ ३७ ॥

तावता तं समासाद्य प्रणतः कोऽपि पिप्रिये ।
स्वमनीषितनिष्पत्तौ किं न तुष्यन्ति जन्तवः ॥ ३८ ॥

---

हस्तदीपः स्यात्' इति वैजयन्ती । संसारावधिवर्धनी,— संसारावधिः मोक्षः, तस्य वर्धनी, प्रकाशिका ।

**श्लो. ३४.** जनुषा, जननेन; 'जनुर्जननजन्मानि' इत्यमरः ।

**श्लो. ३५.** एकान्तो निश्चयोऽत्रेति, एकान्ताम्, दृढाम् । अनेकान्तनायकः, न एक एव अन्तः परिच्छेदः यस्य तत्, अनेकान्तम्, स्याद्वादमतम् तस्य मुख्यनायकः । शान्तिनाथः, चतुर्विंशतितीर्थंकरेषु, षोडशस्तीर्थंकरः ।

'एतस्यामवसर्पिण्यामृषभोऽजितसंभवौ ।
अभिनन्दनः सुमतिस्ततः पद्मप्रभाभिधः ।
सुपार्श्वश्चन्द्रप्रभश्च सुविधिश्चाथ शीतलः ।
श्रेयांसो वासुपूज्यश्च विमलोऽनन्ततीर्थकृत् ।
धर्मः शान्तिः कुंथुररो मल्लिश्च मुनिसुव्रतः ।
नमिर्नेमिः पार्श्ववीरौ चतुर्विंशतिरर्हताम् ॥' इति हेमः ।

**श्लो. ३७.** आलोकसात्, प्रकाशाधीनम् । 'तदधीनवचने' इति सातिप्रत्ययः । 'आलोको दर्शनोद्योतौ' इत्यमरः ।

**श्लो. ३८.** मनीषितनिष्पत्तौ, इष्टप्राप्तौ ।

स्वामी तु तं समालोक्य कस्त्वमार्येति पृष्टवान् ।
प्रभूणां प्राभवं नाम प्रणतेष्वेकरूपता ॥ ३९ ॥

पृष्टः सोऽप्युत्तरं वक्तुमुपादत्त कृतत्वरः ।
समीहितेऽपि साहाय्ये प्रयत्नो हि प्रकृप्यते ॥ ४० ॥

इह **क्षेमपुरी** नाम राजधानी विराजते ।
नरपतिस्तु देवान्तो राजा तत्पुरनायकः ॥ ४१ ॥

तस्य श्रेष्ठिपदप्राप्तः **सुभद्र**स्तस्य गेहिनी ।
नाम्ना तु **निर्वृतिः** पुत्री **क्षेमश्री**रित्यभूत्तयोः ॥ ४२ ॥

जन्मलग्ने च दैवज्ञास्तत्पतिं तमजीगणन् ।
स्वयंविघटितद्वारो येनायं स्याज्जिनालयः ॥ ४३ ॥

तत्परीक्षाकृतेऽत्रैव **गुणभद्र**समाह्वयः ।
प्रेष्योऽहं प्रेरितस्तिष्ठन्भवन्तं दृष्टवानिति ॥ ४४ ॥

इत्युक्त्वा स पुनर्नत्वा गत्वा सत्वरमात्मनः ।
स्वामिने स्वामिवृत्तान्तममन्दप्रीतिरब्रवीत् ॥ ४५ ॥

भद्रवार्तां ततः शृण्वन् **सुभद्रो**ऽपि समागतः ।
तत्क्षणे च तमद्राक्षीज्जिनपूजाकृतक्षणम् ॥ ४६ ॥

---

**श्लो. ४१.** देवान्तो नरपतिः, **नरपतिदेवः** ।

'तत्र च प्रजापतिरधःपातिताखिलपृथिवीपतिः सुरपतिदेशीयो **नरपतिदेवो** नाम ।' इति ग. चि. म.

**श्लो. ४३.** 'दैवज्ञास्तु तज्जन्मदिवस एवैतज्जिनभवनद्वाराररपुटस्य स्वयं विघटनं निकटगते यस्मिन्नाघटीति, प्रकटितानुभावस्य तस्येयं पाणिगृहीतीत्यभाणिषुः ।' इति ग. चि. म.

**श्लो. ४५.** आत्मनः स्वामिने, **सुभद्राये**त्यर्थः । स्वामिवृत्तान्तम्. जीवकस्य वृत्तान्तम् ।

न गात्रमात्रमद्राक्षीद्विभवं चास्य वैश्यराट् ।
सौगन्धिकस्य सौगन्ध्यं शपथात्कि प्रतीयते ॥ ४७ ॥

इज्यान्तेऽभूद्यथायोग्यमुपचारः परस्परम् ।
सतां हि प्रह्वता शास्ति शालीनामिव पक्वताम् ॥ ४८ ॥

तद्वेश्म तस्य निर्बन्धादथ बन्धुप्रियो गतः ।
सख्यं साप्तपदीनं हि लोके संभाव्यते सताम् ॥ ४९ ॥

आश्रयन्तीं श्रियं को वा पादेन भुवि ताडयेत्
कन्यायाः करपीडां च तद्दैन्यादन्वमन्यत ॥ ५० ॥

अथ भद्रतरे लग्ने **सुभद्रेण** समर्पिताम् ।
**क्षेमश्रियं** पवित्रोऽयमुपयेमे यथाविधि ॥ ५१ ॥

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्रचूडामणौ क्षेमश्रीलम्भो नाम षष्ठो लम्बः ।

## सप्तमो लम्बः ।

अथ वध्वा तया साकमनुबोभूय भूयसीम् ।
सुखतातिं ततो यातुं वितताने मतिं कृती ॥ १ ॥

---

श्लो. ४८. इज्यान्ते, पूजावसाने । प्रह्वता, नम्रीभावः । शास्ति, शिक्षयति । शालीनां प्रह्वतेव सतां प्रह्वता पक्वतां शास्ति हीत्यन्वयः ।

श्लो. ४९. सप्तभिः पदैरुच्चारितैर्निर्वृत्तम्, साप्तपदीनम्, सख्यम् । 'साप्तपदीनं सख्यम्' इति साधु । 'सख्यं साप्तपदीनं स्यात्' इत्यमरः ।

श्लो. ५०. करपीडाम्, पाणिग्रहणम् ।

आश्रयन्तीमिति,— 'வலுவிலே வந்த இலட்சுமியைக்காலாலே உதைத்துத் தள்ளலாமா'. பழமொழி.

श्लो. १. सुखतातिम्, सुखपरंपराम् ।

अकथयन्नथ स्वामी गणरात्रात्यये गतः ।
न हि मुग्धाः सतां वाक्यं विश्वसन्ति कदाचन ॥ २ ॥
तद्वियोगादभूत्पत्नी दग्धरज्जुसमद्युतिः ।
प्राणाः पाणिगृहीतीनां प्राणनाथो हि नापरम् ॥ ३ ॥
**सुभद्रो**ऽपि पवित्रं तमन्विष्याधिमयोऽभवत् ।
बहुयत्नोपलब्धस्य प्रच्यवो हि दुरुत्सहः ॥ ४ ॥
स्वामी स्वाभरणत्यागमैच्छद्रच्छन्नतुच्छधीः ।
विवेकभूषितानां हि भूषा दोषाय कल्पते ॥ ५ ॥
धार्मिकाय तदाकल्पं दातुं च समकल्पयत् ।
स्थाने हि बीजवद्दत्तमेकं चापि सहस्रधा ॥ ६ ॥

---

श्लो. २. गणरात्रात्यये,– गणानां बह्वीनां रात्रीणां समाहारः, गणरात्रम् ; गणशब्दस्य संख्यात्वाद्द्विगुसमासः ; तस्य अत्ययः, अतिक्रमः तस्मिन् ।

श्लो. ३. दग्धरज्जुसमद्युतिः,— शुचा तनुतरविच्छायशरीरा संतापबहुला चेत्यर्थः । कविरन्यत्रापीदृशं विशेषणं प्रयुङ्क्ते । यथा,— 'ततश्च तदिदमवबुध्य शुचा दग्धरज्जुसोदरीभूताः कृशोदरीराहूय' इति गद्यचिन्तामणावेकादशे लम्बके । पाणिगृहीती,— गृहीतोऽस्याः पाणिरिति पाणिगृहीती ; 'पाणिगृहीती भार्यायाम्' इति ङीप् ।

श्लो. ४. आधिमयः, संतप्तस्वान्तः । प्रच्यवः, वियोगः ।

श्लो. १–४. 'तदनु कुरुवरिष्ठः क्षेमलक्ष्म्या कृशाङ्ग्या
निरवधिसुखतातिं नित्यसंयोगहेतुम् ।
अविरतमनुभूय प्रागिवासौ कदाचि-
न्निशि निरगमदेकः काननान्तं क्रमेण ॥

तदनु प्राणकान्तवियोगेन तान्तां दग्धरज्जुसमकान्तिसंक्रान्तां * * दुःखसागरनिमग्नां पुत्रीमालोक्य **सुभद्रो**ऽपि संतप्तस्वान्तः कान्तारमागत्य तत्र तत्र विचित्य तदीयमार्गमलभमानो न्यवर्तिष्ट ।' इति जी. च. का.

श्लो. ६. तदा आकल्पम्, इति पदविभागः ।

तावता संन्यधात्कोऽपि सन्निधेस्तस्य संनिधौ ।
भागधेयविधेया हि प्राणिनां तु प्रवृत्तयः ॥ ७ ॥
आगच्छन्तमपृच्छच्च पामरं पार्श्वमात्मनः ।
कुतः कुत्र प्रयासि त्वं स्वास्थ्यं चास्ति न वेति च ॥८ ॥
प्रीतः प्रत्यब्रवीत्सोऽपि प्रश्रयेण समाश्रितः :
मुखदानं हि मुख्यानां लघूनामभिषेचनम् ॥ ९ ॥
इतस्ततो मया मह्य गम्यते कार्यकाम्यया ।
स्वास्थ्यं स्वास्थ्यतमं भूयात्कार्येऽप्यार्यदृशो मम ॥ १० ॥
इत्युक्तेन कुमारेण प्रत्युक्तो वृषलः पुनः ।
स्वास्थ्यं नाम न कृष्यादिजायमानं कृषीवल ॥ ११ ॥
षट्कर्मोपस्थितं स्वास्थ्यं तृष्णाबीजं विनश्वरम् ।
पापहेतुः परापेक्षि दुरन्तं दुःखमिश्रितम् ॥ १२ ॥

---

श्लो ७. सन्निधेः, सतां निधेः आश्रयभूतस्य ।
'वनभुवि पथिकः कोऽप्यागमत्तस्य पार्श्वे
नियतिनियतिरूपा प्राणिनां हि प्रवृत्तिः ।' जी. च. का.

श्लो. ८. स्वास्थ्यम्, सुस्थितिः कुशलमित्यर्थः ।
'अपि कुशलमिति पप्रच्छ' इति जी. च. का.

श्लो. ९. मुखदानम्, अभिमुखीभूय संभाषणमित्यर्थः । अभिषेचनम्, राज्याभिषेकतुल्यमित्यर्थः ।

९.-१०. 'वृषलोऽपि विनीतः सन्नुवाच कुरुकुञ्जरम् ।
कुशलं सांप्रतं युष्मद्दर्शनेन विशेषतः ॥' इति जी. च. का.

श्लो. ११. कृषिरस्यास्तीति कृषीवलः, कर्षकः, तस्य संबुद्धिः कृषीवल । 'रजःकृष्यासुतिपरिषदो वलच्' इति वलच्प्रत्ययः । 'वले' इति दीर्घः ।

श्लो. १२. असिमसिकृषिवाणिज्यविद्याशिल्पभेदात् षट्कर्माणि ।

आत्मोत्थमात्मना साध्यमव्याबाधमनुत्तरम् ।
अनन्तं स्वास्थ्यमानन्दमतृष्णमपवर्गजम् ॥ १३ ॥

तदपि स्वपरज्ञाने याथात्म्यरुचिमात्रके ।
परित्यागे च पूर्णे स्यात्परमं पदमात्मनः ॥ १४ ॥

स्वमपि ज्ञानदृक्सौख्यसामर्थ्यादिगुणात्मकम् ।
परं पुत्रकलत्रादि विद्धि गात्रमलं परैः ॥ १५ ॥

---

श्लो. १३. अनन्तमतृष्णमपवर्गजमानन्दं स्वास्थ्यं भवतीत्यन्वयः।'आनन्दशर्मशातसुखानि च' इत्यमरः। आत्मोत्थम्, आत्मसंभवम्। अव्याबाधम्, अप्रतिबधन्म् । अनुत्तरम्, सर्वोत्कृष्टम् ।

'अनवद्यमात्मसंवेद्यमात्मसंभवमात्मस्वभावमात्माह्लादनमनन्तमनन्तरायमनन्तकालस्थितिकमनन्ताविज्ञानवीर्यदृशात्मकमनन्तकर्मक्षयापेक्षमनन्तपूर्वजननानुपलब्धपूर्वं पुनरनुत्पाद्यमनुपरममनुपममनुत्कर्षमनुक्षणसुलभं सुखमनुबोभूयते ।' इति ग. चि. म. ११ लं.

श्लो. १२–१३. 'कुशलं न हि कर्मपङ्कजातं विविधाशाव्रततिप्ररोहकन्दम् ।
अपवर्गजमात्मसाध्यमाहुः कुशलं सौख्यमनन्तमात्मरूपम्॥'
इति जी. च. का.

श्लो. १४. तदपि, तत्स्वास्थ्यमपि । याथात्म्यरुचिमात्रके, यथार्थस्वरूपवस्त्वभिनिवेशरूपे सम्यग्ज्ञाने । परित्यागे च, सर्वसंगपरित्यागरूपे सम्यक्चारित्रे च। पूर्णे, संपूर्णे सति । आत्मनः, जीवस्य। परमं, सर्वोत्कृष्टम्। पदम्, मोक्षस्थानम् । स्यात् ॥

'तच्च रत्नत्रये पूर्णे परमं प्राप्यमात्मनः ।
तच्च सद्दृष्टिसद्ज्ञानचारित्राणि प्रकीर्तितम् ॥' इति जी. च. का.

श्लो. १५. स्वमपि, स्वपदार्थमात्मानमपि । ज्ञानदृक्सौख्यसामर्थ्यादिगुणात्मकम्, अनन्तज्ञानानन्तदर्शनानन्तसौख्यानन्तवीर्यादिगुणस्वरूपं। विद्धि, जानीहि। पुत्रकलत्रादि गात्रमपि परं आत्मभिन्नम्। विद्धि, जानीहि ।

'आत्मा हि ज्ञानदृक्सौख्यलक्षणो विमलः परः ।
सर्वाशुचिनिदानेभ्यो देहादिभ्य इतीरितः ॥' इति जी. च. का.

एवं भिन्नस्वभावोऽयं देही स्वत्वेन देहकम् ।
बुध्यते पुनरज्ञानादतो देहेन बध्यते ॥ १६ ॥
अज्ञानात्कायहेतुः स्यात्कर्माज्ञानमिहात्मनाम् ।
प्रतीके स्यात्प्रबन्धोऽयमनादिः सैव संसृतिः ॥ १७ ॥
स्वं स्वत्वेन ततः पश्यन्परत्वेन च तत्परम् ।
परत्यागे मतिं कुर्याः कार्यैरन्यैः किमस्थिरैः ॥ १८ ॥
परत्यागकृतो ज्ञेयाः सानगारा अगारिणः ।
गात्रमात्रधनाः पूर्वे सर्वसावद्यवर्जिताः ॥ १९ ॥
मूलोत्तरादिकान्बोद्धुं त्वं न शक्तो हि तद्गुणान् ।

---

श्लो. १६. देही, संसारी जीवः ।

श्लो. १७. इह, आत्मनां अज्ञानात् कायहेतुः कर्म स्यात् । अज्ञानं प्रतीके स्यात् । अयं प्रबन्धः अनादिः । सैव संसृतिः । इत्यन्वयः ॥ आत्मनाम्, प्राणिनाम् । प्रतीके, शरीरे । प्रबन्धः, कर्मबन्धः । सैव संसृतिः, अनादिरियं कर्मबन्ध एव संसारः ।

श्लो १८. 'इत्यादि स्वार्थविज्ञानं सम्यग्ज्ञानमसंशयम् ।
सम्यग्ज्ञानवता कार्यः परित्यागः परस्य वै ॥' इति जी. च. का.

श्लो. १९. अनगारेण महाव्रतेन सहिताः, सानगाराः, यतयः । 'सागारमनगारं च जैनैरुक्तं व्रतं द्विधा । अणुमहाव्रतभेदेन' इति धर्मशर्माभ्युदये. स. २१. श्लो. ११४. । तेषामेव यतीनां, न विद्यतेऽगारं (गृहं) एषामिति व्युत्पत्त्या 'अनगाराः' इत्यपि व्यपदेशः । 'वाचंयमो व्रती साधुरनगार ऋषिर्मुनिः ।' इति हेमः ॥ अगारिणः, सागाराः, गृहमेधिन इति यावत् ॥ सर्वसावद्यवर्जिताः, सर्वपापवृत्तिभ्यो निवृत्ताः ॥

'परित्यागकृतो जीवा द्विविधाः परिकीर्तिताः ।
अनगाराश्च सागाराः पूर्वे सावद्यवर्जिताः ॥' इति जी. च. का.

श्लो. २० वारणपर्याणम्, गजपल्ययनम् । वनायुदेशे जातः वानायुजः, हयविशेषः ।

न हि वारणपर्याणं भर्तुं शक्तो वनायुजः ॥ २० ॥
अतस्त्वमधुना धर्मं गृहाण गृहमेधिनाम् ।
न ह्यारोढुमधिश्रेणिं यौगपद्येन पार्यते ॥ २१ ॥
त्रिचतुःपञ्चभिर्युक्ता गुणशिक्षाणुभिर्व्रतैः ।
तत्त्वधीरुचिसंपन्नाः सावद्या गृहमेधिनः ॥ २२ ॥
अहिंसा सत्यमस्तेयं स्वस्त्रीमितवसुग्रहौ ।
मद्यमांसमधुत्यागैस्तेषां मूलगुणाष्टकम् ॥ २३ ॥
भोगोपभोगसंहारोऽनर्थदण्डव्रतान्वितः ।
गुणानुबृंहणाद्द्वेयो दिग्व्रतेन गुणव्रतम् ॥ २४ ॥

---

'यतीनां सुधर्मं न शक्नोषि वोढुं महोक्षेण वाह्यं यथा तत्किशोरः
अतस्त्वं गृहाण गृहस्थस्य धर्मं यतो मुक्तिलक्ष्मीरदूरे भवित्री ॥'
इति जी. च. का.

श्लो. २२. 'पञ्चाणुव्रतसंपन्ना गुणशिक्षाव्रतोद्यताः ।
सम्यग्दर्शनविज्ञानाः सावद्या गृहमेधिनः ॥' इति जी. च. का.

त्रिभिर्गुणव्रतैः चतुर्भिः शिक्षाव्रतैः पञ्चभिरणुव्रतैश्च युक्ताः सम्यग्ज्ञानदर्शनसंपन्नाः सावद्या नरा गृहस्था भवन्तीत्यर्थः । अहिंसाणुव्रतम्, सत्याणुव्रतम्, अस्तेयाणुव्रतम्, ब्रह्मचर्याणुव्रतम्, परिमितपरिग्रहाणुव्रतम् इति पञ्चाणुव्रतानि ॥

श्लो. २३. 'हिंसानृतस्तेयवधूव्यवायपरिग्रहेभ्यो विरतिः कथंचित् ।
मद्यस्य मांसस्य च माक्षिकस्य त्यागस्तथा मूलगुणा इमेऽष्टौ ॥
इति जी. च. का.

श्लो. २४. 'दिग्देशानर्थदण्डेभ्यो विरतिस्तु गुणव्रतम् ।
भोगोपभोगसंख्यानं केचिदाहुर्गुणव्रतम् ॥' इति जी. च. का.

अनर्थदण्डव्रतम्, निष्फलदुष्कृतेस्त्यागः । भोगोपभोगसंहारः, मितान्नस्त्र्यादिकमित्यर्थः । दिग्व्रतम्, परिच्छिन्नदिशि प्राप्तिः । गुणानुबृंहणात्, मूलगुणवृद्ध्या । दिग्व्रतेन सह अनर्थदण्डव्रतान्वितः भोगोपभोगसंहारः गुणानुबृंहणात् गुणव्रतं भवतीत्यन्वयः ।

सप्रोषधोपवासेन व्रतं सामायिकेन च ।
देशावकाशिकेन स्याद्वैयावृत्त्यं तु शिक्षकम् ॥ २९ ॥

---

'शोधनीयन्त्रशस्त्राग्निमुसलोलूखलार्पणम् ।
ताम्रचूडश्वमार्जारशारिकाशुकपोषणम् ॥ १४४ ॥
अङ्गारशकटारामभाटकास्फोटजीवनम् ।
तिलतोयेक्षुयन्त्राणां रोपणं दावदीपनम् ॥ १४५ ॥
दन्तकेशनखास्थित्वग्रोम्णां निन्द्यरसस्य च ।
शणलाङ्गललाक्षायःक्ष्वेडादीनां च विक्रयः ॥ १४६ ॥
वापीकूपतडागादिशोषणं कर्षणं भुवः ।
निर्लाञ्छनं भक्षरोधः पशूनामतिभारणम् ॥ १४७ ॥
वनकेलिजलक्रीडाचित्रलेप्यादि कर्म वा ।
एवमन्येऽपि बहवोऽनर्थदण्डाः प्रकीर्तिताः ॥ १४८ ॥'

इति धर्मशर्माभ्युदये स. २१.

श्लो. २९. अन्नपानखाद्यलेह्यचतुराहारवर्जनमुपवासः । सकृद्भुक्तिः प्रोषधः । पर्वादिषु पूर्वोत्तरेऽहनि सकृद्भुक्तिः प्रोषधोपवासः ।

'पर्वण्यष्टम्यां च ज्ञातव्यः प्रोषधोपवासस्तु ।
चतुरभ्यवहार्याणां प्रत्याख्यानं तदिच्छुभिः ॥' इति श्रावकधर्मे ।

सामायिकलक्षणं तु यथा—

'समता सर्वभूतेषु संयमः शुभभावना ।
आर्तरौद्रपरित्यागस्तद्धि सामायिकं व्रतम् ॥' इति क्रियापुस्तके ।

देशावकाशिकलक्षणं यथा —

'देशावकाशिकं स्यात्कालपरिच्छेदेनेन देशस्य ।
प्रत्यहमणुव्रतानां प्रतिसंहारो विशालस्य ॥' इति श्रावकधर्मे ।

वैयावृत्त्यलक्षणं यथा—

'कुष्ठोदरव्यथाशूलैर्वातपित्तशिरोर्तिभिः ।
कासश्वासजरारोगैः पीडिता ये मुनीश्वराः ॥
तेषां भैषज्यमाहारं शुश्रूषा पथ्यमादरात् ।' इति क्रियापुस्तके ।

'सामायिकं प्रोषधकोपवासस्तथातिथीनामपि संग्रहश्च ।
सल्लेखना चेति चतुःप्रकारं शिक्षाव्रतं शिक्षितमागमज्ञैः ॥' जी. च. का.

परिच्छिन्नदिशि प्राप्तिं त्यागं निष्फलदुष्कृतेः ।
मितान्नस्त्र्यादिकत्वं च कृत्यं विद्धि गुणव्रते ॥ २६ ॥

सञ्चारस्यावधिर्नित्यं सचिह्ना चात्मभावना ।
दानाद्यैरुपवासश्च पर्वादिष्वन्यतः कृती ॥ २७ ॥

अणुव्रती व्रतैरेतैः क्वचिद्देशे क्वचित्क्षणे ।
महाव्रती भवेत्तस्माद्ग्राह्यं धर्ममगारिणाम् ॥ २८ ॥

इत्युक्तः प्रत्यगृह्णाच्च स धर्मं गृहमेधिनाम् ।
कः कदा कीदृशो न स्याद्भाग्ये सति पचेलिमे ॥ २९ ॥

अत्यादरान्निजाहार्यममुष्मै दानविद्ददौ ।
नादाने किंतु दाने हि सतां तुष्यति मानसम् ॥ ३० ॥

अनर्घ्याकल्पलाभाच्च धर्मलाभाच्च पिप्रिये ।
तादात्विकसुखप्रीतिः संसृतौ हि विशेषतः ॥ ३१ ॥

तं विसृज्य ततः स्वामी तस्य स्मृत्वैव निर्ययौ ।
प्रत्यक्षे च परोक्षे च सन्तो हि समवृत्तिकाः ॥ ३२ ॥

---

श्लो. २७. अन्यतः, शिक्षाव्रत इत्यर्थः । कृतिः, कृत्यम् ।

श्लो. २८. 'इत्युक्तव्रतसंपन्नः क्वचिद्देशे क्वचित्क्षणे ।
महाव्रती भवेत्तस्माद्ग्राह्यं धर्ममगारिणाम् ॥' इति जी. च. का.

श्लो. ३०. निजाहार्यम्, स्वाभारणम् । आदाने, प्रतिग्रहे ।

श्लो. ३१. अनर्घ्याकल्पलाभाच्च, अमूल्याभरणलाभाच्च । धर्मलाभाच्च, गृहस्थधर्मलाभाच्च । तादात्विकसुखप्रीतिः, तात्कालिकविषयसुखप्रीतिः । विशेषतः भवतीति शेषः ।

श्लो. ३२. तस्य स्मृत्वैव, तं स्मरन्नेव । 'अधीगर्थदयेशां कर्मणि' इति षष्ठी ।

श्लो. २९–३२. 'इति प्रतिपादितधर्मं शिरसा मनसा च प्रतिगृह्णानमन्तर्गतप्रतापकोशकपुञ्जमिव मणिभूषणगणमात्मना वितीर्णमत्यादरेण करेण पचेलिम-

अथारण्ये क्वचिच्छ्रान्तो निषण्णो निरुपद्रवः ।
शरण्यं सर्वजीवानां पुण्यमेव हि नापरम् ॥ ३३ ॥
तत्र चैकाकिनीं रामां पश्यन्नासीत्पराङ्मुखः ।
अपदोषानुषङ्गा हि करुणा कृतिसंभवा ॥ ३४ ॥
सा तु जाता वृषस्यन्ती वृषस्कन्धस्य वीक्षणात् ।
अप्राप्ते हि रुचिः स्त्रीणां न तु प्राप्ते कदाचन ॥ ३५ ॥
अश्वस्यन्तीं विभाव्यैनामाकूतज्ञो व्यरज्यत ।

---

भाग्यफलबृन्दमिवादाय संमदपयःपूरैः क्षालयन्तमिवातिसंतोषकोरकितान्तरङ्गं तं धार्मिकमुत्सृज्य तस्य स्मरन्नेव कुरुकुञ्जरस्तस्माद्वनान्निर्जगाम ॥' जी. च. का.

श्लो. ३४. 'निषण्णस्तत्र मधुरं रवं शृण्वन्कुरूत्तमः ।
संदिग्धे सिन्धुगम्भीरः कल्याणाद्रिरिव स्थिरः ॥
टंकारः किं मारबाणासनस्य झंकारोऽयं मत्तमाध्वीलिहां किम् ।
हंसानां किं मञ्जुलः कण्ठनादः किं वा लीलाकोकिलालाप एषः ॥

इति संदेहं पराङ्गनानूपुररवनिश्चयेन निवर्तयन्परपरिग्रहविरक्तमानसः कुरुकुलोत्तंसः पराङ्मुखो बभूव ॥

संचरन्ती वने तत्र भर्त्रा काचन खेचरी ।
प्रतार्य तं मिषेणाशु पुरस्तादस्य संन्यधात् ॥' इति जी. च. का.

श्लो. ३५. 'इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम् ।'
इति रघुवंशे १२ स. ३४ श्लो.

वृषः पुमान् । 'वृषः स्याद्वासवे धर्मे सौरभेये च शुक्रले । पुंराशिभेदयोः शृङ्ग्यां मूषकश्रेष्ठयोरपि' इति विश्वः । वृषं पुरुषमात्मार्थमिच्छतीति वृषस्यन्ती, कामुकी । 'सुप आत्मनः क्यच्' इति क्यच्प्रत्ययः । 'अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि' इत्यसुगागमः । ततो लटः शत्रादेशः । 'उगितश्च' इति ङीप्.

श्लो. ३६. अश्वस्यन्तीम्, कामुकीम् । 'तमुपश्रुत्येयमश्वस्यन्ती युवति-

अनुरागकृदज्ञानां वशिनां हि विरक्तये ॥ ३६ ॥

पृथक्चेदङ्गनिर्माणं चर्ममांसमलादिकम् ।
सजुगुप्सेऽत्र तत्पुञ्जे मूढात्मा हन्त मुह्यति ॥ ३७ ॥

दुर्गन्धमलमांसादिव्यतिरिक्तं विवेचने ।
नेक्षते जातु देहेऽस्मिन्मोहे को हेतुरात्मनाम् ॥ ३८ ॥

अज्ञानमशुचेर्बीजं ज्ञात्वा व्यूहं च देहकम् ।
आत्मात्र सस्पृहो वक्ति कर्माधीनत्वमात्मनः ॥ ३९ ॥

मदीयं मांसलं मांसममीमांसेयमङ्गना ।
पश्यन्ती पारवश्यान्या ततो याम्यात्मनेऽथवा ॥ ४० ॥

---

स्नाश्वासात्कुमारे सद्यः काप्यन्तरधात् । ' इति ग. चि. म. अज्ञानामनुरागकृद्व-स्त्विति शेषः ।

श्लो. ३५–३६. 'वृषस्यन्ती वरारोहा वृषस्कन्धं कुरूद्वहम् ।
वीक्ष्य तस्याङ्गसौन्दर्यान्नातृप्तसाऽत्रपाकुला ॥
अश्वसन्ती विशालाक्षी विश्वाधिकविभोज्ज्वलम् ।
कुरुवीरमुवाचेदं कुसुमायुधवञ्चिता ॥' जी. च, का.

श्लो. ३७. अङ्गनिर्माणम्, शरीरनिर्माणम् । पृथक्चेत्, आत्मना विरहितं चेत् । चर्ममांसमलादिकं भवतीति शेषः । मूढात्मा, अज्ञानी जीवः ।

श्लो. ३८. विवेचने, आत्मनः पृथक्करणे सति । आत्मनाम्, जीवानाम् ।

श्लो. ३९. अज्ञानम्, अज्ञानस्वरूपम् । व्यूहम्, अतर्क्यम् । 'व्यूहः स्याद्बलविन्यासे निर्माणे बृन्दतर्कयोः' इति मेदिनी । ज्ञात्वा, एवं ज्ञात्वापीत्यर्थः । अत्र देहे सस्पृहः आत्मा आत्मनः कर्माधीनत्वं वक्तीत्यन्वयः ।

श्लो. ४०. मांसलम्, बलवत् । 'सिध्मादिभ्यश्च' इति लच्प्रत्ययः । अमीमांसा, विचारशून्या ।

अङ्गारसदृशी नारी नवनीतसमा नराः ।
तत्तत्सांनिध्यमात्रेण द्रवेत्पुंसां हि मानसम् ॥ ४१ ॥

संलापवासहासादि तद्वर्ज्यं पापभीरुणा ।
बालया वृद्धया मात्रा दुहित्रा वा व्रतस्थया ॥ ४२ ॥

इति वैराग्यतर्केण ततो यातुं प्रचक्रमे ।
भेतव्यं खलु भेतव्यं प्राज्ञैरज्ञोचितात्परम् ॥ ४३ ॥

विरक्तमेव रक्ता सा निश्चिकाय विपश्चितम् ।
निसर्गादिङ्गितज्ञानमङ्गनासु हि जायते ॥ ४४ ॥

तस्य स्वान्तं वशीकर्तुं स्वोदन्तमियमूचिषी ।
प्रतारणविधौ स्त्रीणां बहुद्वारा हि दुर्मतिः ॥ ४५ ॥

विद्धि दीनां महाभाग मां विद्याधरकन्यकाम् ।
स्यालेनात्र बलान्नीतां त्यक्तामात्मप्रियाभयात् ॥ ४६ ॥

**अनङ्गतिलकां** नाम्ना पुंसां तिलक रक्ष माम् ।
अशरण्यशरण्यत्वं वरेण्ये वर्ततामिति ॥ ४७ ॥

---

श्लो. ४१–४२. 'मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥
तप्ताङ्गारसमा नारी घृतकुम्भसमः पुमान् ।
तस्माद्घृतं च वह्निं च नैकत्र स्थापयेद्बुधः ॥'
इति मानवीयधर्मशास्त्रे.

श्लो. ४४. 'स्त्रीणामशिक्षितपटुत्वममानुषीषु
संलक्ष्यते किमुत ताः प्रतिबोधवत्यः ।' इति शाकुन्तले.

श्लो. ४४. इङ्गितज्ञानम्, अभिप्रायव्यञ्जकदैहिकचेष्टापरिज्ञानम् ।

श्लो. ४६. आत्मप्रियाभयात्, स्वभार्याया भयात् ।

श्लो. ४७. वरेण्ये त्वयीति शेषः ।

तावदार्तस्वरः कोऽपि शुश्रुवे श्रुतशालिना ।
क्व प्रयाता प्रिये प्राणा मम यान्तीति दुःसहः ॥ ४८ ॥

योषाप्येषा मिषेणास्मान्निमेषादिव निर्ययौ ।
मायामयी हि नारीणां मनोवृत्तिर्निसर्गतः ॥ ४९ ॥

आर्तस्वरकरोऽप्याह दैन्यं मान्यस्य वीक्षणात् ।
शोच्याः कथं न रागान्धा ये तु वाच्यान्न बिभ्यति ॥ ५० ॥

उदन्योपद्रुतामत्र मान्य भार्यां पतिव्रताम् ।
पानीयार्थमवस्थाप्य नाद्राक्षं प्रस्थितागतः ॥ ५१ ॥

विद्याप्यविद्यमानैव मम विद्याधरोचिता ।
मर्त्योत्तम भवानत्र कर्तव्यं कथयेदिति ॥ ५२ ॥

पुरन्ध्रीष्वतिसंधानादभैषीदभयंकरः ।
वचनीयाद्धि भीरुत्वं महतां महनीयता ॥ ५३ ॥

---

श्लो ४९. अस्मात्स्थानादिति शेषः ।

श्लो. ४९. मनोवृत्तिः, मनोव्यापारः ।

श्लो. ५०. वाच्यात्, अपवादात् ।

श्लो. ५१. पूर्वं प्रस्थितः पश्चादागतः, प्रस्थितागतः. उदन्या, पिपासा ।
'सतीमुदन्याकुलितान्तरङ्गामत्रैव संस्थाप्य जलाशयाय ।
गतोहमागत्य सरोरुहाक्षीं नाद्राक्षमद्य प्रतिकूलदिष्टात् ॥'
इति जी. च. का.

श्लो. ५२. 'नरोत्तम तया सार्धं विद्यापि मम निर्गता ।
मनोवृत्तिश्च तत्कर्तुं चिन्तापि न हि शक्यते ॥
इतिकर्तव्यतामूढं मामुद्दिश्य नरोत्तम ।
प्रज्ञानामग्रगण्यस्त्वं ब्रूहि कर्तव्यमत्र वै ॥' इति जी. च. का.

श्लो. ५३. अभयंकरो **जीवंधर** इति शेषः ।

नभश्चरं पुनश्चैनं सचिवश्चिद्बोधयत् ।
अपश्चिमफलं वक्तुं निश्चितं हि हितार्थिनः ॥ ५४ ॥

भवदत्त मुधार्तोऽसि विद्यावित्तो भवन्नपि ।
न विद्यते हि विद्यायामगम्यं रम्यवस्तुषु ॥ ५५ ॥

नभश्चर न कश्चित्स्याद्विपश्चिदविपश्चितोः ।
विनिश्चलशुचोर्भेदो यतश्चन कुतश्चन ॥ ५६ ॥

परं सहस्रधीभाजि स्त्रीवर्गे का पतिव्रता ।
पातिव्रत्यं हि नारीणां गत्यभावे तु कुत्रचित् ॥ ५७ ॥

मदमात्सर्यमायेर्ष्यारागरोषादिभूषिताः ।
असत्याशुद्धिकौटिल्यशाठ्यमौढ्यधनाः स्त्रियः ॥ ५८ ॥

निर्घृणे निर्द्रवे क्रूरे निर्व्यवस्थे निरङ्कुशे ।
पापे पापनिमित्ते च कलत्रे ते कुतः स्पृहा ॥ ५९ ॥

इत्युपादिष्टमेतस्य हृदये नासजत्तराम् ।
जठरे सारमेयस्य सर्पिषो न हि सञ्जनम् ॥ ६० ॥

---

श्लो. ५४. पश्चिममपकृष्टं न भवतीत्यपश्चिमम्, उत्कृष्टमित्यर्थः । 'जघन्यं चरममन्त्यपाश्चात्यपाश्चिमम् ।' इत्यमरः ।

श्लो. ५७. 'उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।
स्त्रीबुद्ध्या न विशिष्येत तस्माद्रक्ष्याः कथं हि ताः ॥
रहो नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः ।
तेन नारद नारीणां सतीत्वमुपजायते ॥' इति पञ्चतन्त्रे ।

श्लो. ५८–५९. 'तस्मादशुचिमयीनामघमयीनामपवादमयीनामनार्जवमयीनाममार्दवमयीनां मायामयीनां मात्सर्यमयीनां महामोहमयीनां कामिनीनां कपटस्नेहे न विश्वासस्त्वया कार्य इत्युदीरयामास ।' इति ग. चि. म.

श्लो. ६०–६२. उत्पथस्थे, उन्मार्गगामिनि । न दृष्टपूर्वः, अदृष्टपूर्वः ; तस्य दृष्टौ, दर्शने ।

स्वामी तु तस्य मौढ्येन सुतरामन्वकम्पत ।
उत्पथस्थे प्रबुद्धानामनुकम्पा हि युज्यते ॥ ६१ ॥

ततस्तस्माद्विनिर्गत्य कमप्यारामसमाश्रयत् ।
अदृष्टपूर्वदृष्टौ हि प्रायेणोत्कण्ठते मनः ॥ ६२ ॥

तत्राम्रफलमाक्रष्टुं धनुषा कोऽपि नाशकत् ।
अशक्तैः कर्तुमारब्धं सुकरं किं न दुष्करम् ॥ ६३ ॥

स्वामी तु तत्फलं विद्धमादत्त सशिलीमुखम् ।
तत्तन्मात्रकृतोत्साहैः साध्यते हि समीहितम् ॥ ६४ ॥

अपराद्धपृषत्कोऽपि दृष्ट्वा व्यस्मेष्ट तत्कृतिम् ।
अपदानमशक्तानामद्भुताय हि जायते ॥ ६५ ॥

स्वामिनोऽयं स्ववृत्तान्तं सकातर्यं समभ्यधात् ।
संनिधाने समर्थानां वराको हि परो जनः ॥ ६६ ॥

कर्तव्यं वा न वा प्रोक्तं मया कार्मुककोविद ।
कर्णकट्वपि मद्वाक्यमाकर्णयितुमर्हसि ॥ ६७ ॥

---

'इत्यादिनिजवचोविलासं विद्याधरजडहृदये सारमेयोदरे सर्पिरिवासंलग्नमालोक्य विस्तारितकरुणः कुरुवारणस्तस्माद्विपिनान्निर्गत्य निसर्गरुचिरां * * आरामस्थलीमाससाद ।' इति जी. च. का.

श्लो. ६३. चिकीर्षितः सुकरोऽप्यर्थोऽशक्तानां दुष्कर एव भवतीति भावः।

श्लो. ६५. अपराद्धपृषत्कः, लक्ष्याप्राप्तशरः; 'अपराद्धपृषत्कोऽसौ लक्ष्याद्यश्च्युतसायकः' इत्यमरः। अपदानं, प्रशस्तकर्म; 'अपदानं कर्मवृत्तम्' इत्यमरः।

श्लो. ६७. मया प्रोक्तं कर्तव्यं वा न वा स्यादिति शेषः।
'अतस्त्वां प्रार्थये श्रीमन्युक्तं वायुक्तमेव वा ।
मामकीनं वचो नूनं कर्णदेशे विधीयताम् ॥' इति जी. च. का.

एतन्मध्यमदेशस्था **हेमाभा** स्यादियं पुरी ।
क्षत्रियो **दृढमित्रः** स्यात्तत्प्रिया **नलिना**ह्वया ॥ ६८ ॥

**सुमित्राद्या**स्तयोः पुत्रास्तेष्वप्यन्यतमोऽस्म्यहम् ।
वयसैव वयं पक्वा विश्वेऽपि न तु विद्यया ॥ ६९ ॥

तातपादोऽयमस्माकं चापविद्याविशारदम् ।
विचिनोति न चेद्दोष एषोऽप्यालोक्यतामिति ॥ ७० ॥

तद्व्याहारे विसंवादो विदुषोऽप्यस्य नाजनि ।
विधिर्घटयतीष्टार्थैः स्वयमेव हि देहिनः ॥ ७१ ॥

पार्थिवं च ततः पश्यंस्तद्वश्योऽभूच्च संमतेः ।
अनुसारप्रियो न स्यात्को वा लोके सचेतनः ॥ ७२ ॥

महीक्षिता क्षणात्तस्य माहात्म्यमपि वीक्षितम् ।
वपुर्वक्ति हि सुव्यक्तमनुभावमनक्षरम् ॥ ७३ ॥

सुतविद्यार्थमत्यर्थं पार्थिवस्तमयाचत ।
आराधनैकसंपाद्या विद्या न ह्यन्यसाधना ॥ ७४ ॥

अभ्यर्थनबलात्तस्य कुमारोऽप्यभ्युपागमत् ।
स्वयं देया सती विद्या प्रार्थनायां तु किं पुनः ॥ ७५ ॥

---

श्लो. ६९. 'तयोः सुताः सुमित्राद्यास्तेष्वप्यन्यतमोऽस्म्यहम् ।
विद्याहीना वयं सर्वे नद्या हीना इवाद्रयः ॥' जी. च. का.

श्लो. ६९–७०. 'तयोः पुत्राः सुमित्रधनमित्रादयः । तेष्वेवेहि मामप्यन्यतमम् । तातपादोऽस्माकं पण्डितानत्र कोदण्डविद्यायां चिरस्य विचिनोति । तस्मात्तत्र भद्रेण यातव्यमिति ॥' इति ग. चि. म.

**श्लो. ७१.** विसंवादः, प्रतिषेधोक्तिः । 'विप्रलम्भो विसंवादः' इत्यमरः ।

श्लो. ७२. संमतेः, तत्कृतया संमाननया ।

पवित्रोऽपि सुतान्विद्यां स प्रापयदवाञ्छितम् ।
कृतार्थानां हि पारार्थ्यमैहिकार्थपराङ्मुखम् ॥ ७६ ॥
प्रश्रयेण बभूवुस्ते प्रत्यक्षाचार्यरूपकाः ।
विनयः खलु विद्यानां दोग्ध्री सुरभिरञ्जसा ॥ ७७ ॥
वीक्ष्य तानतृपद्भूपो विद्यानां पारदृश्वनः ।
पुत्रमात्रं मुदे पित्रोर्विद्यापात्रं तु किं पुनः ॥ ७८ ॥
अतिमात्रं पवित्रं च धात्रिपः समभावयत् ।
असंभावयितुर्दोषो विदुषां चेदसंमतिः ॥ ७९ ॥
महोपकारिणः किं वा कुर्यामित्यप्यतर्कयत् ।
विद्याप्रदायिनां लोके का वा स्यात्प्रत्युपक्रिया ॥ ८० ॥
कन्याविश्राणनं तस्मै करणीयमजीगणत् ।
शक्यमेव हि दातव्यं सादरैरपि दातृभिः ॥ ८१ ॥
अभ्युपाजीगमत्पुत्रीं परिणेतुममुं पुनः ।
उदाराः खलु मन्यन्ते तृणायेदं जगत्त्रयम् ॥ ८२ ॥

---

श्लो. ७६. "सोऽध्यापयदवाञ्चितम्" इति पाठान्तरम् ।

श्लो. ७७. प्रत्यक्षाचार्यरूपकाः, प्रत्यक्षाचार्यस्य **जीवंधरस्य** समानाः ।

श्लो. ७८. पारदृश्वनः, पारं दृष्टवतः । 'दृशेः क्वनिप्' इति कर्मणि भूते क्वनिप्प्रत्ययः ।

श्लो. ७९. पवित्रम्, **जीवकम्** । धात्रीपः, **दृढमित्रः** । समभावयत्, संमानितवान् । असंभावयितुरिति,- यदि विद्वांसो न संभाव्यन्ते, असावसंभावयितुरेव दोष इत्यर्थः ।

श्लो.. ८१. विश्राणनम्, दानम् । 'विश्राणनं वितरणम्' इत्यमरः ।

श्लो. ८२. तृणाय मन्यन्ते, तृणवत् मन्यन्ते, इत्यर्थः । 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इत्यनादरे चतुर्थी ।

ततः **कनकमाला**ख्यां कन्यां राज्ञा समर्पिताम् ।
पर्यणैषीत्पवित्रोऽयं पवित्रामग्निसाक्षिकम् ॥ ८३ ॥

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्रचूडामणौ कनकमालालम्भोनाम सप्तमो लम्बः ।

---

## अष्टमो लम्बः ।

अथ तत्करपीडान्तेऽसक्तस्वान्तोऽभवत्सुधीः ।
तीरस्थाः खलु जीवन्ति न हि रागाब्धिगाहिनः ॥ १ ॥

स्यालानां तत्र वात्सल्यादवात्सीत्सुचिरं सुधीः ।
वत्सलेषु च मोहः स्याद्वात्सल्यं हि मनोहरम् ॥ २ ॥

यापितोऽपि महाकालस्तस्य नोद्वेगमातनोत् ।
वत्सलैः सह संवासे वत्सरो हि क्षणायते ॥ ३ ॥

कदाचित्कापि तत्प्रान्तं समन्दस्मितमासदत् ।
नैसर्गिकं हि नारीणां चेतःसंमोहि चेष्टितम् ॥ ४ ॥

---

श्लो. १. असक्तस्वान्तः, अत्यासक्तिमकुर्वाण इत्यर्थः ।

श्लो. २. वत्सलेषु, स्नेहविशिष्टेषु ; 'वत्सांसाभ्यां कामबले' इति लच्प्रत्ययः । स्यालानां वात्सल्यवशात्, स्यालेषु वात्सल्यवशेन ।

'स्यालेषु वात्सल्यवशेन तत्र चिरं न्यवात्सीद्रमयन्मृगाक्षीम् ।' । जी.च.का.

श्लो. ३. उद्वेगम्, दुःखम् ।

'प्रेम सत्यं तयोरेव ययोर्योगवियोगयोः ।
वत्सरा वासरीयन्ति वत्सरीयन्ति वासराः ॥' सुभाषितश्लोकः ।

श्लो. ४. निसर्गाय प्रभवतीति नैसर्गिकम्, स्वाभाविकम् । 'तस्मै प्रभवति संतापादिभ्यः' इति ठञ् ।

अप्राक्षीत्तां च साकूतां किमायातेति सादरः ।
विवक्षालिङ्गितं हि स्यात्प्रष्टुः प्रश्नकुतूहलम् ॥ ५ ॥
अत्र चायुधशालायां चैकदैवाविशेषतः ।
स्वामिन्स्वामिनमद्राक्षमित्यसौ प्रत्यभाषत ॥ ६ ॥
अतिमात्रं पवित्रोऽयमचित्रीयत तच्छ्रुतेः ।
अयुक्तं खलु दृष्टं वा श्रुतं वा विस्मयावहम् ॥ ७ ॥
**नन्दाढ्यः** किमिहायात इत्ययं पुनरौहत ।
संसारविषये सद्यः स्वतो हि मनसो गतिः ॥ ८ ॥

---

श्लो. ५. विवक्षालिङ्गितम्, वक्तुमिच्छया सहितम् ।

श्लो. ४–५. 'अथ कदाचिन्मन्दस्मितोद्गारिवदनारविन्दां * * प्रान्तमावर्तीं **जीवन्धरः** कांचिदायताक्षीमप्राक्षीत् ।

किं वक्तुकामासि कुरङ्गनेत्रि किमागता कोमलबन्धगात्रि ।
स्मितावदाता तव वक्त्रलक्ष्मीः संसूचयत्यादरतो विवक्षाम् ॥'

इति जी. च. का.

श्लो. ६. एकदैव, एकस्मिन्नेव समये । अविशेषतः, अविशेषं यथा तथा ; अभेदेनेत्यर्थः ।

'अत्र चायुधगृहेऽपि चैकदा त्वां निरीक्ष्य परिमण्डितं श्रिया ।
चित्रिते रमति चित्तमन्दिरे संमदो मम विवक्षया सह ॥'

इति जी. च. का.

श्लो. ७. अचित्रीयत, व्यस्मेष्ट । तच्छ्रुतेः, तस्या वाक्यश्रवणात् । अयुक्तं दृष्टं श्रुतं वा सत्, विस्मयावहं स्यात्खलु, इत्यन्वयः ।

श्लो. ७–८. 'इत्यादिवचनरचनामाकर्ण्य विस्मितान्तरङ्गः कुरुशशाङ्कः, किमिदमश्रुतदृष्टपूर्वमिति चिन्तयन्, क्रमेण **नन्दाढ्यः** समागतः किमित्यूहांचक्रे ।' इति जी. च. का.

प्रागेव तन्मनोवृत्तेः प्रययौ तत्र तद्वपुः ।
आस्थायां हि विना यत्नमस्ति वाक्कायचेष्टितम् ॥ ९ ॥

गत्वा तत्र च **नन्दाढ्यं** पश्यन्संमदसादभूत् ।
भ्रातुर्विलोकनं प्रीत्यै विप्रयुक्तस्य किं पुनः ॥ १० ॥

अनुजोऽपि तमालोक्य मुमुचे दुःखसागरात् ।
विस्मृतं हि चिरं भुक्तं दुःखं स्यात्सुखलाभतः ॥ ११ ॥

कथमाया इति ज्यायानन्वयुङ्क्त मिथोऽनुजम् ।
वञ्चनं चावमानं च न हि प्राज्ञैः प्रकाश्यते ॥ १२ ॥

सखेदं ध्यातदुःखोऽयमाचख्यौ वृत्तिमात्मनः ।
ध्यातेऽपि हि पुरा दुःखे भृशं दुःखायते जनः ॥ १३ ॥

पूज्यपाद तदास्माकं पापाद्भवति निर्गते ।

---

श्लो. ९. आस्थायां सत्यामिति शेषः ।
'वपुषा प्रथमं विवेश शालां मनसा चैव ततः कुरूद्वहः ।
कुतुकप्रसरे हि निर्निरोधे क्रमभावो न च तत्र लक्ष्यते ॥' जी. च. का.

श्लो. १०. संमदसात्, आनन्दभरितः; 'अधीनवचने' इति सातिप्रत्ययः । 'प्रमोदामोदसंमदाः' इत्यमरः ।

श्लो. ११. विस्मृतमिति,— चिरकालानुभूतमपि दुःखं सुखस्य प्राप्तौ विस्मृतं भवेदित्यर्थः ।

श्लो. १२. आयाः, समागतोऽसि । मिथः, एकान्ते ।
'कुरुवंशकेतुः कथं समागा इति सोऽन्वयुङ्क्त' इति जी. च. का.

श्लो. १३. ध्यातेति,— पुरानुभूते दुःखे स्मृते सत्यपि, तत्स्मरणेन जनस्तदानीं पुनर्नवीभूतदुःखो भवतीत्यर्थः ।

'**नन्दाढ्यो**ऽपि पूर्वजानुयोगसमुपगतपूर्वप्रकृतध्याननवीकृतमन्युः सदैन्यं साकूतं सादरं च वक्तुमुपाक्रमत ।' इति ग. चि. म.

श्लो. १४. पूज्यपाद, ज्येष्ठपादेत्यर्थः । 'पादा भट्टारको देवः प्रयोज्याः

मृतकल्पोऽप्यहं मर्तुं सर्वथा समकल्पयम् ॥ १४ ॥
विद्याविदितवृत्तान्ता कथंवृत्ता प्रजावती ।
इत्यालोच्यैव संस्थाने बोधो मे समजायत ॥ १५ ॥
एवंभाविभवद्दृष्टिशंभरत्वादहं पुनः ।
प्रजावतीगृहं प्राप्य सविषादमवास्थिषम् ॥ १६ ॥
स्वामिनि स्वामिहीनानां कुतः स्त्रीणां सुखासिका ।
इति वक्तुमुपक्रान्ते हृदयज्ञा तु साभ्यधात् ॥ १७ ॥

---

पूज्यनामतः' इति हेमः । मृतकल्पः, मृतप्रायः 'ईषदसमाप्तौ कल्पप्देशीयदेशीयरः' इतिकल्पप्प्रत्ययः ।

'भवति राजपुरात्सति निर्गते सपदि पापविपाकवशेन नः ।
सकलबन्धुगणस्य तदोत्थितो मनसि दुःसहशोकहुताशनः ॥
वाचामगोचरे शोकपारावारे निपातिताम् ।
निरीक्ष्य बन्धुतां दीनां मर्तुं व्यवसिता वयम् ॥' इति जी. च. का.

श्लो. १५. विद्याविदितवृत्तान्ता, अवलोकिन्याख्यया विद्यया विदितलोकप्रवृत्तिः । प्रजावती, भ्रातृजाया, **गन्धर्वदत्ता** । संस्थाने, योग्ये समये ।

'मरणोद्योगविस्मारितेतरवृत्तान्तानामस्माकं दैववशेन विद्याविदितवृत्तान्ता प्रजावती कथंवृत्तेति स्थाने बोधः समजायत ।' इति जी. च. का.

श्लो. १६. 'एवं भवद्दर्शनभाविसौख्यसंप्रापकादृष्टवशेन सद्यः ।
प्रजावतीमन्दिरमेत्य सोऽहं विषाददीनाक्षरमेवमूचे ॥'
इति जी. च. का.

श्लो. १४–१६. 'पूज्यपाद जगदुपप्लवकारिभवदुपप्लुतवार्तावात्यया निकामस्फूर्तिमदविषद्याभिषङ्गोऽपि * * जातु दुर्जयदुर्जातजातोऽहं किमिह देहभारं मुधा चिरमूद्वेति मन्युमौढ्येन मुमूर्षुर्भवन्, भाविभवदीयमुखाम्भोजदर्शनशंभरतया संभूतेन भूतभवद्भाविगोचरखेचराधिपसुताहृदयपरिज्ञानानन्तरमपहृतासुर्भवेयमिति विचारेण प्रतिषिद्धः प्रजावतीसदनमतिद्रुतमदुद्रुवम् ।' इति ग. चि. म.

श्लो. १७ स्वामिहीनानाम्, नष्टभर्तृकाणाम् ।

अङ्ग किं खिद्यसे ज्यायाननुपद्रव एव ते ।
वयमेव महापापा मध्येदुःखाब्धि पातिताः ॥ १८ ॥
प्रतिदेशं प्रतिग्रामं प्रतिगृह्येव मह्यते ।
विपच्च संपदे हि स्याद्भाग्यं यदि पचेलिमम् ॥ १९ ॥
द्रष्टुमिच्छसि चेद्वत्स तं जनं तव पूर्वजम् ।
किं नु ताम्यसि गम्येत क्वनु पापा हि भामिनी ॥ २० ॥
इत्युक्त्वा शाययित्वा च शय्यायां साभिमन्त्रितम् ।
मामत्रभवती चात्र सपत्रं प्राहिणोदिति ॥ २१ ॥

---

'प्रजावति विजानती सकलपद्धतिं त्वं कथं
बिभर्षि नवमालिकां कचकुले हरिद्रां तनौ ।
न युक्तमिदमास्थितं विगतभर्तृवामभ्रुवां
वृथा खलु सुखासिका सकललोकगर्हास्पदम् ॥' जी.च.का.

श्लो. १८. अङ्गेति संबोधने । ते ज्यायान्, तव पूर्वजः । अनुपद्रवः, उपद्रवरहितः, सुखेनावतिष्ठत इत्यर्थः ।

'अङ्ग तावकसहोदरवर्यस्तुङ्गपुण्यविभवेन मण्डितः ।
क्षेमवाञ्जगति सौख्यपरीतः पापतो वयमिहाततदुःखाः ॥'
इति जी. च. का.

श्लो. १९. मह्यते, पूज्यते । विपच्चेति,– भाग्ये फलोन्मुखे सति, विपच्च संपदात्मना परिणमेदिति भावः ।

श्लो. २०. गम्येत, त्वयेति शेषः । पापा, पापस्वरूपा । भामिनी, योषित् क्व, कुत्र गच्छेदित्यर्थः ।

श्लो. १९–२१. 'एवमगण्यपुण्यवशेन विपदमपि संपदात्मना परिणतामनुभवन्तं सुखमावसन्तं * * भवदीयाग्रजं द्रष्टुमिच्छसि चेद्गम्येतेति प्रतिपाद्य विद्यावैशद्येन स्मरतरङ्गिणीनाम्नि शयनतले शाययित्वा सपत्रं मामत्रभवती प्राहिणोत् ।' इति जी. च. का.

अखिद्यत ततः स्वामी सदैयैरनुजोदितैः ।
स्नेहपाशो हि जीवानामासंसारं न मुञ्चति ॥ २२ ॥
गुणमालान्यथाशंसि पत्रं चायमवाचयत् ।
चतुराणां स्वकार्योक्तिः स्वमुखान्न हि वर्तते ॥ २३ ॥
अन्यापदेशसंदेशात्खेचर्या खेदवानभूत् ।
विद्वेषः पक्षपातश्च प्रतिपात्रं च भिद्यते ॥ २४ ॥
प्रियाशोकश्रुतेर्जातः शोकोऽप्येतस्य नास्फुरत् ।
न हि प्रसादखेदाभ्यां विक्रियन्ते विवेकिनः ॥ २५ ॥

---

'ततः किमेवं साहसमनुतिष्ठति । पापिष्ठेयं स्त्रीसृष्टिरिव त्वमपि किमपरत्र गन्तुं न पारयसि । यदि कौतुकाविष्टोऽसि तव ज्येष्ठपादस्य श्रीपादसंदर्शने, शय्यतामिह शय्यायामिति मामामन्त्र्य मन्त्रनियन्त्रितं किमपि पावनं शयनमधिशयानमेनं जनं ततस्तत्समय एव समीहितार्थगर्भपत्रेण सममत्र प्राहिणोत् ॥' ग.चि.म.

श्लो. २२. स्वामी, **जीवंधरः**। जीवानां, प्राणिनाम् । आसंसारम्, संसारमभिव्याप्य । स्नेहपाश इति— 'உயிருள்ளவரையில் ஆசைவிடாது'.
பழமொழி.

'बन्धनान्यपि च सन्ति बहूनि स्नेहपाशकृतबन्धनं महत् ।' इत्यन्येऽपि.

श्लो. २३. 'अवाचयदसौ पत्रं सगर्भेण समर्पितम् ।
**गन्धर्वदत्ता**लिखितं विचित्राक्षरलक्षितम् ॥
आर्यपुत्र **गुणमाला** विज्ञापयत्येवम् * * ।' इति जी. च. का.

**गुणमाला**न्यथाशंसि, **गुणमालयानु**भूयमानस्य विरहवेदनाप्रकारस्य प्रख्यापकम् ।

श्लो. २४. अन्यापदेशसंदेशात्, अन्यापदेशरूपवाचिकात् । खेचर्याम्, **गन्धर्वदत्ता**निमित्तम् । प्रतिपात्रम्, वस्तुनि वस्तुनि ।

'इति प्रियाया अन्यापदेशलिखनपरिपाटीं मनसा चिन्तयन्, प्रियाशोकविदीर्णहृदयः कुरुकुमारः * *' इति जी. च. का.

श्लो. २५. प्रियाशोकश्रुतेः, **गन्धर्वदत्ता**दुःखश्रवणात् ।

वैवाहिकगृहस्थाश्च ह्यातस्थुरनुजं भृशम् ।
बन्धोर्बन्धौ च बन्धो हि बन्धुता चेदवञ्चिता ॥ २६ ॥

अवस्कन्दाद्गवां गोपा अथाक्रोशन्नृपाङ्गणे ।
पीडायां तु भृशं जीवा अपेक्षन्ते हि रक्षकान् ॥ २७ ॥

सानुक्रोशं तदाक्रोशं क्षमाधीशो न चक्षमे ।
पातापायान्न चेत्पायात्कुतो लोकव्यवस्थितिः ॥ २८ ॥

स्वामी श्वशुररुद्धोऽपि गोमोचनकृते ययौ ।
पराभवो न सोढव्योऽशक्तैः शक्तैस्तु किं पुनः ॥ २९ ॥

दस्यवोऽपि गवां तत्र मित्राण्येवाभवन्विभोः ।
एधोगवेषिभिर्भाग्ये रत्नं चापि हि लभ्यते ॥ ३० ॥

---

'भृशमतनुत दुःखभारमन्तर्वदनतले न विकारलेशलेशम् ।' जी. च. का.

२६. वैवाहिकगृहस्थाः, श्वशुरस्य राज्ञो **दृढमित्रस्य** गृहे, स्थिताः ; 'वैवाहिकः, विवाहेन संबद्धे कन्यापुत्रयोः श्वशुरे' इति शब्दस्तोममहानिधौ तारानाथतर्कवाचस्पतिभट्टाचार्यः । आतस्थुः, परिवव्रुः । अनुजम्, **नन्दाढ्यम्** । बन्धः प्रेमबन्धः । बन्धोर्भावः, बन्धुता ; भावार्थे तल् । अवञ्चिता, अकृत्रिमा ।

'समया कुरुकुञ्जरं निविष्टं कनकाद्रिं निकषेव शीतरश्मिः ।
अनुजं मनुजाधिपात्मजास्ते कुशलप्रश्नपुरःसरं परीयुः ॥' इति जी.च.का.

श्लो. ३०. दस्यवः, तस्कराः । विभोः, **जीवंधरस्ये**त्यर्थः । एधोगवेषिभिः, काष्ठान्वेषिभिः । 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः । भाग्ये सतीति शेषः ।

'விறகுவெட்டப்போனவனுக்கு நிதி கிடைத்தாற்போல'
பழமொழி.

'अथास्मिन्सौरभेयीगवेषिणि **सुदर्शन**सुहृदि, सुहृदामुपलम्भादेधोन्वेषिणि मणिलाभादिव स्फीतमुदि * *' इति ग. चि. म.

समोऽभूत्स्वामिमित्रेषु स्नेहश्चान्योन्यवीक्षणात् ।
एककोटिगतस्नेहो जडानां खलु चेष्टितम् ॥ ३१ ॥
जामातरि चमत्कारो राज्ञोऽभून्मित्रवीक्षणात् ।
कृतिनोऽपि न गण्या हि वीतस्फीतपरिच्छदाः ॥ ३२ ॥
समित्रावरजोऽह्यप्यदतिमात्रमसौ कृती ।
एकेच्छानामतुच्छानां न ह्यन्यत्संगमात्सुखम् ॥ ३३ ॥
अयथापुरसंमानात्समशेत सखीनसौ ।
विशेते हि विशेषज्ञो विशेषाकारवीक्षणात् ॥ ३४ ॥
रहस्येव वयस्येषु तन्निदानमचोदयत् ।
एककण्ठेषु जाता हि बन्धुता ह्यवतिष्ठते ॥ ३५ ॥
मुख्यं सख्यं गतस्तेषामाचख्यौ पङ्कजाननः ।

---

**श्लो. ३१.** एककोटिगतः, एकपक्षगतः ।
'प्रेम रम्यमुभयोः समं दिशोः कामिनां यदिह चाषपिच्छवत् ।
एकतस्तु न चकास्ति साध्वपि श्यामपृष्ठमिव बर्हिणश्छदम् ॥'
इति बालरामायणनाटके ।

**श्लो. ३२.** चमत्कारः, लोकातीतवस्तुदृष्ट्या चित्तस्यानन्दहेतुः । वीतः, विनाकृतः समृद्धः परिच्छदः परिवारो येषां ते वीतस्फीतपरिच्छदाः ।

**श्लो. ३४.** विशेते, संशेते ।

'कदाचिदयं **सुदर्शन**मित्रः, स्वमित्राणामतिमात्रबहुमत्याः कोऽत्र हेतुः, अस्मदीयक्षत्त्वता किमवगता, किंस्विदन्यदमीषां बहुमतेरयथापुर्वे निदानम्, इति संशयानस्तत्परीक्षणाय दत्तक्षणः, क्वचिद्रहस्योद्देशे वयस्यान्पप्रच्छ ।' ग.चि.म.

**श्लो. ३५.** एककण्ठेषु, एकाभिप्रायेषु । बन्धुता, बन्धुत्वम् ; भावार्थे तल् ।

**श्लो. ३४–३६.** 'कदाचिदेकान्ते भृशमपूर्वसंमानसमाहितसंशयडोलायमानमनःसरोजेन कुरुराजेन चोदिततन्निदानानां सहचराणां तिलकायमानः **पद्मवदनः** प्रत्युत्तरशैलीमेवमुपादत्त ।' इति जी. च. का.

सज्जनानां हि शैलीयं सक्रमारम्भशालिता ॥ ३६ ॥
स्वामिन्स्वामिवियोगेऽपि युक्ता दग्धासुभिर्वयम् ।
अस्तोकभाविभाग्येन हस्तग्राहं ग्रहादिव ॥ ३७ ॥
साश्वासाश्च ततो देव्या दत्तहस्तावलम्बनाः ।
प्रास्थिष्महि धुरं प्राप्ता वयमश्वीयपाणिनाम् ॥ ३८ ॥
अतिलङ्घ्य ततोऽध्वानमध्वश्रमविहानये ।
दण्डकारण्यविख्यातं तापसाश्रममाश्रिताः ॥ ३९ ॥
दर्शंदर्शं ततो दृश्यं विहरन्तोऽत्र विश्वतः ।
अपश्याम क्वचित्कांचित्पुण्यतः पुण्यमातरम् ॥ ४० ॥
तन्मात्रा दृष्टमात्रेण कुत्रत्या इति चोदिताः ।

---

श्लो. ३६. 'तथा पृष्टानां वयस्यप्रष्ठोऽयं प्रदर्शितप्रश्रयोत्कर्षो व्याहार्षीदेवं हर्षोत्फुल्लमुखः **पद्ममुखः** ।' इति ग. चि. म.

श्लो. ३८. अश्वीयम्, अश्वानां समूहः; 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' इति छप्रत्ययः । अश्वीयं पणितुं शीलमेषामस्तीति, अश्वीयपाणिनः, तेषां अश्वीयपाणिनाम् ।

श्लो. ३७–३८. 'स्वामिंस्त्वदीयविरहानलदग्धदेहाः
श्रीमद्भविष्यदवलोकनपुण्यपाकैः ।
आश्वासिताश्च दयया द्रुतदत्तहस्ता
देव्या बभूविम वयं हयपाणिवेषाः ॥' इति जी. च. का.

श्लो. ३९. अतिलङ्घ्य ततोऽध्वानम्, तदनन्तरमतिलङ्घितबहुदूराध्वान इत्यर्थः । अध्वश्रमविहानये, विश्रान्तिसुखानुभवायेत्यर्थः ।

श्लो. ४०. विश्वतः, सर्वप्रदेशेषु । दृश्यम्, दर्शनीयम्, मनोहरम् ।

'क्वचन तापसजनसंकुले प्रदेशे विशमानाः, क्रमेण किंचित्तरुमूलमावसन्तीं कांचन पुण्यमातरमपश्याम ।' इति जी. च. का.

श्लो. ३८–४१ 'देव देवस्यान्वेषणाय वयमश्वीयपणायिनामवलम्ब्य धुरं

वयमप्युत्तरं वक्तुमुपक्रम्य यथाक्रमम् ॥ ४१ ॥
अस्ति **राजपुरे** कश्चिद्विबुधानामपश्चिमः ।
विशां च **जीवकाख्यो**ऽयमेतं जीवातुका वयम् ॥ ४२ ॥
**काष्ठाङ्गारा**ह्वयः कोऽपि कोपादेनमनेनसम् ।
हन्तुं किलेत्यवोचाम मूर्च्छिता सा च पेतुषी ॥ ४३ ॥
हन्त हन्त हतो नायमम्बेत्यभिहिता मया ।
पिहितासुप्रयाणा सा प्रालपल्लब्धचेतना ॥ ४४ ॥

---

**राजपुर्या** विनिर्गत्य, त्रिचतुरैर्वासरैः * * **दण्डकारण्या**न्तर्गतं कमपि तापसाश्रममध्वश्रमादाश्रित्य, तत्रत्यानशेषानपि विशेषान्पश्यन्तः, क्वचिदपश्याम नश्यद्भूषामपि भूम्ना देहसौन्दर्यस्य दर्शितदेवमातृगौरवां कामपि जगन्मातरम्' ग. चि म.

**श्लो. ४१.** तन्मात्रा, तया मात्रा । दृष्टमात्रेण, दर्शनोत्तरकाल एव ।

**श्लो. ४१–४२.** एतं जीवातुकाः, अस्यानुजीविनः ।

'तया मात्रा दृष्टमात्रेण कुत्रत्या इति पृष्टा एवमुत्तरं वक्तुमुपक्रम्य,

कश्चि**ज्जीवक**विख्यातो विपश्चिद्वृन्दशेखरः ।
अभा**द्राजपुरे** सोऽयमस्माकं जीवनौषधम् ॥' इति जी. च. का.

'पुनरनया दयाजनन्या मान्या यूयं कुत्या इत्यादरमनुयुक्ता वयमत्र प्रत्युत्तरमुदीरयितुमुपक्रम्य, देवि वयममी **राजपुरी**वास्तव्यवैश्यपतिसूनोर्दीनजीवजीवातो**र्जीवक**कुमारस्य सुहृदः किल, अस्मद्दुष्कृतबलेन कृतघ्नप्रष्ठः **काष्ठाङ्गारो** नाम राजापशदः कदाचिदमुष्य पराक्रममसृष्यन्केनापि दोषमिषेण कुमारमेनं मारयितुमित्येतावदवोचामहि । तावता तद्देव्याः संजातामापदमिरंमदात्तिद्धशयोरिवेत्थमिति वक्तुमिदानीमपि न जानीमहे ।' इति ग. चि. म.

**श्लो. ४३.** अनेनसम्, न विद्यते एनो दोषो यस्य तम्; निरपराधमम् मूर्च्छिता, नष्टसंज्ञा ।

**श्लो. ४४.** पिहितासुप्रयाणा, निरुद्धप्राणप्रयाणा । लब्धचेतना, लब्धसंज्ञा ।

अम्भोदालीव दम्भोलीममृतं च मुमोच सा ।
देवी समं प्रलापेन देवोदन्तमिदन्तया ॥ ४५ ॥

तन्मुखात्खादिवोत्पन्नां रत्नवृष्टिं तवोन्नतिम् ।
उपलभ्य वयं लब्धाममन्यामहि तन्महीम् ॥ ४६ ॥

देववैभवसंकीर्त्या ततो देवीं पुनः पुनः ।
आश्वास्यापृच्छ्य तद्देशादिमं देशं गता इति ॥ ४७ ॥

मातुर्जीवन्मृतिज्ञानात्तत्त्वज्ञः सोऽप्यखिद्यत ।
जीवानां जननीस्नेहो न ह्यन्यैः प्रतिहन्यते ॥ ४८ ॥

अत्वरिष्ट च तां द्रष्टुं कौरवो गुरुगौरवः ।
अम्बामदृष्टपूर्वां च द्रष्टुं को नाम नेच्छति ॥ ४९ ॥

व्यस्मारि मातरि स्नेहान्मान्येनान्यदशेषतः ।
रागद्वेषादि तेनैव बलिष्ठेन हि बाध्यते ॥ ५० ॥

---

**श्लो. ४५.** दम्भोलिम्, अशनिम् ; 'दम्भोलिरशनिर्द्वयोः' इत्यमरः । अमृतम्, जलम् ; 'पयः कीलालममृतम्' इत्यमरः । देवोदन्तम्, देवस्य **जीवकस्य** वृत्तान्तम् ।

'वयं तु पुनरिदंतया विदितदेवोदन्ताः ।' इति ग. चि. म.

**श्लो. ४६.** खात्, आकाशात् ; 'नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्' इत्यमरः ।

**श्लो. ४५–४७.** 'इत्यादिप्रलापवशेन शोकलहरीं देवोदन्तं चाम्भोदालीमिव दम्भोलीममृतं च मुञ्चन्तीं पुण्यमातरं बहुधा समाश्वास्य तन्मुखादुत्पन्नां देवोन्नतिं नभसो निपतितां रत्नवृष्टिमिव बहुमन्यमाना वयं पुनःपुनस्तामापृच्छ्य च श्रीमत्संनिधिमुपागता इति ।' इति जी. च. का.

**श्लो. ४८–४९.**

'जीवन्मृतां तां जननीं विदित्वा **जीवंधरो**ऽखिद्यत रक्तचित्तः ।
मातुर्गुरुस्नेहवशेन सोऽयं द्रष्टुं क्षणात्तामिह तत्वरे च ॥' जी. च. का.

अन्वजिज्ञपदात्मीयां गतिं भार्यां परानपि ।
आवश्यकेऽपि बन्धूनां प्रातिकुल्यं हि शल्यकृत् ॥ ९१ ॥

अनुनीयानुगान्बन्धून्प्रसभं प्रययौ ततः ।
अनुनयो हि माहात्म्यं महतामुपबृंहयेत् ॥ ९२ ॥

प्रसवित्रीं ततः प्रेक्ष्य प्रेमान्धोऽभूदवन्ध्यधीः ।
तत्त्वज्ञानतिरोभावे रागादि हि निरङ्कुशम् ॥ ९३ ॥

जातजातक्षणत्यागाज्जातं दुर्जातमक्षिणोत् ।
सुतवीक्षणतो माता सुतप्राणा हि मातरः ॥ ९४ ॥

सूनोर्वीक्षणतस्तप्ता क्षोणीशं तमियेष सा ।
लाभं लाभमभीच्छा स्यान्न हि तृप्तिः कदाचन ॥ ९५ ॥

---

श्लो. ९१. गतिम्, गमनम् । आवश्यकेऽपि, आवश्यककार्येऽपि । शल्यकृत्, दुःसहव्यथाजनकमित्यर्थः ।

श्लो. ९२. अनुगान्बन्धून्, अनुयायिनः स्यालादीन्बन्धून् ।

श्लो. ९१–९२. 'तदनु कुरुकुमुदिनीकान्तस्तत्क्षणमेव सकलबन्धून्विशेषतो भार्यामापृच्छयानुनीय चानुगमनकलितकुतुकनृपतनयनिचयं क्रमेण विसृज्य सहचरमण्डलमण्डितो **दण्डकारण्य**माजगाम ।' इति जी. च. का.

श्लो. ९३. अवन्ध्यधीः, अवन्ध्या कार्यनिष्पादनदक्षा धीः बुद्धिर्यस्य सः । निरङ्कुशम्, अप्रतिहतम् ।

श्लो. ९४. जातजातक्षणत्यागात्, जातस्य पुत्रस्य जातक्षण एव जननानन्तरकाल एव त्यागात् त्यजनात् । दुर्जातम्, दुःखम् ।

श्लो. ९५. क्षोणीशं तमियेष सा,— सा तस्य राज्यप्राप्तिमाचकाङ्क्षेत्यर्थः ।

'निस्वो निष्कशतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेशतां वाञ्छति ।

कच्चित्पितुः पदं ते स्यादङ्ग पुत्रेत्यचोदयत् ।
सामग्रीविकलं कार्यं न हि लोके विलोकितम् ॥ ९६ ॥

अम्ब किं बत खेदेन बाढं स्यादिति सोऽभ्यधात् ।
मुग्धेष्वतिविदग्धानां युक्तं हि बलकीर्तनम् ॥ ९७ ॥

पुत्रवाक्येन हस्तस्थां मेने माता च मेदिनीम् ।
मुग्धाः श्रुतविनिश्चेया न हि युक्तिवितर्किणः ॥ ९८ ॥

अपायस्थानमस्तोकं दूरक्षं व्याहरद्भिभोः ।
अमित्रो हि कलत्रं च क्षत्रियाणां किमन्यतः ॥ ९९ ॥

कर्तव्यं च ततो मात्रा मन्त्रितं तेन मन्त्रिणा ।
विचार्यैवेतरैः कार्यं कार्यं स्यात्कार्यवेदिभिः ॥ ६० ॥

प्राहिणोत्प्रसवित्रीं तां मातुलोपान्तिके कृती ।
न हि मातुः सजीवेन सोढव्या स्याद्दुरासिका ॥ ६१ ॥

---

चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्राह्मं पदं वाञ्छति
ब्रह्मा शंभुपदं हरो हरिपदं चाशावधिं को गतः ॥' इत्यन्येऽपि ।

श्लो. ५८. मुग्धा इति,—

'सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ।'

इति मालविकाग्निमित्रीये ।

श्लो. ५९. दूरक्षम्, कृच्छ्रेण रक्ष्यम् । अमित्रः, शत्रुः । अमति, गच्छति; 'अमेर्द्विषति चित्' इतीत्रन् ।

श्लो. ६०. मान्त्रिणा, अवश्यं मन्त्रयत इति मन्त्री, तेन । तेन, **जीवंधरेण** ।

श्लो. ६१. 'मातरं मातुलस्य सम्राजः सद्मनि प्रहित्य प्रसभं स्वयमपि **राजपुरीं** प्रति प्रतस्थे ।' इति ग. चि. म.

दुरासिका, दुरवस्था ।

ततः सुपरितोषोऽयं परिव्राजकपार्श्वतः ।
निकषा स्वपुरं प्राप्य तदारामे निषण्णवान् ॥ ६२ ॥
तत्र मित्राण्यवस्थाप्य व्यहरत्परितः पुरीम् ।
विशृङ्खला न हि क्वापि तिष्ठन्तीन्द्रियदन्तिनः ॥ ६३ ॥
ततो राजपुरीं वीक्ष्य सुतरामतृपत्सुधीः ।
ममत्वधीकृतो मोहः सविशेषो हि देहिनाम् ॥ ६४ ॥
क्रीडन्ती कापि हर्म्याग्रात्पातयामास कन्दुकम् ।
संपदामापदां चाप्तिर्व्याजेनैव हि केनचित् ॥ ६५ ॥
उद्वक्त्रस्तद्गतीं सूत्यां दृष्ट्वासुह्यदबाह्यधीः ।
वशिनां हि मनोवृत्तिः स्थान एव हि जायते ॥ ६६ ॥
तन्मोहादयमध्यास्त तत्सौधाग्रवितर्दिकाम् ।
अञ्जसा कृतपुण्यानां न हि वाञ्छापि वञ्चिता ॥ ६७ ॥

---

श्लो. ६२. परिव्राजकपार्श्वतः, दण्डकारण्यवर्तितापसजनसमीपतः ।

श्लो. ६३. विशृङ्खलाः, अप्रतिबन्धाः ।

श्लो. ६६ उद्वक्त्रः, उन्नमितवदनः । सूत्याम्, युवतीम् । 'क्रौड्यादिभ्यश्च' इति ष्यङ्प्रत्ययः ।

'अङ्गजायां हि सूत्यायामयोग्यं कालयापनम् ।' इति ३ ल. श्लो. ३८.
'विमला कमलोद्भूता सुता सूत्या च साभवत् ।' इति ८ ल. श्लो. ६९.
'पत्नी मे कमला सुता च विमला सूत्या किलैषाभवत् ।' जी. च. का.

वशिनामिति,— 'असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥'
इति शाकुन्तले.

श्लो. ६७. 'एवं वदन्मुदा स्वामी तत्सौधाग्रवितर्दिकाम् ।
अलंचकार पण्यश्रीकूलंकषगुणाकरः ॥' इति जी. च. का.

वैश्येशः कोऽपि तं पश्यन्व्याजहे विकसन्मुखः ।
चिरकाङ्क्षितसंप्राप्त्या प्रसीदन्ति हि देहिनः ॥ ६८ ॥
भद्र **सागरदत्तो**ऽहं भवत्येष ममालयः ।
**विमला कमलो**द्भूता सुता सूत्या च साभवत् ॥ ६९ ॥
रत्नजालमविक्रीतं विक्रीयेत यदागमे ।
भाविज्ञास्तं पतिं तस्याः समुत्पत्तावजीगणन् ॥ ७० ॥
भवत्यत्र पविष्टे च दृष्टमेतदलं परैः ।
भाग्यधिक भवानेव योग्यः परिणयेदिति ॥ ७१ ॥
तन्निर्बन्धादयं चाभूदनुमन्ता तथाविधौ ।
वाञ्छितार्थेऽपि कातर्यं वशिनां न हि दृश्यते ॥ ७२ ॥
अथ **सागरदत्तेन** दत्तां **सत्यंधरा**त्मजः ।
व्यवह**द्विमलां** कन्यां हव्यवाहसमक्षकम् ॥ ७३ ॥

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्त्रचूडामणौ विमलालम्भो नामाष्टमो लम्बः ।

---

**श्लो. ६९–७१.** भाविज्ञाः, ज्यौतिषिकाः ।
'श्रीमन्**सागरदत्त** इत्यभिहितः सोऽहं ममेदं गृहं
पत्नी मे **कमला** सुता च **विमला** सूत्या किलैषाभवत् ।
विक्रीयेत यदागमे मणिगणः पूर्वस्थितोऽभ्यन्तरं
तं तस्याः पतिमभ्यधुर्जननसल्लग्ने हि कार्तान्तिकाः ॥' जी.च.का.

"कुमार, अहमस्मि **सागरदत्तो** नाम । मम सागारधर्मपत्नी **कमला** । **विमले**ति विश्रुता तत्पुत्री । जातमात्रायां तस्यां संगिरते स्म गणितज्ञगणः, 'यस्मिन्महात्मनि निजसद्म समीयुषि क्षणादक्रय्यसंचितमणिविक्रयः स्यात्तस्येयं गृहिणी' इति । गृहागते भवति विक्रीतश्च वीतक्रेतृतया पुरा पुञ्जितो मम रत्नराशिः । ततः सर्वथा योग्यां मम सुतां भाग्याधिकःपरिणयतु ॥" इति ग.चि.म.

# नवमो लम्बः ।

—ः*ः—

अथ व्यूढामतिस्निग्धां गाढस्नेहोऽन्वभूदिमाम् ।
वाञ्छिता यदि वाञ्छेयुः ससारैव हि संसृतिः ॥ १ ॥

ततोऽनुनीय तां हित्वा स मित्रैः समगच्छत ।
अन्यरोधि न हि क्वापि वर्तते वशिनां मनः ॥ २ ॥

वरचिह्नं तमालोक्य बह्वमन्यन्त बान्धवाः ।
ऐहिकातिशयप्रीतिरतिमात्रा हि देहिनाम् ॥ ३

अब्रवीदस्य सोत्प्रासं **बुद्धिषेणो** विदूषकः ।
बहुद्वारा हि जीवानां पराराधनदीनता ॥ ४ ॥

सुलभाः खलु दौर्भाग्यादन्योपेक्षितकन्यकाः ।
व्यूढायां **सुरमञ्जर्यां** पौरोभाग्यं भवेदिति ॥ ५ ॥

---

श्लो. २. 'ततो लताङ्गीमनुनीय रामां हित्वा स मित्रैः समगच्छतायम् ।'
इति जी. च. का.

अन्यरोधि, अन्यप्रतिरोधकम् ।

श्लो. ३. 'वरचिह्नमेनमवलोक्य बान्धवा मणिभूषणाञ्चिततनुं कुरूद्वहम् ।
बहुमेनिरे मधुमिवाङ्कुरस्फुटचूतपल्लवकुलं वनप्रियाः॥'जी.च.का.

वरस्य चिह्नानि यस्य तम् ।

श्लो. ४. सोत्प्राशम्, सप्रहासम । 'स्यादाच्छुरितकं हासः सोत्प्रासः' इत्यमरः ।

श्लो. ५. दौर्भाग्याद्धेतोः । पुरः अधिको भागो भाग्यं यस्य तस्य भावः पौरोभाग्यम्, माहाभाग्यमित्यर्थः । 'पुरोऽधिकमुपर्यग्राणि' इत्यमरः । 'भाग्यैकदेशयोर्भागः' इति रुद्रः ।

'अन्यैरुपेक्षितां कन्यां पाणीकृत्य प्रमोदतः ।
सखे निर्लज्जमात्मानं कृतार्थमिव मन्यसे ॥

तद्वाक्यादयमुद्वोढुमवाञ्छीत्तां च मानिनीम् ।
हेतुच्छलोपलम्भेन जृम्भते हि दुराग्रहः ॥ ६ ॥
तत्राप्यौपयिकं भूयो यक्षमन्त्रं व्यचीचरत् ।
अनपायादुपायाद्धि वाञ्छितातिर्मनीषिणाम् ॥ ७ ॥
वार्धकं तत्र चोपायमुपायज्ञोऽयमौहत ।
करुणामात्रपात्रं हि बाला वृद्धाश्च देहिनाम् ॥ ८ ॥
वार्धकं तत्क्षणे चास्य मनुमाहात्म्यतोऽभवत् ।
अनवद्या सती विद्या फलमूकापि किं भवेत् ॥ ९ ॥
विजहार पुनश्चायं वर्षीयान्परितः पुरीम् ।
अन्यैरशङ्कनीया हि वृत्तिर्नीतिज्ञगोचरा ॥ १० ॥

---

भवाञ्श्लाघ्यस्तदा मित्र व्यूढा चेत्सुरमञ्जरी ।
नरविद्वेषगम्भीरी नवतारुण्यमञ्जरी ॥' इति जी. च. का.

श्लो. ६. हेतुच्छलोपलम्भेन, हेतुरिति छलं व्याजः तस्योपलम्भेन प्राप्त्या ।

श्लो. ७. औपयिकम्, उपायभूतम्, युक्तम्; 'युक्तमौपयिकं लभ्यम्' इत्यमरः । 'विनयादिभ्यष्ठक्; उपायाद्ध्रस्वश्च' इति ठक् ह्रस्वश्च । यक्षमन्त्रम्, सुदर्शनयक्षोपदिष्टं मन्त्रम् । 'ततश्च विभाव्य क्षणादेव यक्षोपदिष्टमनुमहिम्ना सौकुमार्यं निवार्य' इति ग. चि. म.

'अज्ञाग्रेसरस्तत्परिणयोपायं मनसा चिन्तयन्, क्रमेण यक्षमन्त्रमेव तत्समर्थापनतन्त्रं निश्चिकाय ।' इति जी. च. का.

श्लो. ८. वार्धकम्, वृद्धत्वम्; 'द्वन्द्वमनोज्ञादिभ्यश्च' इति वुञ्प्रत्ययः । 'वार्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणि' इति विश्वः । संघातार्थे 'वृद्धाच्च' इति वुञ् ।

श्लो. ९. मनुमाहात्म्यतः, मन्त्रमाहात्म्येन । सती, प्रशस्ता । अनवद्या, निर्दोषा । फलमूका, फलरहिता ।

श्लो. १०. वर्षीयान्, अतिवृद्धः । 'द्विवचनविभज्योपपदे तरबीयसुनौ' इतीः

प्रवयोविप्रवेषं तं वीक्षमाणा विवेकिनः ।
विषयेषु व्यरज्यन्त वार्धकं हि विरक्तये ॥ ११ ॥
मक्षिकापक्षतोऽप्यच्छे मांसाच्छादनचर्मणि ।
लावण्यं भ्रान्तिरित्येतन्मूढेभ्यो वक्ति वार्धकम् ॥ १२ ॥
प्रतिक्षणविनाशीदमायुः कायमहो जडाः ।
नैव बुध्यामहे किंतु कालमेव क्षयात्मकम् ॥ १३ ॥
हन्त लोको वयस्यन्ते किमन्यैरपि मातरम् ।
मन्यते न तृणायापि मृतिः श्लाघ्या हि वार्धकात् ॥ १४ ॥
इत्याद्यूहं च हास्यं च जनयन्प्राज्ञबालयोः ।
अगारं **सुरमञ्जर्या** वर्षीयान्पुनरासदत् ॥ १५ ॥

---

यसुन । 'प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घबृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघबृन्दाः' इति वर्षादेशः । परितः पुरीम्,— 'अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि' इति द्वितीया ।

**श्लो. ११.** प्रवयोविप्रवेषम्, वृद्धब्राह्मणवेषम् । 'प्रवयाः स्थविरो वृद्धः' इत्यमरः ।

**श्लो. १२.** अच्छे, लघुनि ।

**श्लो. १३.** प्रतिक्षणविनाशि, क्षणेक्षणे नाशशीलम् । जडाः वयमिति शेषः ।

**श्लो. १४.** अन्ते वयसि, पश्चिमे वयसि ॥ मन्यते न तृणायापि,— तृणतुल्यामपि न मन्यत इत्यर्थः । 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इति चतुर्थी । नौकाकान्नशुकशृगाला एते प्राणिनो वैयाकरणजनानाम् । मन्यतेः कर्मणि विशेषण एव चतुर्थी । तेनोद्देश्यभूतान्नेति भावः ॥ हन्तेति,— जना वृद्धभावमुपगतां मातरमपि तृणतुल्यामपि न मन्यन्ते । अतो मरणं वरं न पुनर्वार्धकमित्यर्थः ।

**श्लो. १५.** प्राज्ञबालयोः क्रमादूहं च हास्यं च जनयन् ।

'इमं स्थविरमवलोक्य, पौरेषु केचिद्वैराग्यपरायणाः, अपरे हासप्रवणा, इतरे विलसत्करुणाः, संबभूवुः ।' इति जी. च. का.

दृष्टो दौवारिकस्त्रीभिराचष्ट फलमागतेः ।
कुमारीतीर्थमात्मार्थं न ह्यसत्यं सतां वचः ॥ १६ ॥

अहसन्नथ तद्वाक्यादङ्गना अप्यसंगतात् ।
अविवेकिजनानां हि सतां वाक्यमसंगतम् ॥ १७ ॥

अरुद्धः कृपया ताभिरगाहिष्ट च तद्गृहम् ।
सर्वथा दग्धबीजाभाः कुतो जीवन्ति निर्घृणाः ॥ १८ ॥

अभ्यधुः **सुरमञ्जर्याः** सुन्दर्यः सभया इदम् ।
सभयस्नेहसामर्थ्याः स्वाम्यधीना हि किंकराः ॥ १९ ॥

---

श्लो. १६. कुमारीतीर्थम्,— कुमारीतीर्थमिति कस्यचित्पुण्यतीर्थस्य संज्ञेति मनसि धृतं सुरमञ्जरीदौवारिकाभिः । 'निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ' इत्यमरः । 'योनौ जलावतारे च मन्त्र्याद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यात्' इति हलायुधः ॥ अत्र संदर्भे, जीवकचिन्तामणौ 'நீர்க் குமரி' इति भाषया समावेशो दृश्यते ।

'வந்தவர் வெண்ணையென வாட்கண்மட வாய்கேள்
சிந்தைநலி கின்றதிரு நீர்க்குமரி யாட
வந்திலத னையபய னென்னைமொழி யென்றாள்
முந்திநலி கின்றமுது மூப்பொழியு மென்றான்.'

ஜீவகசிந்தாமணி.

"दौवारिकयोषित्सार्थेन 'किमर्थमिहोपस्थितम् । अवस्थीयतामत्रैव विप्र त्वया । नैवान्तःपुरं प्रविश्यताम् । इत्यादिश्यमानोऽपि कुमारः 'कुमारीतीर्थस्नानेन वार्धकमेतदपसारयितुमुपसर्पामि' इत्युदीरयन्नवधीर्य निवारणोपक्रममपसर्तुमुपाक्रंस्त तद्गृहाभ्यन्तरम् ।" इति ग. चि. म.

श्लो. १७. असंगतात्, अप्रस्तुतात् ।

श्लो. १९. सुरमञ्जर्याः समक्षमिति शेषः ।

'तदनु भयाकुलाः काश्चन कमललोचनाः × × सुरमञ्जरीसमक्षमेत्य सगद्गदमेवमवादिषुः ।' इति जी. च. का.

पुरुषद्वेषिणी सापि वर्षीयांसं न्यशामयत् ।
भवितव्यानुकूलं हि सकलं कर्म देहिनाम् ॥ २० ॥
बुभुक्षितं तमालक्ष्य भोजयामास सा सती ।
अन्तस्तत्त्वस्य याथात्म्ये न हि वेषो नियामकः ॥ २१ ॥
भुक्त्वाथ वार्धकेनेव सुष्वाप तलिमे कृती ।
योग्यकालप्रतीक्षा हि प्रेक्षापूर्वविधायिनः ॥ २२ ॥
भुवनमोहनं गानमगासीदथ गानवित् ।
परस्परातिशायी हि मोहः पञ्चेन्द्रियोद्भवः ॥ २३ ॥
गानकौशलतः सैनं शक्तिमन्तममन्यत ।
विशेषज्ञा हि बुध्यन्ते सदसन्तौ कुतश्चन ॥ २४ ॥
ततः स्वकार्यमप्यस्मात्सादराभूत्परीक्षितुम् ।
स्वकार्येषु हि तात्पर्यं स्वभावादेव देहिनाम् ॥ २५ ॥
गानवच्छक्तिरन्यत्र किमस्तीत्यन्वयुङ्क्त सा ।
याञ्चायां फलमूकायां न हि जीवन्ति मानिनः ॥ २६ ॥

---

श्लो. २१ बुभुक्षितम्, क्षुधितम् । नियामकः, नियन्ता । अन्तस्तत्त्वस्य, अन्तःस्वरूपस्य । 'तत्त्वं परात्मनि । वाद्यभेदे स्वरूपे च' इति हेमः । याथात्म्ये, याथार्थ्ये । वेषः, कृत्रिम आकारः ।

'द्विजातिवृद्धं पुरतो निषण्णं बुभुक्षितं वीक्ष्य सरोरुहाक्षी ।
समादिदेशाथ सखीसमाजं तद्भोजनाय प्रचुरादरेण ॥' इति जी. च. का.

श्लो. २२. तलिमे, तल्पे । प्रेक्षा, बुद्धिः । प्रेक्षापूर्वविधायिनः, विमृश्यकारिण इत्यर्थः ।

श्लो. २३. 'भुवनमोहनं', 'भुवनं मोहनं' इति पाठद्वयं दृश्यते । 'पवित्रकुमारः कुवलयैकमोहनं गानमतानीत् ।' ग. चि. म.

श्लो. २४. सदसन्तौ, विद्वदविद्वज्जनौ; 'सन्सुधीः कोविदो बुधः' इत्यमरः ।

श्लो. २६. फलमूकायाम्, फलरहितायां सत्याम् ।

बाढमस्ति समस्तेपीत्यब्रवीत्प्रौढनैपुणः ।
उक्तिचातुर्यतो दार्ढ्यमुक्तार्थे हि विशेषतः ॥ २७ ॥

अभीप्सितवरप्राप्तावुपायं साप्ययाचत ।
रागान्धे हि न जागर्ति याच्ञादैन्यवितर्कणम् ॥ २८ ॥

कामं कामप्रदं सोऽयं कामदेवमुपादिशत् ।
मनीषितानुकूलं हि प्रीणयेत्प्राणिनां मनः ॥ २९ ॥

मनीषितं च हस्तस्थं मेने सा **सुरमञ्जरी** ।
मनोरथेन तृप्तानां मूललब्धौ तु किं पुनः ॥ ३० ॥

अन्वैषीत्तामसौ पश्चात्कामकोष्ठं यथेप्सितम् ।
विचाररूढकृत्यानां व्यभिचारः कुतो भवेत् ॥ ३१ ॥

कामं सा प्रार्थयामास **जीवकस्वामि**काम्यया ।
जन्मान्तरानुबन्धौ हि रागद्वेषौ न नश्यतः ॥ ३२ ॥

लब्धो वर इति प्रोक्त **बुद्धिषेणेन** सा सती ।
मनोभुवो वचो मेने स्त्रीणां मौग्ध्यं हि भूषणम् ॥ ३३ ॥

---

श्लो. २८. अभीप्सितवरप्राप्तौ, अभिलषितपतिप्राप्तौ । वितर्कणम्, विचारः ।

श्लो. २९. कामप्रदम्, वाञ्छितार्थस्य दातारम् । मनीषितानुकूलम्, कामितार्थानुकूलं वचनमिति शेषः ।

श्लो. ३१. कामकोष्ठम्, मन्मथगृहम् । विचाररूढकृत्यानाम्, विचारेण पर्यालोचनया रूढं निश्चितं कृत्यं कार्यं येषां तेषाम् । व्यभिचारः, कार्याभावः ।

श्लो. ३२. **जीवककाम्यया**, आत्मनः **जीवके**च्छया । 'काम्यच' इति जीवकशब्दात्काम्यच्प्रत्ययः। 'अप्रत्ययात्' इति जीवककाम्यधातोरकारप्रत्ययः । ततष्टाप् । तया । जीवकप्राप्त्यपेक्षयेत्यर्थः ।

'प्राणनाथतां प्रतिपद्येत **जीवककुमार** इति सादरं सप्रणामं च प्रार्थयामास ।' इति ग. चि. म.

श्लो. ३३. लब्धो वर इति,— लब्धवत्यसि प्राणनाथमिति । स्त्रीणां

कुमारं दर्शिताकारं दृष्ट्वा जिह्राय तत्क्षणे ।
मृतकल्पा हि कल्पन्ते निर्लज्जा निष्कृपा इव ॥ ३४ ॥

पतिकृत्येन पत्नीं तां सुतरां सोऽप्यतोषयत् ।
संसारोऽपि हि सारः स्याद्दम्पत्योरेककण्ठयोः ॥ ३५ ॥

ततः **कुबेरदत्तेन** दत्तां तां **सुरमञ्जरीम्** ।
**सुमते**रात्मजां सोऽयमुपयेमे यथाविधि ॥ ३६ ॥

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्रचूडामणौ सुरमञ्जरीलम्भोनाम नवमो लम्बः

---

मौग्ध्यं हि भूषणम्,– 'பேதைமை யென்பது மாதர்க்கணிகலம்.'

ஔவை.

**श्लो. ३३–३४.** 'इति प्रार्थनामनुसरन्तीं क्वचिदन्तर्हितस्य **बुद्धिषेणस्य** लब्धो वर इति वाणीमेणाक्षी कामदेवस्य कृपासारविलसितवचोधारां मत्वा प्रमाद-मेदुरमानसा किंचित्कंधरां विनिवृत्य पुरतो विराजमानं बहिरागतमिव साक्षात्का-मदेवं * * कुरुवीरं विलोकयामास ।' इति जी. च. का.

**श्लो. ३५.** सुतरां सोऽप्यतोषयत्,— प्रीतेः परां काष्ठां प्रापयामास ।

**श्लो. ३६.** 'ततः **कुबेरदत्तेन** मुहूर्ते शुभसंगते ।
विश्राणितां वरश्रोणीं करे जग्राह कौरवः ॥' इति जी. च. का.

## दशमो लम्बः ।

अथ पाणिगृहीतीं तां बहुमेने बहुप्रियः ।
बहुयत्नोपलब्धे हि प्रेमबन्धो विशिष्यते ॥ १ ॥

---

श्लो. १ पाणिर्गृहीतोऽस्या इति पाणिगृहीती । 'पाणिगृहीती भार्यायाम्' इति ङीप् ।

कृच्छ्रेणाराध्य तां भूयो मित्राणां पार्श्वमाश्रितः ।
स्वामीच्छाप्रतिकूलत्वं कुलजानां कुतो भवेत् ॥ २ ॥

सचित्रीयस्तदा मित्रैः पित्रोरन्तिकमाययौ ।
आत्मदुर्लभमन्येन सुलभं हि विलोचनम् ॥ ३ ॥

पित्रोरप्यतिमात्रोऽभूत्पुत्रस्नेहोऽस्य वीक्षणात् ।
कस्यानन्दकरो न स्यात्कृतान्तास्यादपागतः ॥ ४ ॥

ततो **गन्धर्वदत्ता** च **गुणमाला** च वल्लभे ।
उल्लाघतां क्रमान्नीते नीतिरेषा हि संसृतौ ॥ ५ ॥

अथ **गन्धोत्कटेनायं** मन्त्रयित्वा ततो ययौ ।
विधित्सिते ह्यनुत्पन्ने विरमन्ति न पण्डिताः ॥ ६ ॥

**विदेहाख्ये** ततो देशे धरण्यास्तिलकोपमाम् ।
तिलकान्तधरण्याख्यां राजधानीमशिश्रयत् ॥ ७ ॥

---

श्लो. ३. सचित्रीयैः, साश्चर्यैः । विलोचनम्, विस्मयावहम् ।

**श्लो.** ५. उल्लाघताम्, हृष्टताम् । 'उल्लाघो निपुणे हृष्टे' इति हेमः । वल्लभे, **जीवंधरस्य** दयिते इत्यर्थः ।

श्लो. ६. विधित्सिते, विधातुमभिमते कार्ये । अनुत्पन्ने, अनिष्पन्ने सति । आ समीहितनिष्पत्तेरुपक्रान्तं कर्म नोत्तमा विसृजन्तीत्यर्थः । 'न निश्चितार्थाद्विरमन्ति धीराः ।' 'प्रारब्धमुत्तमगुणा न परित्यजन्ति ।' इति च भर्तृहरिः । रघूणां 'आफलोदयकर्मणाम्' इति विशेषणं दत्ते कालिदासः ।

**श्लो.** ७. तिलकान्तधरण्याख्याम्, **धरणीतिलक**नाम्नीम् ।

'तदनु चायं महाभागो * * सर्वलोकतिलकभूतां **धरणीतिलक** इत्यन्वर्थाभिधानां राजधानीं भेजे । इति ग. चि. म.

'**धरणीतिलका**ख्यया प्रतीतां नगरीं तत्र जगाम कौरवः ।

महितो मातुलेनात्र विदेहाधिपभूभुजा ।
भागिनेयो महाभागो मह्यां केन न मह्यते ॥ ८ ॥

आसीद्गोविन्दराजोऽपि तद्राज्यस्थापनोद्यतः ।
स्वयं परिणतो दन्ती प्रेरितोऽन्येन किं पुनः ॥ ९ ॥

मन्त्रिभिर्मन्त्रशालायां मन्त्रयामास मन्त्रवित् ।
न ह्यमन्त्रं विनिश्चेयं निश्चिते च न मन्त्रणम् ॥ १० ॥

**काष्ठाङ्गारस्य** संदेशं सचिवैः शुश्रुवानयम् ।
ज्ञात्वा हि हृदयं शत्रोः प्रारब्धव्या प्रतिक्रिया ॥ ११ ॥

अत्रेनाहमपख्यातिं राजघ्ने मदहस्तिनि ।
लब्धवानवबुध्येत मिथ्येयं तत्त्ववेदिना ॥ १२ ॥

निःशल्योऽहं भवाम्येष भवत्यत्र समागते ।
दुर्जनेऽपि हि सौजन्यं सुजनैर्यदि संगमः ॥ १३ ॥

इत्युक्त्या निश्चितोऽरातिरतिसंधित्सुरञ्जसा ।
असतां हि विनम्रत्वं धनुषामिव भीषणम् ॥ १४ ॥

---

अधितिष्ठति यां स्वमातुलः स पति (?) **गोविन्दमहीप**चन्द्रमाः ॥'

इति जी. च. का.

**श्लो. ९.** परिणतो दन्ती, मत्तगजः ।

**श्लो. १४.** अतिसंधित्सुः, वञ्चयितुमिच्छुः ।

**श्लो. १०–१४.** "अयं सर्वविजयी **विजया**नन्दनरिपुविजयाभ्युपायवितर्कणपरतन्त्रो, मन्त्रशालायां मन्त्रिभिः समं मन्त्रयामास । आचष्टस्म च, '**काष्ठाङ्गारेण** प्रहितमिह संदेशं दर्शय' इति सातिशयविवेकं गणकप्रवेकम् । स च तथेति विहिताञ्जलिर्वैदेहीसुताहितेन प्रहितं पत्रमुन्मुद्रं विधाय विधिवद्वाचयामास । 'पत्रमिदं **काष्ठाङ्गारस्य** विलोकयेद्विदेहाधिपतिः । पतितं मूर्ध्नि मे पापेन केनापि शोच्यार्हं किमपि वाच्यम् । न तत्तथेति याथात्म्यविदामग्रयायी

विप्रलम्भोत्सुके शत्रौ कार्यान्धोऽयमतप्यत ।
दुर्जनाग्रे हि सौजन्यं कर्दमे पतितं पयः ॥ १५ ॥
आहूतास्तेन साकूतं गच्छामस्तच्छलाद्वयम् ।
इत्युच्चैर्निश्चिकायासौ बकायन्ते हि जिष्णवः ॥ १६ ॥
**काष्ठाङ्गारेण** संजातं सख्यं प्रख्यापयन्नसौ ।
डिण्डिमं ताडयामास गतेर्वार्ता हि पूर्वगा ॥ १७ ॥

---

भवानवैति चेदपि, चेतसि विद्यमानमिदमवद्यानुषङ्गभयादावेद्यते । केनाप्युन्मस्तकमदावलेपादपहस्तितहस्तिपकेन हस्तिना क्वचिदाक्रीडे क्रीडन्, पीडां जगतः प्रवर्तयामास मर्त्येश्वरः । ततः परिणतकरिणा कृतमेव मयि परिणतं किंचिन्नाम । अकिंचनमेवं कञ्जासनावल्लभं कल्पितवतः काश्यपीपतेः कारणाकरणे कारणं किं नु स्यात् । को नाम पादपस्कन्धमध्यासीनः परशुना मूर्खस्तन्मूलमुन्मूलयेत् । * * । गतानुगतिको लोकः । कस्तमनुसर्तुं समर्थो भवेत् । मान्यो भवानेतन्मनस्कुर्वन्, गुर्वीमिमामस्माकमाकस्मिकीमकीर्तिमधिकतूर्या समागत्य संमार्जयेत् । उपार्जितमपि दुष्कृतं सुकृतिसमागमो हि गमयेत् । किमन्यत् । आयुष्मतः किंकरं मां गणयेत् ।" इति ग. चि. म.

'अथ सचिवकुलेन **जीवंधरेण** च सहितो **गोविन्द**महीपतिः, कुरुवीरं पञ्चाननचञ्चदासने, **काष्ठाङ्गारं** च मृत्युवदने, कदनेन निधित्सुः, मन्त्रशालामधिष्ठितो मितजनपरिवृतः संमन्त्रयितुमारेभे ।

ततो विदितमेदिनीक्रमनभावकूलंकषा
नयाम्बुनिधिपारगा जगदुरञ्जसा मन्त्रिणः ।
महीश स हि वञ्चनाकलितचित्तवृत्ती रिपुः
प्रतारयितुमद्य नो विनयपत्रिकां प्राहिणोत् ॥

कदाचिन्मत्तदन्तावलः पाटितालानो निर्मूलितनिगलः संक्षुभितकटकः सकलभटघटादुरासदः **सत्यंधर**वसुंधरापतिमन्दिरोपकण्ठकलितसंचारः, कोपान्निर्गतं तमेनमस्मत्प्राणायमानं निहत्य, निखिलपौरलोकं शोकपारावारे, मामकीर्तिपूरे च निमज्जयामास ।

चातुरङ्गबलं पश्चाच्चतुरोऽयं न्यशामयत् ।
आलोच्यात्मारिकृत्यानां प्राबल्यं हि मतो विधिः ॥ १८ ॥
प्रतस्थे चाथ सल्लग्ने पात्रदानादिपूर्वकम् ।
दानपूजातपःशीलशालिनां किं न सिध्यति ॥ १९ ॥
अथ **राजपुरीं** प्राप्य राजा कैश्चित्प्रयाणकैः ।
निकषा तत्पुरीं क्वापि निषसाद महाबलः ॥ २० ॥
प्राभृतं प्राहिणोत्तस्य **काष्ठाङ्गारो** मुधा मुहुः ।
हन्त कापटिका लोके बुधायन्ते हि मायया ॥ २१ ॥
प्रतिप्राभृतमेतस्मै प्राहैषीत्स्वामिमातुलः ।
आ समीहितनिष्पत्तेराराध्याः खलु वैरिणः ॥ २२ ॥

---

अद्येन मयि विस्तृतां मिलदकीर्तिमेतां भवा-
न्प्रभाकर इवाम्बुजाकरवरे हिमानीं तताम् ।
विनाशयितुमर्हसि क्षितिपते दयावारिधे
ततः पुरमुपागतो मम च मित्रतां लालय ॥' इति जी.च.का.

**श्लो. १८.** आत्मारिकृत्यानां प्राबल्यमालोच्य विधिर्मतो हि, इत्यन्वयः ।

**श्लो. १९.** प्रतस्थे,— 'समवप्रतिविभ्यः स्थः' इत्यात्मनेपदम् । सल्लग्ने, शुभे लग्ने ।

**श्लो. २०.** 'तदनु * * अनीकं पुरोधाय कैश्चित्प्रयाणै**र्गोविन्दराजः** क्वचन **राजपुरीं** निकषा निषसाद ।' इति जी. च. का

**श्लो. २१.** प्राभृतं, प्रदेशनम् । 'प्राभृतं तु प्रदेशनम्' इत्यमरः । कापटिकाः, मायाविनः ।

**श्लो. २१–२२.** 'अनन्तरं * * **काष्ठाङ्गारेण** सबहुमानमुपायनीकृतमनतिवयस्कममन्दबलमाश्वीयं हास्तिकमप्यास्थानकृतावस्थितिरयमद्राक्षीत् । प्राहैषीच्चास्य प्रतिप्राभृतकम् ।' इति ग. चि. म.

कन्याशुल्कतया लोके यन्त्रभेदमघोषयत् ।
उपायप्रष्ठरूढा हि कार्यनिष्ठानिरङ्कुशाः ॥ २३ ॥
धनुर्धराश्च संभूतास्त्रैवर्णिककुलोद्भवाः ।
आमोहो देहिनामास्थामस्थानेऽपि हि पातयेत् ॥ २४ ॥
ततश्चन्द्रकयन्त्रस्थवराहत्रयभेदने ।
न शेकुश्चापिनः सर्वे क्व विद्या पारगामिनी ॥ २५ ॥
अलातचक्रतः शीघ्रं चक्रमारुह्य हेलया ।
विव्याध **विजया**सूनुर्भानुः किं न तमोहरः ॥ २६ ॥

---

श्लो. २३. यन्त्रभेदम्, वराहत्रयशोभितचन्द्रकयन्त्रभेदनम् । 'ततश्चन्द्रकयन्त्रस्थवराहत्रयभेदने ।' इत्युत्तरत्र वक्ष्यमाणत्वात् । '**गोविन्दमहीपतिः** * * वराहत्रयशोभितचन्द्रकयन्त्रभेदं कन्याशुल्कतया सकलदेशेषु घोषयामास ।' इति जीवंधरचम्पुकाव्ये दर्शनाच्च ।

'अताडयच्च डिण्डिममतिरुन्द्रचन्द्रकयन्त्रनियन्त्रितं यो नाम युगपदेव पातयितुं शक्नोति शरेण शरव्यतां गतं वराहत्रयं वराहेऽस्मिन्नेव वरोऽयमस्मत्कुमार्याः स्यादिति ।' इति ग. चि. म.

उपायप्रष्ठरूढाः, उत्तमोपायैः प्रसिद्धाः । कार्यनिष्ठानिरङ्कुशाः, कार्यनिर्वाहेऽप्रतिहतशक्तयः ।

श्लो. २५. चापिनः, धन्विनः ।

श्लो. २६. अलातम्, उल्मुकम् । चक्रम्, यन्त्रम् । अलातचक्रम्, साभिकाङ्गारयन्त्रम्; 'அழற்கொள்ளி வட்டம்' इति जीवकचिन्तामणौ । अलातचक्रतः शीघ्रम्, अतिशयितालातचक्रशैघ्रयम् ।

श्लो. २४.-२६. 'एवं क्रमादिष्वासविद्यालब्धवर्णेषु सर्वेष्वपराद्धपृषत्केषु, दिव्यशक्तिकः स **जीवककुमारः** स्मेराक्षिविक्षेपः, इमां गोष्ठीमुपातिष्ठत् । तावता सलीलमारूढयन्त्रचक्रः, त्रिविक्रम इवाक्रमविहितज्यारोहणशरसंधानशरक्षेपः, क्षोभयन्नरिहृदयमाशुगेन केनचिदाशुगेन, शरव्यं विव्याध ।' इति ग. चि. म.

अथ **गोविन्दराजो**ऽपि राज्ञामित्थमचीकथत् ।
**सात्यंधरि**रियं हीति स्थाने हि कृतिनां गिरः ॥ २७ ॥
राजानोऽप्येवमस्माभिरस्मारीत्यभ्यनन्दिषुः ।
आचष्टे हि नरेन्द्रत्वमालीढादिषु पाटवम् ॥ २८ ॥
**काष्ठाङ्गारः** कुमारस्य वीक्षणात्क्षीणमानसः ।
तच्छ्रुतेर्मृतकल्पोऽयमनल्पाधिरचिन्तयत् ॥ २९ ॥
**सात्यंधरौ** च सत्यस्मिन्सद्यो हन्त वयं हताः ।
वीरेण हि मही भोज्या योग्यतायां च किं पुनः ॥ ३० ॥
कथमेनं वणिक्पाशं **मथनो**ऽप्यवधीत्तदा ।
आत्मनीने विनात्मानमञ्जसा न हि कश्चन ॥ ३१ ॥

---

श्लो. २७ अचीकथत्, अचकथत् । कथादेरदन्तत्वादचीकथदिति रूपं चिन्त्यमिति पूर्वमेव प्रथमे लम्बे ४१ श्लोकव्याख्यानावसर उक्तम् । कविनान्यत्रापि 'अचीकथत्' इति प्रयुज्यते,—'अथ तानालोक्य कपटकर्मपटिष्ठः **काष्ठाङ्गारः** स्वहृदयविपरिवर्तमानार्थसमर्थनचतुरं किमपि वचनमचीकथत् ।' इति ग.चि.म.

श्लो. २८. आलीढादिषु, अवस्थानभेदेषु; प्रत्यालीढम्, आलीढम्, समपदम् वैशाखम्, मण्डलम्, इति पञ्चावस्थानानि; तत्र, ऊर्ध्वस्थस्य वामपादप्रसारे दक्षिणपादसंकोचे, प्रत्यालीढम्; विपर्यये, आलीढम्; त्रिवितस्त्यन्तरेण स्थिते पादद्वये, वैशाखम्; सुगममन्यद्द्वयम् ।

'स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम् ।
त्रिवितस्त्यन्तरौ पादौ मण्डलं तोरणाकृति ॥
अन्वर्थं स्यात्समपदमालीढं तु ततोऽग्रतः ।
दक्षिणे वाममाकुञ्च्य प्रत्यालीढं विपर्ययः ॥' इति यादवः ।

श्लो. ३०. '**सत्यंधरस्य** सूनुश्चेदयं हन्त हता वयम् ।
जागरूका भवन्त्यस्मिन्वीर्यशौर्यपराक्रमाः ॥' इति जी. च. का.

श्लो. ३१. वणिक्पाशम्, कुत्सितं वणिजम्; 'याप्ये पाशप्' इति पाशप्

दुराकूतः किमाहूतो मातुलोऽस्य मया मुधा ।
स्ववधाय हि मूढात्मा कृत्योत्थापनमिच्छति ॥ ३२ ॥

**गोविन्दराज**युक्तोऽयं दुर्दान्तः किं विधित्सति ।
मरुत्सखे मरुद्धूते मह्यां किं वा न दह्यते ॥ ३३ ॥

इति चिन्ताकुलं शत्रुं स्वामिमित्राणि चिक्षिपुः ।
विपदो वीतपुण्यानां तिष्ठन्त्येव हि पृष्ठतः ॥ ३४ ॥

मत्सरी कौरवेणायं भर्त्सनाद्युयुत्सत ।
मत्सराणां हि नोदेति वस्तुयाथात्म्यचिन्तनम् ॥ ३५ ॥

---

प्रत्ययः । याप्ये, कुत्सिते । 'कुत्सितवृत्तेर्नाम्नः पाशः' इति कातन्त्ररूपमालायाम् ।

'आत्मनीने, आत्मने हिते ; कार्य इति शेषः । 'आत्मन्विश्वजनभोगोत्त-रपदात् खः' इति खप्रत्ययः ।

श्लो. ३२. दुराकूतः, दुरभिप्रायः। **स्ववधायेति,**– मूढेन मयात्मविना-शाय वेतालोत्थापनं कृतमिति भावः ।

श्लो. ३३. मरुत्सखे, अग्नौ । मरुद्धूते , वायुना संधुक्षिते सति ।

श्लो. ३१–३३. 'पुराऽस्मदीयाज्ञां मालामिव शिरसा समादधानो **मथनो** वणिक्पाशमेनं कथमवधीत्। अतः सर्वः स्वार्थपरो लोक इति सत्यमेतत्। किं वा-स्य मातुलः समाहूतः । धिङ्मां मूढपरिवृढमात्मवधाय कृत्योत्थापनमाचरन्तम् । किं करिष्यति वा किंकुर्वाणराजसंदोहेन **गोविन्दमहीपालेन** कृतसाहाय्यको-ऽयं समीरपुरस्कृत इव समीरसखः।' इति जी. च. का.

श्लो. ३५. मत्सराणाम्, अन्यशुभद्वेषवताम् ; 'मत्सरोऽन्यशुभद्वेषे तद्वत्कृ-पणयोस्त्रिषु' इत्यमरः ।

" 'अस्थाने पतितमिदं राज्यं त्यज्यतां त्वया नियोज्यखेटकेन' इति प्रक-टाटोपपाटवैः **पद्ममुखा**दिभिर्निर्भर्त्सितोऽयं कुत्सितवृत्तिः पुनर्युयुत्सुरासीत् ।" इति ग. चि. म.

केचित्कौरवतः केचिद्वैरितोऽप्यभवन्नृपाः ।
सुजनेतरलोकोऽयमधुना न हि जायते ॥ ३६ ॥

कौरवोऽप्याहवेऽरातिं लोकान्तरमजीगमत् ।
दुर्बला हि बलिष्ठेन बाध्यन्ते हन्त संसृतौ ॥ ३७ ॥

अथ संग्रामसंरम्भं कौरवोऽयमवारयत् ।
मुधावधादिभीत्या हि क्षत्रिया व्रतिनो मताः ॥ ३८ ॥

वीरसूर्**विजया** जाता वीरपत्नी च मे सुता ।
इत्युक्त्वा मातुलोऽप्येनमानन्दादभ्यनन्दयत् ॥ ३९ ॥

समन्ततः समायाताः सामन्तास्तं सिषेविरे ।
समौ हि नाढ्यसभ्यानां संपदां च लयोदयौ ॥ ४० ॥

---

**श्लो. ३६.** कैरवतः, कौरवस्य पक्षे, वैरितः, वैरिणः पक्षे; 'षष्ठ्या व्याश्रये' इति षष्ठ्यन्तात्तसिः.

'बभूवुश्च **काष्ठाङ्गारतो** निकृष्टा विशिष्टास्तु **जीवंधरराजतो** राजानः।' इति ग. चि. म.

**श्लो. ३९.** वीरं सूत इति वीरसूः। 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' इति क्विप्। वीरः पतिरस्या वीरपत्नी। 'नित्यं सपत्न्यादिषु' इति साधुः। 'वीरपत्नी वीरभार्या वीरमाता तु वीरसूः' इत्यमरः।

'**विजया** विजयाधिकेन पुत्रप्रवरेणाद्य बभूव वीरमाता ।
अधुना विधुना समानवक्त्रा मम पुत्री च चिराय वीरपत्नी ॥
इत्युक्त्वा मातुलः सोऽयं **गोविन्द**धरणीपतिः ।
कुरुवीरं कुलोद्धारं कुतुकादभ्यनन्दयत् ॥' इति जी. च. का.

'**विजयानन्दनः** * * अभ्यनन्दयच्च, सानन्दमभ्येत्य सफललोचनत्वमात्मन्यात्मजायां वीरपत्नीव्यपदेशं वीरसूव्यपदेशमवरजायामाकलयन्तं, * * **गोविन्दमहाराजम्** ॥' इति ग. चि. म.

**श्लो. ४०.** संलग्नोऽन्त एकदेशोऽस्याः, समन्ता। समन्तायाः स्वदेशाव्यवहि-

**राजपुर्यां**मगाच्चायमभिषेक्तुं जिनालयम् ।
भगवद्दिव्यसान्निध्ये निष्प्रत्यूहा हि सिद्धयः ॥ ४१ ॥

तावता संन्यधात्तत्र यक्षो यक्षचरो मुदा ।
फलमेव हि यच्छन्ति पनसा इव सज्जनाः ॥ ४२ ॥

अथ **गोविन्दराजेन** यक्षराजो यथाविधि ।
अभ्यषिञ्चन्महाराजं कौरवं गुरुगौरवात् ॥ ४३ ॥

अयादापृच्छ्य राजेन्द्रं यक्षेन्द्रोऽपि स्वमन्दिरम् ।
न ह्यासक्त्या तु सापेक्षो भानुः पद्मविकासने ॥ ४४ ॥

तर्पिताखिललोकोऽस्मात्सौधाभ्यन्तरमाश्रितः ।
सिंहासनमलंचक्रे राजसिंहः क्रमागतम् ॥ ४५ ॥

तद्वृत्तान्तवितर्कोऽभूल्लोके विस्मयबृंहितः ।
अतर्क्यसंपदापद्भ्यां विस्मयो हि विशेषतः ॥ ४६ ॥

क्व पूज्यं राजपुत्रत्वं प्रेतावासे क्व वा जनिः ।
क्व वा राज्यपुनःप्राप्तिरहो कर्मविचित्रता ॥ ४७ ॥

---

तभूमेरिमे राजानः सामन्ताः । 'तस्येदम्' इत्यण् ।

श्लो. ४३. **गोविन्दराजेन** यक्षराजः अभ्यषिञ्चत्,—यक्षराज**गोविन्द**-**राजा**वभ्यषिञ्चताम् । गुरुगौरवात्, महता गौरवेण ।

'ततश्चाभिषेकमण्डपमध्यस्थापितरत्नपीठोपरि विराजमानं कौरवं क्षीरधारा-करधारिभिर्यक्षराज**गोविन्दमहाराज**प्रमुखाः सहर्षमभिषिञ्चुः ।' जी. च. का.

श्लो. ४४. 'आपृच्छ्य कुरुभूपालमारुह्य व्योमयानकम् ।
आदिश्य परिवारं स्वमयाद्यक्षोऽपि मन्दिरम् ॥' जी. च. का.

श्लो. ४५. अस्मात्, जिनालयात् । क्रमागतम्, कुलक्रमागतम् ।

श्लो. ४७. प्रेतावासे, श्मशाने । जनिः, उत्पत्तिः ।

पुण्यपापादृते नान्यत्सुखे दुःखे च कारणम् ।
तन्तवो न हि लूतायाः कूपपातनिरोधिनः ॥ ४८ ॥
हत्वा जिघांसुमात्मानं लेभे राज्यं जिघांसितः ।
भाव्यवश्यं भवेदेव न हि केनापि रुध्यते ॥ ४९ ॥
जिजीविषाप्रपञ्चेन जातोऽयं राजवञ्चकः ।
**काष्ठाङ्गारो**ऽपि नष्टोऽभूत्स्वयं नाशी हि नाशकः ॥ ५०
यक्षः क्षणोपकारेण प्राणदायी बभूव सः ।
**काष्ठाङ्गारः** कृतघ्नोऽभूत्स्वभावो न हि वार्यते ॥ ५१ ॥
अपकारोपकाराभ्यां सदसन्तौ न भेदिनौ ।
दग्धं च भाति कल्याणं केनाङ्गारविशुद्धता ॥ ५२ ॥
रिक्तारिक्तदशायां च सदसन्तौ न भेदिनौ ।

---

श्लो. ४९. जिघांसुम्, हन्तुमिच्छुम् । जिघांसितः, हन्तुमिष्टः ।

श्लो. ५०. जिजीविषाप्रपञ्चेन, जीवितुमिच्छाया विस्तारेण । स्वयं नाशी हि नाशकः,— 'கெடுவான் கேடு நினைப்பான்.' பழமொழி.

'सत्येयं किल लोकोक्तिर्यो हन्यात्स विहन्यते'।
इति पुरुषार्थसुधानिधौ माधवाचार्यः.

'यः परस्य विषमं विचिन्तयेत्प्राप्नुयात्स कुमतिः स्वयं हि तत् ।
पूतना हरिवधार्थमाययौ प्राप सैव वधमात्मनस्ततः ॥'
इति कह्लणकृतराजतरङ्गिण्याम्.

श्लो. ५१. स्वभावो न हि वार्यते,— 'स्वभावो दुरतिक्रमः ।'

श्लो. ५२. कल्याणम्, सुवर्णम् । दग्धं च भाति कल्याणम्,—
'அடினுஞ்செம்பொன் றன்னொளி கெடாது.'

श्लो. ५३. समानाभिप्रायः श्लोकः —
'साधुरेवार्थिभिर्याच्यः क्षीणवित्तोऽपि सर्वदा ।
शुष्कोऽपि हि नदीमार्गः खन्यते सलिलार्थिभिः ॥'

ख्यातापि हि नदी दत्ते पानीयं न पयोनिधिः ॥ ९३ ॥
इतीयं किंवदन्ती च तद्देशे शंवदाप्यभूत् ।
राजन्वती सती भूमिः कुतो वा न सुखायते ॥ ९४ ॥
**काष्ठाङ्गार**कुडुम्बस्याप्यनुमेने सुखासिकाम् ।
स्वस्थानेऽपि महाराजो न ह्यस्थानेऽपि रुट् सताम् ॥ ९५ ॥
यौवराज्ये च **नन्दाढ्यं** वृद्धक्षत्रोचिते पदे ।
**गन्धोत्कटं** च चक्रेऽसौ लोकवन्द्ये च मातरौ ॥ ९६ ॥
अकरामकरोद्धात्रीं वर्षाणि द्वादशाप्ययम् ।
महिषैः क्षुभितं तोयं न हि सद्यः प्रसीदति ॥ ९७ ॥
**पद्मवक्त्रा**दिमित्रेभ्यो यथायोग्यमदात्पदम् ।
अविशेषपरिज्ञाने न हि लोकोऽनुरज्यते ॥ ९८ ॥

---

'ஆற்றுப்பெருக்கற்றடி சுடுமன்றுமவ்வா
றூற்றுப்பெருக்காலுலகூட்டும் – ஏற்றவர்கு
நல்லகுடிப்பிறந்தார் நல்கூர்ந்தாராறுலு
மில்லையெனமாட்டாரிசைந்து'. நல்வழி.

**श्लो. ९४.** शंवदा, प्रियंवदा । राजन्वतीम्, शोभनराजवतीम् । 'सुराज्ञि देशे राजन्वान्स्यात्ततोऽन्यत्र राजवान्' इत्यमरः । 'राजन्वान्सौराज्ये' इति निपातनात्साधुः ॥ सुखायते, सुखं वेदयत इत्यर्थः । 'सुखादिभ्यः कर्तृवेदनायाम्' इति क्यङ्प्रत्ययः ।

**श्लो. ९६–९८.** अकराम्, राजग्राह्यभागरहिताम् । यथायोग्यम्, यथोचितम् । 'अतनिष्ट च राजश्रेष्ठपदे **गन्धोत्कटं**, यौवराज्यपदे **नन्दाढ्यं**, महामात्रादिपदे **पद्ममुखादीन्**, द्विषड्वर्षपर्यवस्यदकरपदे च जानपदान् ।' इति ग. चि. म.

'क्षुद्रक्षितीशेन कृतं प्रजानां संक्षोभमालक्ष्य दयालुरेषः ।
राजा समा द्वादश नैजकीर्तिगौरां धरित्रीमकरां चकार ॥

**पद्मादयो**ऽपि तद्देव्यः समागत्य तदाज्ञया ।
तं समीक्ष्य क्षणे चासन्क्षीणाखिलमनोव्यथाः ॥ ५९ ॥

चिरस्थाय्यपि नष्टं स्याद्विरुद्धार्थे हि वीक्षिते ।
सन्निधावपि दीपस्य किं तमिस्रं गुहामुखम् ॥ ६० ॥

अथायं **नवुतेः** पुत्रीं दत्तां **गोविन्दभूभुजा** ।
पर्यणैषीन्महाराजः पार्थिवैर्विहितोत्सवः ॥ ६१ ॥

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्त्रचूडामणौ लक्ष्मणालम्भो नाम दशमो लम्बः।

## एकादशो लम्बः ।

अथ राज्यश्रिया लब्ध्वा **लक्ष्मणां** मुमुदे कृती ।
चिरकाङ्क्षितलाभे हि तृप्तिः स्यादातिशायिनी ॥ १ ॥

लब्ध्वा राज्यमयं राजा रेजे सर्वगुणैरपि ।
काचो हि याति वैगुण्यं गुण्यतां हारगो मणिः ॥ २ ॥

---

वृद्धक्षत्रपदे निषण्णमकरोद्**गन्धोत्कटं** भूपति-
**र्नन्दाढ्याय** च यौवराज्यपदवीं प्रादात्कुरूणां पतिः ।
तत्तद्योग्यपदे चकार निखिलान्**पद्मास्य**मुख्यान्सखी-
न्न्यांश्चापि धराधिपान्करुणया स्वे स्वे पदेऽस्थापयत् ॥'
इति जी. च. का.

**श्लो. ५९.** 'अन्यैः समानीताः **पद्मा**दिदेवीः समागत्य रहसि समालिङ्ग्य परिचुम्ब्य, सकलमनोव्यथानामवसानभूमिं हर्षातिभूमिं प्रापयामास ।' जी.च.का.

**श्लो. २.** विगुणः, गुणहीनः निन्द्य इति यावत् । विगुणस्य भावो वैगुण्यम् । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् ॥ प्रशस्तो गुणोऽस्यास्ति गुण्यः । 'रूपादाहतप्रशंसयोर्यप् । अन्येभ्योऽपि दृश्यते' इति यप्प्रत्ययः । गुण्यस्य भावो गुण्यता ताम् ।

कृतिनामेकरूपा हि वृत्तिः संपदसंपदोः ।
न हि नादेयतोयेन तोयधेरस्ति विक्रिया ॥ ३ ॥

सुखदुःखे प्रजाधीने तदाभूतां प्रजापतेः ।
प्रजानां जन्मवर्जं हि सर्वत्र पितरौ नृपाः ॥ ४ ॥

आसीत्प्रीतिकरं तस्य करदानं च दानवत् ।
वृषलाः किं न तुष्यन्ति शालेये बीजवापिनः ॥ ५ ॥

मित्रोदासीनशत्रूणां विषयेष्वपसर्पतः ।
तदज्ञानेऽपि तज्ज्ञानात्तैरेवासीत्प्रतिक्रिया ॥ ६ ॥

---

श्लो. ४. जन्मवर्जम्, जन्म वर्जयित्वा । वर्जनं वर्जः जन्मनो वर्जः त्यागो यस्मिन्कर्मणि तत्तथा । अथवा । 'द्वितीयायां च' इति णमुल् । अयं क्वचिदपरीप्सायामपीष्यते । 'अनुदात्तं पदमेकवर्जम्' इत्येकाचः शेषतया व्याख्यातत्वात् । परीप्सा, त्वरा । 'अन्वितः पतिवात्सल्याद्गृहवर्जमयोध्यया ।' इति रघुवंशेऽपि । पितरौ, मातापितरौ ।

'प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥' रघुवंशे.

श्लो. ५. 'प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥' इति रघुवंशे.

शालेये, शालिधान्यक्षेत्रे । 'व्रीहिशाल्योर्ढक्' इति ढक्प्रत्ययः ।

श्लो. ६. उदासीनः, जिगीषोर्नृपतेः शत्रुमित्रभूमितो व्यवहितः परतरः । 'विषयानन्तरो राजा शत्रुर्मित्रमतः परम् । उदासीनः परतरः' इत्यमरः । अपसर्पतः, चारात् । तदज्ञाने, तत्कर्तृकज्ञानेऽसत्यपि । तज्ज्ञानात्, स्वस्य तद्विषयकज्ञानादित्यर्थः ।

'सप्रणिधानं प्रहितप्रणिधिनेत्रः शत्रुमित्रोदासीनानां मण्डलेषु तैरज्ञातमप्यज्ञासीत् ।' इति ग. चि. म.

'न तस्य मण्डले राज्ञो न्यस्तप्रणिधिदीधितेः ।
अदृष्टमभवत्किंचिद्व्यभ्रस्येव विवस्वतः ॥' इति रघुवंशे.

रात्रिंदिवविभागेषु नियतो नियतिं व्यधात् ।
कालातिपातमात्रेण कर्तव्यं हि विनश्यति ॥ ७ ॥

तपसा हि समं राज्यं योगक्षेमप्रपञ्चतः ।
प्रमादे सत्यधःपातादन्यथा च महोदयात् ॥ ८ ॥

प्रबुद्धेऽस्मिन्भुवं कृत्स्नां रक्षत्येकपुरीमिव ।
राजन्वती च भूरासीदन्वर्थं रत्नसूरपि ॥ ९ ॥

---

श्लो. ७. रात्रौ दिवा च रात्रिंदिवम् । 'अचतुर—' इत्यादिनाधिकरणार्थे द्वन्द्वेऽच्प्रत्ययान्तो निपातः । अव्ययान्तत्वादव्ययत्वम् । अत्र षष्ठयर्थलक्षणया रात्रिंदिवमिति । अहोरात्रयोरित्यर्थः । तयोर्विभागा अंशाः प्रहरादयः । तेषु ॥ नियतम्,– यदादिष्टमस्मिन्काले कर्तव्यमिति तत् ॥ कालातिपातमात्रेण, कालातिक्रमेण केवलम् ।

'राज्ञां रात्रिंदिवविभागेषु यदनुष्ठेयमिदमित्थमनिर्बद्धमन्वतिष्ठत् ।' ग.चि.म.

'रात्रिंदिवविभागेषु यदादिष्टं महीक्षिताम् ।
तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥' इति रघुवंशे.

कालातिपातेति,–– 'क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ।' इति समानार्थोऽयमंशः ।

श्लो. ८. राज्यम्, राज्ञः कर्म । 'पत्यन्तपुरोहितादिभ्यो यक्' इति पुरोहितादित्वात् यक्प्रत्ययः ॥ योगः, अनुपात्तस्योपादानम् । क्षेमः, उपात्तस्य रक्षणम् । योगश्च क्षेमश्चेति समाहारद्वन्द्वः । प्रपञ्चतः, विस्तारेण ।

'अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं संचिनोति ।
अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ॥'

इत्यभिज्ञानशाकुन्तले.

श्लो. ९. प्रबुद्धे, जागरूके । एकपुरीमिव रक्षति, अनायासेन शासति सतीत्यर्थः । एकपुरीमित्यनेन सकलमहीमण्डलपालनमनायासेन द्योत्यते ।

एवं विराजमानेऽस्मिन्राजराजे महोदये ।
**विजया** जननी तस्य विरक्ता संमृतावभूत् ॥ १० ॥
पैतृकं पदमद्राक्षमत्राहं पुत्रपुङ्गवे ।
कृताः पुरोपकर्तारः कृतकृत्या यथोचितम् ॥ ११ ॥
फलं च पुण्यपापानां मया मय्येव वीक्षितम् ।
शास्त्रादृते किमन्यत्र कर्मपाकोऽयमीक्षितः ॥१२ ॥
अतोऽपास्य सुतस्नेहं तपस्यामि यथोचितम् ।
ज्ञात्वापि कुण्डपातोऽयं कुत्सितानां हि चेष्टितम् ॥ १३ ॥
इति वैराग्यतस्तस्याः **सुनन्दा**पि व्यरज्यत ।
पाके हि पुण्यपापानां भवेद्बाह्यं च कारणम् ॥ १४ ॥

---

अन्वर्थम्, अनुगतार्थनामकं यथा तथा । रत्नानि सूत इति रत्नसूः । 'सत्सूद्विष–' इत्यादिना क्विप् । कृत्स्नाम्, चतुःसागरपर्यन्तामित्यर्थः ।

'स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥' इति रघुवंशे.

श्लो. १०. राजराजे, **जीवंधर** इत्यर्थः ।

श्लो. ११. पैतृकम्, पितुरिदम् । 'ऋतष्ठञ्' इति ठञ्प्रत्ययः । पुत्रपुङ्गवे, पुत्रश्रेष्ठे **जीवंधरे** ।

श्लो. १२. शास्त्रादृते,— 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति पञ्चमी ।

'नृपस्य जननी ततो निखिलशीलमालाखनि-
र्व्यरज्यत विशालधीः कुटिलसंसृतात्रिकदा ।
अपश्यमिह पैतृकं पदममन्दकीर्तौ सुते
पराक्रमजिताहित किमधुनेति सा जानती ॥' इति जी. च. का.

श्लो. १३. कुण्ड्यते रक्ष्यते जलमग्निर्वास्त्र, कुण्डः । कुण्डपातः, अग्निकुण्डे जलाशये वा पतनम् । 'कुण्डमग्न्यालये मानभेदे देवजलाशये' इति मेदिनी ।

ततः कृच्छ्रायमाणं ते महीनाथं च कृच्छ्रतः ।
अनुज्ञाप्य ततो गत्वादीक्षिषातां यथाविधि ॥ १५ ॥

पद्माख्या श्रमणीमुख्या विश्राण्य श्रमणीपदम् ।
तन्मातृभ्यां ततस्तं च महीनाथमबोधयत् ॥ १६ ॥

प्रव्रज्या जातुचित्प्राज्ञैः प्रतिषेद्धुं न युज्यते ।
न हि खादापतन्ती चेद्रत्नवृष्टिर्निवार्यते ॥ १७ ॥

वयस्यन्तेऽपि वा दीक्षा प्रेक्षावद्भिरपेक्ष्यताम् ।
भस्मने रत्नहारोऽयं पण्डितैर्न हि दह्यते ॥ १८ ॥

इति प्रबोधितो नत्वा प्रसवित्रीं सकाशतः ।
प्रश्रयेण गतो राजा प्राविक्षन्नृपमन्दिरम् ॥ १९ ॥

न चिराद्धि पदं दत्ते कृतिनां हृदि विक्रिया ।
यदि रत्नेऽपि मालिन्यं न हि तत्कृच्छ्रशोधनम् ॥ २० ॥

---

श्लो. १५. कृच्छ्रायमाणम्, दुःखविशिष्टम् ।

'तदनु वैराग्यपदवीमनुगच्छन्त्या **सुनन्दया** सह महादेवी महीनाथं कृच्छ्रायमाणं कृच्छ्रेणानुज्ञाप्य यथाविधि श्रमणीवर्यायाः **पद्मार्यायाः** सकाशेऽदीक्षिष्ट।' इति जी. च. का

श्लो. १६. विश्राण्य, दत्त्वा । 'विश्राणनं वितरणम्' इत्यमरः ।

श्लो. १७. प्रव्रज्या, व्रतादानम् । 'व्रतादानं परिव्रज्या' इति हेमः । प्रतिषेद्धुं न युज्यते, न प्रतिषेध्या ।

श्लो. १६–१७. 'श्रमणीनामग्रगण्या **पद्मार्या विजयासुनन्दाभ्यां** विश्राणितश्रमणीपदा नभसो निपतिता रत्नवृष्टिरिव प्रव्रज्या न प्रतिषेध्येति महीनाथं बोधयामास ।' इति जी. च. का.

श्लो. १९. प्रश्रयेण, विनयेन ।

'इति मधुरगिरा प्रबोधितोऽसौ नरपतिरानतमातृपादपद्मः ।
विनयभरवशाद्विवेश धीरो निजसदनं परिवारसंपरीतः ॥' जी. च. का.

अथास्य क्षात्रविद्यस्य क्षणवद्भुञ्जतो महीम् ।
त्रिदशोपमसौख्येन त्रिंशद्वर्षाण्ययासिषुः ॥ २१ ॥

ततः कदाचिदस्यासीज्जलक्रीडामहोत्सवः ।
वसन्ते सह कान्ताभिरष्टाभिरतिकौतुकात् ॥ २२ ॥

जलक्रीडाश्रमात्सोऽयमाक्रीडे च सनीडके ।
क्रीडन्कापटिकैः श्लाघ्यं कापेयं निरवर्तयत् ॥ २३ ॥

अन्यसंपर्कतः क्रुद्धां मर्कटीं कोऽपि मर्कटः ।
प्रकृतिस्थां बहूपायैर्नाशकत्कर्तुमुद्यतः ॥ २४ ॥

ततः शाखामृगोऽप्यासीन्मायिको मृतवद्दशः ।
तदवस्थां भयग्रस्ता वानरीऽयमपाकरोत् ॥ २५ ॥

---

श्लो. २१. क्षात्त्रविद्यस्य, क्षत्रविद्यां वेदेति क्षात्त्रविद्यः, तस्य । 'अङ्गक्षत्त्रधर्मत्रिपूर्वाद्विद्यान्तान्नेति वक्तव्यम् ।' इति ठक्प्रतिषेधः ।

'तदनु कालपाकेन स्वपाकेन शान्तस्वान्तरुजः कान्ताभिरमा निर्विशतस्त्रिदशार्हसौख्यं त्रिंशत्संवत्सरसंमिते समये समतिक्रान्ते, क्रमादात्मजेष्वप्यात्मनिर्विशेषु कलागुणैः कवचहरतां निविशमानेषु, कदाचिन्नितान्तक्षीबवसन्तबन्धुर्वसन्तसमयावतारः समधुक्षयदस्य जलक्रीडोद्योगम् ।' इति ग. चि. म.

'एवं सौख्येन वसतः पाकारिसमतेजसः ।
धराधिपस्य धीरस्य त्रिंशद्वर्षाण्ययासिषुः ॥' इति जी. च. का.

श्लो. २३. आक्रीडे, उद्याने । 'पुमानाक्रीड उद्यानम्' इत्यमरः ।

'सनीडके, लतामण्डपसहिते । कापटिकैः, मर्कटैः । कापेयम्, कपिचेष्टाम् । 'कपिज्ञात्योर्ढक्' इति ढक्प्रत्ययः । निरवर्तयत्, ददर्शेत्यर्थः ।

श्लो. २५. मृतवद्दशः, मृतवतो दशा अवस्था यस्य सः । अथवा । मृतस्येव मृतवत् । 'तत्र तस्येव' इति वतिः । मृतवत् दशा यस्य सः ।

श्लो. २४–२५. 'तत्रान्यसंपर्कमवेक्ष्य रुष्टां स्वां वानरीं कोऽपि युवा प्लवङ्गः ।

हर्षलो हरिरप्यस्यै पनसस्य फलं ददौ ।
वनपालो जहारैतद्वानरीमपि भर्त्सयन् ॥ २६ ॥

इत्यशेषं विशेषज्ञो वीक्षमाणः क्षितीश्वरः ।
तत्क्षणे जातवैराग्यादनुप्रेक्षामभावयत् ॥ २७ ॥

अथानित्यत्वानुप्रेक्षा ।

मद्यते वनपालोऽयं **काष्ठाङ्गारायते** हरिः ।
राज्यं फलायते तस्मान्मयैव त्याज्यमेव तत् ॥ २८ ॥

---

दीनस्वभावो विविधैरुपायैः शान्तां विधातुं न चिरं शशाक ॥

तदनु रोषोत्कटमर्कटीं प्रकृतिस्थां कर्तुमक्षमतया बहुदीनदशामापन्नं मृतमिव भूमौ पतितं मायाविनं शाखामृगमवलोक्य भयविह्वलाङ्गी प्लवङ्गी समीपमासाद्य तदवस्थामपाचकार ।' इति जी. च. का.

**श्लो. २६.** हर्षलः, संतोषविशिष्टः । हर्षल इत्यन्यत्रापि कविना प्रयुक्तम् । 'निगलमोचनाय चलन्निगलितचरण इव हर्षलस्तपोधनपरिषदि तस्थिवान् ।' इति ग. चि. म.

'प्लवङ्गतरुणस्ततः पनसपक्वपुष्यत्फलं
ददौ वनमृगीदृशे विततहर्षनद्धान्तरः ।
जहार वनपालकः सपदि तत्फलं पेशलं ।
करप्रचलयष्टिना मुदितवानरीं भर्त्सयन् ॥' जी. च. का.

**श्लो.** २७. अनुप्रेक्षाम्, तत्त्वानुचिन्तनम् ।

**श्लो.** २८. '**काष्ठाङ्गारायते** कीशो राज्यमेतत्फलायते ।
मद्यते वनपालोऽयं राज्यं त्याज्यमिदं मया ॥' जी. च. का.

'सर्वथा **काष्ठाङ्गारायते** करशाखाभ्रष्टफलः शाखामृगः । अस्मद्यते नूनमाच्छोटिततत्फलः स वनपालः । फलं तु नियमेन भोगायते ।' ग. चि. म.

'கைப்பழமிழந்த மந்தி கட்டியங்காரனொத்த
திப்பழந்துரந்துகொண்ட சிலதனுமென்னையொத்தா

जाताः पुष्टाः पुनर्नष्टा इति प्राणभृतां प्रथाः ।
न स्थिता इति तत्कुर्याः स्थायिन्यात्मन्पदे मतिम् ॥ २९ ॥

स्थायीति क्षणमात्रं वा ज्ञायते न हि जीवितम् ।
कोटेरप्यधिकं हन्त जन्तूनां हि मनीषितम् ॥ ३० ॥

अवश्यं यदि नश्यन्ति स्थित्वापि विषयाश्चिरम् ।
स्वयं त्याज्यास्तथा हि स्यान्मुक्तिः संसृतिरन्यथा ॥ ३१ ॥

अनश्वरसुखावाप्तौ सत्यां नश्वरकायतः ।
किं वृथैव नयस्यात्मन्क्षणं वा सफलं नय ॥ ३२ ॥

---

னிப்பழமின்று போகத்தின்பமே போலுமென்று
மெய்ப்படவுணர்வு தோன்றி மீட்டிது கூறினனே.'

ஜீவகசிந்தாமணி.

श्लो. २९. स्थायिनि पदे, स्थिरे स्थाने, मोक्षइत्यर्थः ।

'जगति जातेष्वजातमृतयः के नाम । केवलं यावदायुरवस्थितास्तदनु संस्थिताश्च ननु सर्वेऽपि तनुभृतः ।' इति ग. चि. म.

श्लो. ३१. श्लोकोऽयं प्रथमलम्बकेऽपि विद्यते । तथाप्येककविकृतत्वान्न दोषः।

'अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।
व्रजन्ति स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥' भर्तृहरिः ।

'नियोगतश्चेद्भोगानां वियोगः स्वयं त्यागात्किमिति लोकोऽयं बिभेति । किंच । ते भजन्तमात्मानं त्यजन्तः स्वातन्त्र्यात्स्वान्तमस्य सुतरां तुदन्ति । स्वयं त्यक्तास्तु तदानीं मनःप्रसत्त्यै पुनर्मुक्तये च भोगा भवेयुरिति भूयो व्यरज्यत । इति ग. चि. म.

श्लो. ३२. 'सर्वथा नश्वरशरीरेण यद्यनश्वरसुखं सिध्येदिदमेव ननु बुद्धिमद्भिरद्धा साध्यम् ।' इति ग. चि. म.

अथाशरणानुप्रेक्षा ।

पयोधौ नष्टनौकस्य पतत्रेरिव जीव ते ।
सत्यपाये शरण्यं न तत्स्वास्थ्ये हि सहस्रधा ॥ ३३ ॥

आयुधीयैरतिस्निग्धैर्बन्धुभिश्चाभिसंवृतः ।
जन्तुः संरक्ष्यमाणोऽपि पश्यतामेव नश्यति ॥ ३४ ॥

मन्त्रयन्त्रादयोऽप्यात्मन्स्वतन्त्रं शरणं न ते ।
किंतु सत्येव पुण्ये हि नो चेत्के नाम तैः स्थिताः ॥ ३५ ॥

अथ संसारानुप्रेक्षा ।

नटवन्नैकवेषेण भ्रमस्यात्मन्स्वकर्मतः ।
तिरश्चि निरये पापाद्दिवि पुण्याद्द्वयान्नरे ॥ ३६ ॥

---

श्लो. ३३. स्वास्थ्ये सति तत् शरणं सहस्रधा स्याद्धि, इत्यन्वयः ।

श्लो. ३४. पश्यतामेव तेषां नश्यति,— पश्यतस्ताननादृत्य नश्यतीत्यर्थः। 'षष्ठी चानादरे' इत्यनादराधिक्ये भावलक्षणे षष्ठी । आयुधीयैः, आयुधेन जीवन्ति, आयुधीयाः, तैः । 'आयुधाच्छ च' इति ठन्प्रत्ययः ।

श्लो. ३५. स्वतन्त्रम्, स्वप्रधानं यथा तथा ।

'प्राणप्रयाणवेलायां न हि लोके प्रतिक्रिया ।' ल. २. श्लो.५८.

'सत्यायुषि हि जायेत प्राणिनां प्राणरक्षणम् ।' ल. ३. श्लो. १९.

'प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते ।'
इति रघुवंशे. स. ८. श्लो. ४०.

श्लो. ३६. पापात्, अशुभकर्मणः । दिवि, स्वर्गगतौ । द्वयात्, पुण्यपापाभ्याम् । नरे, मनुष्यगतौ । भ्रमसीत्यन्वयः ।

'निकामतीव्रनीचकर्मोदयान्निरये, निरोभूततीव्रप्रभावपापात्तिरश्चि, प्रवर्तितसुकृतेतरद्वयान्मर्त्ये, सुकृतमात्रेण सुरेषु च, कृतावतारास्तावद्भ्रमन्ति यावन्निर्मूलितनिरवशेषकर्माणो भवेयुः ।' इति ग. चि. म.

पञ्चानन इवामोक्षादसिपञ्जर आहितः ।
क्षणेऽपि दुःसहे देहे देहिन्हन्त कथं वसेः ॥ ३७ ॥
तन्नास्ति यन्न वै भुक्तं पुद्गलेषु मुहुस्त्वया ।
तल्लेशस्तव किं तृप्त्यै बिन्दुः पीताम्बुधेरिव ॥ ३८ ॥
भुक्तोज्झितं तदुच्छिष्टं भोक्तुमेवोत्सुकायसे ।
अभुक्तं मुक्तिसौख्यं त्वमतुच्छं हन्त नेच्छसि ॥ ३९ ॥
संसृतौ कर्म रागाद्यैस्ततः कायान्तरं ततः ।
इन्द्रियाणीन्द्रियद्वारा रागाद्याश्चक्रकं पुनः ॥ ४० ॥
सत्यनादौ प्रबन्धेस्मिन्कार्यकारणरूपके ।
येन दुःखायसे नित्यमद्य वात्मन्विमुञ्च तत् ॥ ४१ ॥

---

श्लो. ३७. आहितः, बद्धः । क्षणेऽपि, क्षणमात्रमपि ।

श्लो. ३८. तत् वस्त्विति शेषः । तल्लेशः, तेषां पुद्गलानां लेशः ।

श्लो. ३९. अतुच्छम्, अनल्पम् । उत्सुकायसे, अनुत्सुकः उत्सुको भवसि । भृशादित्वादभूततद्भावे 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' इति क्यङ् ।

'भुक्तपूर्वमिदं सर्वं त्वयात्मन्भुज्यते ततः ।
उच्छिष्टं त्यज्यतां राज्यमनन्ता ह्यसुहृद्भवाः ॥'

इति प्रथमलम्बकस्थोऽनुरूपार्थः श्लोकः ।

श्लो. ३८–३९. 'अधुनास्माभिरनुभुज्यमानमपि भुक्तपूर्वम् । एवं पूर्वभवानामानन्त्यादनन्तमपि पुद्गलाभोगं भोगोपभोगत्वेन यदहमभुञ्जि । भोक्तुं भुक्तोज्झितमुच्छिष्टमिव विशिष्टेन केन विचीयताम् ।' इति ग. चि. म.

श्लो. ४०. रागाद्यैः रागद्वेषादिभिः । ततः, कर्मण इत्यर्थः । कायान्तरम्, शरीरान्तरम् । ततः, कायान्तरात् । चक्रकम्, संसारभ्रमणम् ।

श्लो. ४१. प्रबन्धे, संसारबन्धे । येन कर्मणेति शेषः । दुःखायसे, दुःखं

अथैकत्वानुप्रेक्षा ।

त्यक्तोपात्तशरीरादिः स्वकर्मानुगुणं भ्रमन् ।
त्वमात्मन्नेक एवासि जनने मरणेऽपि च ॥ ४२ ॥

बन्धवो हि श्मशानान्ता गृह एवार्जितं धनम् ।
भस्मने गात्रमेकं त्वां धर्म एव न मुञ्चति ॥ ४३ ॥

पुत्रमित्रकलत्राद्यमन्यदप्यन्तरालजम् ।
नानुयायीति नाश्चर्यं नन्वङ्गं सहजं तथा ॥ ४४ ॥

---

वेदयसे । 'सुखादिभ्यः कर्तृ वेदनायाम्' इति वेदनायामर्थे क्यङ् । आदिपदात् दुःखतत्प्रभृतीनां ग्रहणम् । कर्तृ इति लुप्तषष्ठीकं पृथक्पदम् । वेदनाशब्दो ज्ञान-वाची । कर्तृग्रहणं किम् । परस्य सुखं वेदयसे ।

**श्लो. ४३.** 'अर्था गृहे निवर्तन्ते श्मशाने मित्रबान्धवाः ।
सुकृतं दुष्कृतं चैव गच्छन्तमनुगच्छति ॥'
इति समानार्थः श्लोकः ।

'அத்தமும் வாழ்வுமகத்துமட்டே விழியம்பொழுக
மெத்திய மாதரும் வீதிமட்டே விம்மிவிம்மி யிரு
கைத்தலை மேல் வைத்தழுமைந்தருஞ்சுடுகாடு மட்டே
பற்றித் தொடருமிருவினைப் புண்ணிய பாவமுமே.'
பட்டணத்துப்பிள்ளை.

**श्लो. ४४.** 'संयुक्तानां वियोगश्च भविता हि नियोगतः ।
किमन्यैरङ्गतोऽप्यङ्गी निःसङ्गो हि निवर्तते ॥'

इति प्रथमलम्बकस्थोऽनुरूपाभिप्रायः श्लोकः । नियोगतः, निश्चयेन ।

' किंचावयोरनन्ताः खल्वतीता भवाः । न तेषु संगतिः । तथैव भाविन्यपि भवप्रबन्धे । ततस्तदन्तरालगतकतिपयदिवसपर्यवसायिनि संगमेऽस्मि-न्कस्तवायमाग्रहः । संसृतौ हि वियोगः संयोगिनां नियोगेन भविता । त्वमपि किमेतन्न जानासि ।' इति ग. चि. म.

त्वमेव कर्मणां कर्ता भोक्ता च फलसन्ततेः ।
मोक्ता च तात किं मुक्तौ स्वाधीनायां न चेष्टसे ॥ ४५ ॥

अज्ञातं कर्मणैवात्मन्स्वाधीनेऽपि सुखोदये ।
नेहसे तदुपायेषु यतसे दुःखसाधने ॥ ४६ ॥

अथान्यत्वानुप्रेक्षा ।

देहात्मकोऽहमित्यात्मञ्जातु चेतसि मा कृथाः ।
कर्मतो ह्यपृथक्त्वं ते त्वं निचोलासिसंनिभः ॥ ४७ ॥

अध्रुवत्वादमेध्यत्वादचित्त्वाच्चान्यदङ्गकम् ।
चित्त्वनित्यत्वमेध्यत्वैरात्मन्नन्योऽसि कायतः ॥ ४८ ॥

हेये स्वयं सती बुद्धिर्यत्नेनाप्यसती शुभे ।
तद्धेतुकर्म तद्वन्तमात्मानमपि साधयेत् ॥ ४९ ॥

अथाशुचित्वानुप्रेक्षा ।

मेध्यानामपि वस्तूनां यत्संपर्कादमेध्यता ।
तद्गात्रमशुचीत्येतत्किं नाल्पमलसंभवम् ॥ ५० ॥

---

'नियोगेन, निश्चयेन तथा च कालिदासप्रयोगः । 'रात्रिंदिवविभागेषु यदादिष्टं महीक्षिताम् । तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥' इति रघुवंशे १७ स. ४९ श्लो.

श्लो. ४६. अज्ञातं यथा तथा ।

श्लो. ४७. अपृथक्त्वम्, शरीरेण सहैक्यम् । निचोलासिसंनिभः, कोशान्तर्वर्तिना खड्गेन समानः । निचोलशब्दः कोशपर्यायः । यथा— 'बहलावरणनिचोलोत्खातेन परमशुक्लध्यानकौक्षेयकेण धर्मवैरिणो मोहनीयकर्ममहाराजस्य सप्तप्रकृतीर्निहत्य ।' इति ग. चि. म.

श्लो. ४८. अमेध्यत्वात्, अशुचित्वात् । अचित्त्वात्, जडत्वात् ।

श्लो. ५०. अल्पमलसंभवम्,— अल्पमलं शुक्लशोणितादि संभवः कारणं

अस्पष्टं दृष्टमङ्गं हि सामर्थ्यात्कर्मशिल्पिनः ।
रम्यमूहे किमन्यत्स्यान्मलमांसास्थिमज्जतः ॥ ९१ ॥

दैवादन्तःस्वरूपं चेद्बहिर्देहस्य किं परैः ।
आस्तामनुभवेच्छेयमात्मन्को नाम पश्यति ॥ ९२ ॥

एवं पिशितपिण्डस्य क्षयिणोऽक्षयशंकृतः ।
गात्रस्यात्मन्क्षयात्पूर्वं तत्फलं प्राप्य तत्त्यज ॥ ९३ ॥

---

यस्य तत्। रघुवंशे 'ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसंभवः।' इत्यत्र 'देवस्य विष्णोरंशः संभवः कारणं यस्य सः' इति मल्लिनाथव्याख्या । तद्गात्रमशुचि न किम् इति काकुः ।

श्लो. ९१. ऊहे, विचारे सति ।

श्लो. ९१-९२. 'अहो मुग्धाः, पृथग्भावनिरसनाय बहुसिरापिनद्धकीकसे, मार्दवसंपादनाय रुधिरार्द्रीकृते, प्राचुर्यादन्तर्गतमलानामनन्तर्भावात्संततस्यन्दनाय संकल्पितनवद्वारि, मांसलालसवायसादिवयसामदर्शनाय पिशिताच्छादिचर्मणि, कर्मशिल्पिकौशलेन बहिरुज्ज्वलतरे, शरीरेऽस्मिन् किमु यूयं सस्पृहाः । तर्हि गर्हणीयमिदं न स्यात्, अस्यान्तरस्वरूपे बहिर्गतेऽपि प्रार्थिता वा यूयमेतत्प्रेक्षितुं यदि समर्थाः । ततः शरीरस्य विघटनात्प्रागेव घटध्वं यूयमपि तपसे ।' इति ग. चि. म. ११ लम्बके.

श्लो. ९३ क्षयिणः, नश्वरस्य । अनश्वरशंकृतः, मोक्षसुखोपलब्धिसाधनभूतस्य । पिशितपिण्डस्य, मांसपिण्डस्य ।

श्लो. ९०-९३. 'किमेतं रसरुधिराद्यशुचिवस्तुपर्याप्तमखिलाशुचिकुलसदनमविचारितरम्यमनुक्षणविशारारुं शरीरसंज्ञं मांसलं मांसपिण्डमालोक्यैवं मोमुह्यसे । पश्य, पश्यतामेवास्माकं विनश्यतोऽस्य सिरागहनस्य रुधिरह्रदस्य पिशितराशेर्मेदःकुम्भस्य मलजम्बालपल्वलस्य रोगनीडस्य कलेबरस्य, हेतुना केनाचिदन्तःस्वरूपं चेदासीद्बहिः, आस्तामेतदनुभवास्था, स्प्रष्टुमथवा द्रष्टुमथवैतत्काकेभ्यो रक्षितुं वा कः शक्नुयात् । अतस्त्वं मक्षिकापक्षाच्छमलाच्छादनचर्मच्छायाप्रतारितविवेकिनि, अजस्रस्रंसमानोद्वेलमलसहस्रसंगतसुषिर संस्पर्शक्षणदूषितसमस्तप्रशस्तवस्तुनि जुगुप्सनीयपूतिगन्धिदुरासदाणुनिर्माणे कर्मशिल्पिकल्पनाकौशलार्पितपेशलभ्रमे चर्मयन्त्रमित्रे गात्रेऽस्मिन्मा स्म कार्षीरत्यादरम् ।' इति ग. चि. म. ७ लम्बके.

आत्तसारं वपुः कुर्यास्तथात्मंस्तत्क्षयेऽप्यभीः ।
आत्तसारेक्षुदाहेऽपि न हि शोचन्ति मानवाः ॥ ९४ ॥

अथास्रवानुप्रेक्षा ।

अजस्रमास्रवन्त्यात्मन्दुर्मोचाः कर्मपुद्गलाः ।
तैः पूर्णस्त्वमधोधः स्या जलपूर्णो यथा प्लवः ॥ ९५ ॥

तन्निदानं तवैवात्मन्योगभावौ सदातनौ ।
तौ विद्धि सपरिस्पन्दं परिणामं शुभाशुभम् ॥ ९६ ॥

आस्रवोऽयममुष्येति ज्ञात्वात्मन्कर्मकारणे ।
तत्तन्निमित्तवैधुर्यादपवाह्योर्ध्वगो भव ॥ ९७ ॥

अथ संवरानुप्रेक्षा ।

संरक्ष्य समितिं गुप्तिमनुप्रेक्षापरायणः ।
तपःसंयमधर्मात्मा त्वं स्या जितपरीषहः ॥ ९८ ॥

---

श्लो. ९४. आत्तसारम्, आत्तः गृहीतः सारः यस्मात्तत् ।

श्लो. ९६. योगः, मनोवाक्कायव्यापाररूपो योगः । भावः, रागद्वेषादिः । तन्निदानम्, तस्यास्रवस्य कारणम् । तौ, योगभावौ । सपरिस्पन्दम्, चञ्चलम् । शुभाऽशुभश्चेति कर्मधारयसमासः ।

श्लो. ९७. 'अमुष्यायमास्रव इति कर्मकारणे ज्ञात्वा, तत्तन्निमित्तवैधुर्यात् ते कर्मकारणेऽपवाह्य, ऊर्ध्वगो भव,' इत्यन्वयः । अमुष्य अयं आस्रव इति,— अमुष्यकर्मणः अयमास्रव इति । यथा, 'परात्मनिन्दाप्रशंसे सदसद्गुणाच्छादनोद्भावने च नीचैर्गोत्राख्यकर्मण आस्रवः' । तत्तन्निमित्तवैधुर्यात्, तत्तत्कारणराहित्यात् । ऊर्ध्वगः, मुक्तः ।

श्लो. ९८. आस्रवलक्षणं भवप्रवाहद्वारं संवृणोतीति संवरः । स च गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रतपस्यानिर्जरादिरूपो जीवे प्रविशत्कर्मजातं प्रतिषेधति । संसारकारणादात्मनो गोपनं गुप्तिः । सा चाशुभकर्मभ्यः कायवाङ्मनोनिग्रहरूपा । 'सम्यग्दण्डो वपुषः सम्यग्दण्डस्तथा च वचनस्य । मनसः सम्य-

एवं च त्वयि सत्यात्मन्कर्मास्रवनिरोधनात् ।
नीरन्ध्रपोतवद्भूया निरपायो भवाम्बुधौ ॥ ५९ ॥

विकथादिवियुक्तस्त्वमात्मभावनयान्वितः ।
त्यक्तबाह्यस्पृहो भूया गुप्त्याद्यास्ते करस्थिताः ॥ ६० ॥

एवमक्लेशगम्येऽस्मिन्नात्माधीनतया सदा ।
श्रेयोमार्गे मतिं कुर्याः किं बाह्ये तापकारिणि ॥ ६१ ॥

शुष्कनिर्बन्धतो बाह्ये मुह्यतस्तव ह्यन्यथा ।
प्रत्यक्षितैव नन्वात्मन्प्रत्यक्षनिरयोचिता ॥ ६२ ॥

---

ग्दण्डो गुप्तित्रितयं समनुगम्यम् ॥' इत्यमितचन्द्रसूरिविरचितपुरुषार्थसिद्ध्युपाये । समितिस्तु प्राणिपीडनपरिहारेण सम्यगयनं गमनं सम्यग्वर्तनम् । ईर्याभाषैषणादानानिक्षेपोत्सर्गाः पञ्च समितयः । 'सम्यग्गमनागमनं सम्यग्भाषा तथैषणा सम्यक् । सम्यग्ग्रहनिक्षेपौ व्युत्सर्गः सम्यगिति समितिः ॥' इति पुरुषार्थसिद्ध्युपाये । उत्तमक्षमामार्दवार्जवशौचसत्यसंयमतपस्त्यागार्किंचन्यब्रह्मचर्याणि धर्मः । अनित्याशरणसंसारैकत्वान्यत्वाशुचित्वास्रवसंवरानिर्जरालोकबोधिदुर्लभधर्मस्वाख्यातत्वानुचिन्तनमनुप्रेक्षाः । मार्गाच्च्यवनिग्रहार्थं परीषहाः । 'क्षुत्तृष्णा हिममुष्णं नग्नत्वं याचना रतिर्लाभः । दंशो मशकादीनामाक्रोशो व्याधिदुःखसंगमनम् । स्पर्शश्च तृणादीनामज्ञानमदर्शनं तथा प्रज्ञा । संस्कारपुरस्कारः शय्या चर्या निषद्या स्त्री । द्वाविंशतिरप्येते परिषोढव्याः परीषहाः सततम् । संक्लेशमुक्तमनसा संक्लेशनिमित्तभीतेन ।' इति पुरुषार्थसिद्ध्युपाये । संयमः, चारित्रम् । सामायिकच्छेदोपस्थापनपरिहारविशुद्धिसूक्ष्मसांपराययथाख्यातमिति पञ्चविधं चारित्रम् । तपो द्विविधं बाह्यमाभ्यन्तरं चेति । अनशनावमोदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशयनासनकायक्लेशा बाह्यं तपः । प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्याभ्यन्तरं तपः ।

श्लो. ६०. विकथाः,—(१) स्त्रीकथाः (२) भोजनकथाः (३) देशकथाः (४) राजकथाश्च ।

श्लो. ६१. श्रेयोमार्गे, मोक्षमार्गे । बाह्ये, बाह्यवस्तुनि ।

श्लो. ६२. शुष्कनिर्बन्धतः, निष्फलनिरोधात् ।

अथ निर्जरानुप्रेक्षा ।

रत्नत्रयप्रकर्षेण बद्धकर्मक्षयोऽपि ते ।
आध्मातः कथमप्यग्निर्दाह्यं किं वावशेषयेत् ॥ ६३ ॥

क्षयादनास्रवाच्चात्मन्कर्मणामसि केवली ।
निर्गमे चाप्रवेशे च धाराबन्धे कुतो जलम् ॥ ६४ ॥

रत्नत्रयस्य पूर्तिश्च त्वयात्मन्सुलभैव सा ।
मोहक्षोभविहीनस्य परिणामो हि निर्मलः ॥ ६५ ॥

परिणामविशुद्ध्यर्थं तपो बाह्यं विधीयते ।
न हि तण्डुलपाकः स्यात्पावकादिपरिक्षये ॥ ६६ ॥

परिणामविशुद्धिश्च बाह्ये स्यान्निःस्पृहस्य ते ।
निःस्पृहत्वं तु सौख्यं तद्बाह्ये मुह्यसि किं मुधा ॥ ६७ ॥

गुप्तेन्द्रियः क्षणं वात्मन्नात्मन्यात्मानमात्मना ।
भावयन्पश्य तत्सौख्यमास्तां निश्रेयसादिकम् ॥ ६८ ॥

अनन्तं सौख्यमात्मोत्थमस्तीत्यत्र हि सा प्रमा ।
शान्तस्वान्तस्य या प्रीतिः स्वसंवेदनगोचरा ॥ ६९ ॥

---

श्लो. ६३. रत्नत्रयप्रकर्षेण, सम्यग्दर्शनज्ञानचारित्राणामाधिक्येन । बद्धकर्मक्षयः, संचितकर्मनाशः । आध्मातः, सम्यक्संधुक्षितः ।

श्लो. ६४. केवली, मुक्तबन्धः भवेः इति शेषः । धाराबन्धे, सरसि ।

श्लो. ६५. मोहक्षोभविहीनस्य, मोहनीयकर्मव्यापारविहीनस्य ।

श्लो. ६६. 'न च बाह्यतपोहीनमाभ्यन्तरतपो भवेत् ।
तण्डुलस्येव विक्लित्तिर्न हि वह्न्यादिकं विना ॥' ६ ल. श्लो. २२.

श्लो. ६८. गुप्तेन्द्रियः, निगृहीतेन्द्रियः । निःश्रेयसादिकम्, मोक्षादिकम् ।

श्लो. ६९. प्रमा, ज्ञानम् । स्वसंवेदनगोचरा, आत्मज्ञानैकविषया ।

अथ लोकानुप्रेक्षा ।

प्रसारिताङ्घ्रिणा लोकः कटिनिक्षिप्तपाणिना ।
तुल्यः पुंसोर्ध्वमध्याधोविभागस्त्रिमरुद्वृतः ॥ ७० ॥

जन्ममृत्योः पदे ह्यात्मन्नसंख्यातप्रदेशके ।
लोके नायं प्रदेशोऽस्ति यस्मिन्नाभूरनन्तशः ॥ ७१ ॥

सत्यज्ञाने पुनश्चात्मन्पूर्ववत्संसरिष्यसि ।
कारणे जृम्भमाणेऽपि न हि कार्यपरिक्षयः ॥ ७२ ॥

यतस्व तत्तपस्यात्मन्मुक्त्वा मुग्धोचितं सुखम् ।
चिरस्थाय्यन्धकारोऽपि प्रकाशे हि विनश्यति ॥ ७३ ॥

अथ बोधिदुर्लभानुप्रेक्षा ।

भव्यत्वं कर्मभूजन्म मानुष्यं स्वङ्गवंश्यता ।
दुर्लभं ते क्रमादात्मन्समवायस्तु किं पुनः ॥ ७४ ॥

व्यर्थः स समवायोऽपि तवात्मन्धर्मधीर्न चेत् ।
कणिशोद्गमवैधुर्ये केदारादिगुणेन किम् ॥ ७५ ॥

---

श्लो. ७०. ऊर्ध्वमध्याधोविभागः, ऊर्ध्वलोकः, मध्यलोकः, अधोलोकः इति विभागो भेदो यस्य सः । त्रिमरुद्वृतः, त्रिभिर्वायुभिः परिवेष्टितः ।

श्लो. ७१. जन्ममृत्योः,— जन्म उत्पत्तिः, मृतिः मरणम्, तयोः । पदे स्थाने । अनन्तशः, बहुवारम् ।

श्लो. ७२. अज्ञाने सति, मिथ्याज्ञाने सति । जृम्भाणे, वर्धमाने सति ।

श्लो. ७३. तपसि, तपश्चरणे ।

श्लो. ७४. भव्यत्वम्, रत्नत्रयाविर्भवनयोग्यत्वम् । स्वङ्गवंश्यता, अवयवानां पाटवं कुलीनत्वं च ।

श्लो. ७५. कणिशोद्गमवैधुर्ये, शस्यमञ्जर्याः प्रादुर्भावस्य राहित्ये । केदारादिगुणेन, क्षेत्रादिवैशिष्ट्येन ।

तदात्मन्दुर्लभं गात्रं धर्मार्थं मूढ कल्प्यताम् ।
भस्मने दहतो रत्नं मूढः कः स्यात्परो जनः ॥ ७६ ॥

देवता भविता श्वापि देवः श्वा धर्मपापतः ।
तं धर्मं दुर्लभं कुर्या धर्मो हि भुवि कामसूः ॥ ७७ ॥

भव्यस्याबाह्यचित्तस्य सर्वसत्वानुकम्पिनः ।
करणत्रयशुद्धस्य तवात्मन्बोधिरेधताम् ॥ ७८ ॥

अथ धर्मानुप्रेक्षा ।

पश्यात्मन्धर्ममाहात्म्यं धर्मकृत्यो न शोचति ।
विश्वैर्विश्वस्यते चित्रं स हि लोकद्वये सुखी ॥ ७९ ॥

तवात्मन्नात्मनीनेऽस्मिञ्जैनधर्मेऽतिनिर्मले ।
स्थवीयसी रुचिः स्थेयादा मुक्तेर्मुक्तिदायिनी ॥ ८० ॥

इति द्वादशानुप्रेक्षाः ॥

---

श्लो. ७६. दहतः, पुरुषादिति शेषः ।
'भस्मने रत्नहारोऽयं पण्डितैर्न हि दह्यते ।' ११. ल. १८ .श्लो.

श्लो. ७७. धर्मपापतः, पुण्यपापाभ्याम् । श्वा देवता देवो भविता भवेदित्यर्थः । देवः श्वा च भविता भवेत् । कामसूः, कामान् सूते । 'षूङ् प्राणिगर्भविमोचने,' 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' इति क्विप् ।

श्लो. ७८. बोधिः, रत्नत्रयप्राप्तिः ।

श्लो. ८०. आत्मनीने, आत्मने हिते । 'आत्मन्विश्वजनभोगोत्तरपदात्खः' इति खप्रत्ययः । स्थवीयसी, अत्यन्तं स्थिरा । स्थेयात्, आशंसायां लिङि प्रथमपुरुषैकवचनम् ।

इत्यनुप्रेक्षया चासीदक्षोभ्यास्य विरक्तता ।
व्यवस्था हि सतां शैली साहाय्येऽप्यत्र किं पुनः ॥ ८१ ॥

विरक्तो राज्यमन्यच्च न तृणायाप्यमन्यत ।
हस्तस्थेप्यमृते को वा तिक्तसेवापरायणः ॥ ८२ ॥

ततस्तस्माद्विनिर्गत्य संपूज्य परमेश्वरम् ।
योगीन्द्रादशृणोद्धर्ममधीती जिनशासने ॥ ८३ ॥

धर्मश्रुतेर्बभूवायं धार्मविद्योऽतिनिर्मलः ।
अत्युत्कटो हि रत्नांशुस्तद्ज्ञवेकटकर्मणा ॥ ८४ ॥

---

श्लो. ८१. व्यवस्था हि सतां शैली,— स्थैर्यं हि सतां प्रकृतिः ।

**श्लो. ८२.** परायणः, तत्परः ।

श्लो. ८३. अधीतमनेनेति अधीती । 'इष्टादिभ्यश्च' इति इनिः । जिनशासने, अर्हता प्रतिपादिते शास्त्रे । 'शासनं राजदत्तोर्व्यां लेखाज्ञाशास्त्रशान्तिषु' इति मेदिनी । जिनशासनेऽधीती,—इत्यत्र, 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' इति सप्तमी । योगीन्द्रात्, चारणयोगीन्द्रात् ।

श्लो. ८१–८३. 'इति मनसि चिन्तयन्कुरुकुमुदिनीकान्तो द्वादशानुप्रेक्षया तत्क्षणमक्षोभ्यां विरक्तिं व्यवस्थापयन्राज्यादिकं तृणाय मन्यमानस्तस्माद्वनान्निर्गत्य निर्वर्त्य च भगवज्जिनेन्द्रपूजां धर्मामृतप्रदाननिरस्ततन्द्राद्योगीन्द्रान्मणिमयकिरीटकोटिविन्यस्तहस्ताम्भोरुहकुड्मलः कुंभिनीपतिर्धर्मं शुश्राव । इति जी. च. का.

**श्लो. ८४.** धर्मविद्यां वेत्तीति धार्मविद्यः । 'अङ्गक्षत्त्रधर्मत्रिपूर्वाद्विद्यान्तान्नेति वक्तव्यम् ।' इति ठक्प्रतिषेधः । तद्ज्ञवेकटकर्मणा, तद्ज्ञस्य रत्नसंस्कारकोविदस्य वेकटस्य मणिकारस्य कर्मणा शाणोल्लीढनादिविधानेन । 'वेकटो जाततारुण्ये मणिकारे च' इति हेमः ।

पुनश्चारणयोगीन्द्रः पूर्वजन्मबुभुत्सया ।
भूपेन परिपृष्टोऽयमाचष्टास्य पुराभवम् ॥ ८५ ॥
भूपेन्द्र **धातकीषण्डे** भूम्यादितिलके पुरे ।
सूनुः **पवनवेगस्य** राज्ञोऽभूस्त्वं **यशोधरः** ॥ ८६ ॥
राजहंस कदाचित्त्वं राजहंसस्य शावकम् ।
नीडात्क्रीडार्थमानीय निरवद्यमवीवृधः ॥ ८७ ॥

---

'श्रुत्वा धर्मं वल्लभोऽयं धरित्र्या धीरः श्रीमान्धार्मिकाग्र्यो बभूव ।
तत्संस्कारे कोविदैर्बुद्धिमद्भिः शाणोल्लीढः सन्मणिर्निर्मलो हि ॥'
इति जी. च. का.

'एवंविधैः पवित्रैर्वचोभिः कुरुकुलकुशेशयाकरभानोः सूनोः स्वान्ते नितान्तनिपुणवणिक्प्रवेकविहितवैकटकर्मणा मणाविव निसर्गनिर्मलतराभवति ।' इति ग. चि. म। वैकटकर्मणा, शाणोल्लीढनादिविधानेन ।

**श्लो**. ८५. बुभुत्सया, बोद्धुमिच्छया । पुराभवम्, पूर्वजन्मवृत्तान्तम् ।

'ततश्चारणयोः पूर्वं पूर्वजन्मबुभुत्सया ।
पप्रच्छ नरपालोऽयं प्रश्रयस्य वशंवदः ॥
नृपेण परिपृष्टोऽयमवधिस्पृष्टलोचनः ।
यथावत्कुरुवीरस्य समाचष्ट पुराभवम् ॥' जी. च. का.

**श्लो**. ८६. भूम्यादितिलके, **भूमितिलक**नाम्नि ।

'भूभृतां पुरोग पुरा खलु भवान्**धातकीषण्ड**ललामायमान**भूमितिलका**धिपतेः **पवनवेग**नाम्नो धात्रीपते**र्यशोधर** इति पुत्रो भूत्वा * * ।' इति ग. चि. म.

**श्लो**. ८७. राजहंस, राजश्रेष्ठ । 'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः ।' इत्यमरः । अत्रामरवाक्ये आद्यशब्दप्रयोगाद्धंसोऽपि श्रेष्ठार्थवाचकः । राजहंसस्य, हंसानां राजा राजहंसः तस्य । 'हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः । राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ॥' इत्यमरः । नीडात्, कुलायात् । निरवद्यं यथा तथा ।

तत्कुतोऽपि समाकर्ण्य धार्मविद्यः स ते पिता ।
तदा धर्ममुपादिक्षद्यतोऽभूरतिधार्मिकः ॥ ८८ ॥
निवारितोऽपि पित्रा त्वमतिनिर्वेदतस्ततः ।
जातरूपधरो जातः स्त्रीभिरष्टाभिरन्वितः ॥ ८९ ॥
घोरेण तपसा लब्ध्वा देवत्वं च त्रिविष्टपात् ।
अष्टाभिः स्त्रीभिरेताभिरत्राभूर्भव्यपुङ्गव ॥ ९० ॥
स्वपदाद्बालहंसस्य पितृभ्यां च पुराभवे ।
वियोजनाद्वियोगस्ते बन्धोऽभूदिव बन्धनात् ॥ ९१ ॥
इति योगीन्द्रवाक्येन भोगीव पविपाततः ।
भीतो राज्यादयं राजा प्रणम्य स्वपुरीमयात् ॥ ९२ ॥

---

श्लो. ८९. अतिनिर्वेगतः, अत्यन्तवैराग्यात् । जातरूपधरः, समासादितजिनदीक्षः । जातरूपम्, नैर्ग्रन्थ्यम् ।

श्लो. ९१. 'राजकुञ्जर, पुरा राजहंसशिशोः पञ्जरबन्धेन बन्धुविरहविधिना च लोकबन्धोर्भवतोऽपि बन्धुवियोगेन सह बन्धः किलासीदिति ।' इति ग. चि. म.

'மின்னார் சிலம்புங்குரலன்னமேனன்
மன்னு பிரித்தாய் பிரிந்தாய் சிறைவைத்ததனற்
பொன்னார் மார்ப சிறைபட்டனைபோலுமென்று
னின்னார்ப்பிறவிப்பிணிக்கின் மருந்தாய சொல்லான்'.

சீவகசிந்தாமணி.

श्लो. ९२. योगीन्द्रवाक्येन, योगीन्द्रस्य वाक्यं श्रुत्वेत्यर्थः । पविपाततः, अशनेः पतनात् । भोगीव, भुजङ्ग इव । अयम्, **जीवंधरः** । राज्याद्भीतः सन् । प्रणम्य, योगीन्द्रमानम्येत्यर्थः । स्वपुरीमयात्, स्वपुरमगमत् ॥ भयाद्वेपमानहृदयस्याशनिपातवित्रस्तभुजङ्गवदित्युपमानमन्यत्रापि दृश्यते । यथा,— 'इरंमदा-

सद्धर्मामृतपानेन सानुजास्तस्य वल्लभाः ।
विषप्रख्यममन्यन्त तत्सौख्यं विषयोद्भवम् ॥ ९३ ॥
तत्र गन्धर्वदत्तायाः पुत्रं सत्यंधराह्वयम् ।
अभिषिच्य ततस्ताभिः प्रापदास्थायिकां कृती ॥ ९४ ॥
श्रीसभायां समभ्येत्य श्रीवीरं जिननायकम् ।
पूजयामास पूज्योऽयमस्तावीच्च पुनः पुनः ॥ ९५ ॥
भगवन्भवरोगेण भीतोऽहं पीडितः सदा ।
त्वय्यकारणवैद्येऽपि सत्या किं तस्य कारणा ॥ ९६ ॥

---

विद्रुशयुरिव ' इति गद्यचिन्तामणावष्टमे लम्बे । 'दम्भोलिनिहता भुजगीव' 'भीतः कुरुपतिरशनेः पातनाद्वा भुजङ्गः' इति जी. च. का.

श्लो. ९३. सानुजाः, अनुजेन **नन्दाढ्येन** सहिताः । तस्य वल्लभाः, **जीवंधरस्य** पत्न्यः । विषप्रख्यम्, विषतुल्यम् ।

श्लो. ९२–९३.

'एवं योगीन्द्रवाणीमनुजनिजसतीस्निग्धबृन्दैः समेतः
श्रुत्वा राज्याद्विभीतः कुरुपतिरशनेः पातनाद्वा भुजङ्गः ।
आनर्च्यानम्य चैनं पुरवरमगमत्संसृतिव्यङ्ग्यसौख्यं
मन्वन्हालाहलाभं तपसि निजमतिं सुस्थिरां संदधानः ॥'
इति जी. च. का.

श्लो. ९४. आस्थायिकाम्, समवसरणम् ।

श्लो. ९५. श्रीसभायाम्, समवसरणे ।

श्लो. ९६. अहं भवरोगेण सदा पीडितः सन् भीतो भवामि, इत्यन्वयः । भीतः, अर्थाद्भवरोगादिति शेषः । तस्य, भवरोगस्य । कारणा, तीव्रवेदना 'कारणा तीव्रवेदना' इत्यमरः ।

त्वं सार्वः सर्वविद्देव सर्वकर्माणि कर्मठः ।
भव्यश्चाहं कुतो वा मे भवरोगो न शाम्यति ॥ ९७ ॥
निर्मोह मोहदावेन देहजीर्णोरुकानने ।
दह्यमानतया शश्वन्मुह्यन्तं रक्ष रक्ष माम् ॥ ९८ ।
संसारविषवृक्षस्य सर्वापत्फलदायिनः ।
अङ्कुरं रागमुन्मूलं वीतराग विधेहि मे ॥ ९९ ॥
कर्णधार भवार्णोधेर्मध्यतो मज्जता मया ।
कृच्छ्रेण बोधिनौर्लब्धा भूयान्निर्वाणपारगा ॥ १०० ॥
इति स्तोत्रावसाने च लब्ध्वायं त्रिजगद्गुरोः ।
अनुज्ञां जिनदीक्षायामानमद्गणनायकम् ॥ १०१ ॥
प्राज्ञः प्रव्रज्य तत्पार्श्वे तपस्तेपेऽतिदुश्चरम् ।
येन कर्माष्टकस्यापि नष्टता स्याद्यथाक्रमम् ॥ १०२ ॥

---

श्लो. ९७. सार्वः, सर्वस्यापि हितः । 'सर्वपुरुषाभ्यां णढञौ ।' इति णप्रत्ययः। कर्मठः, प्रारब्धकर्मपरिसमापनसमर्थः । 'कर्मशूरस्तु कर्मठः' इत्यमरः ।

श्लो. १००. भवार्णोधेः, संसारसागरस्य । बोधिनौः, बोधिः रत्नत्रयप्राप्तिः सैव नौः ।

श्लो. १०१. त्रिजगद्गुरोः, वर्धमानस्वामिन इत्यर्थः ।

श्लो. १०२. कर्माष्टकस्य,— (१) ज्ञानावरणीयम् (२) दर्शनावरणीयम् (३) मोहनीयम् (४) वेदनीयम् (५) आयुष्यम् (६) नाम (७) गोत्रम् (८) अन्तरायम् इति कर्माष्टकम् । तस्य ॥ कर्माष्टकं गुणाष्टकस्य प्रत्येकं बाधकम् । गुणाष्टकं च,— (१) अनन्तज्ञानम् (२) अनन्तदर्शनम् (३) अनन्तवीर्यम् (४) अनन्तसुखम् (५) अव्याबाधत्वम् (६) अगुरुलघुत्वम्, (७) अतिसूक्ष्मत्वम् (८) अवगहनत्वम् ॥

श्रीरत्नत्रयपूर्त्याथ **जीवंधर**महामुनिः ।
अष्टाभिः स्वगुणैः पुष्टोऽनन्तज्ञानसुखादिभिः ॥ १०३ ॥
सिद्धो लोकोत्तराभिख्यां केवलाख्यामकेवलाम् ।
अनुपमामनन्तां तामनुबोभूयते श्रियम् ॥ १०४ ॥
एवं निर्मलधर्मनिर्मितमिदं शर्म स्वकर्मक्षय-
प्राप्तं प्राप्तुमतुच्छमिच्छतितरां यो वा महेच्छो जनः ।
सोऽयं दुर्मतकुञ्जरप्रहरणे पञ्चाननं पावनं
जैनं धर्ममुपाश्रयेत मतिमान्निश्रेयसः प्राप्तये ॥ १०५ ॥

---

श्लो. १०३. रत्नत्रयपूर्त्या, पूर्णं रत्नत्रयमवाप्येत्यर्थः । अनन्तज्ञानसुखादिभिः, अनन्तज्ञानानन्तदर्शनानन्तवीर्यानन्तसुखाव्याबाधत्वागुरुलघुत्वातिसूक्ष्मत्वावगहनत्वरूपैः ।

श्लो. १०४. लोकोत्तराभिख्याम्, लोकातिशायिप्रभाम् । अनुपममनुपममनुत्कर्षमनपकर्षमनुक्षणसुलभं सुखमनुबोभूयते ।' इति ग. चि. म.

श्लो. १०२–१०४.

'**जीवंधरो**ऽयं तपसि प्रवीणो यथाक्रमं नष्टघनाष्टकर्मा ।
रत्नत्रयं पूर्णमवाप्य धीरो महामुनिर्मान्यगुणाभिरामः ॥
अष्टाभिः स्वगुणैरयं कुरुपतिः पुष्टोऽथ **जीवंधरः**
सिद्धः श्री**हरिचन्द्र**वाङ्मयमधुस्यन्दिप्रसूनोच्चयैः ।
भक्त्याराधितपादपद्मयुगलो लोकातिशायिप्रभां
निस्तुल्यां निरपायसौख्यलहरीं संप्राप मुक्तिश्रियम् ॥' जी. च. का.

श्लो. १०५. महेच्छः, महतीच्छा यस्य सः, महाभिलाषः । 'महेच्छस्तु महाशयः' इत्यमरः । अस्मिन् श्लोके वृत्तं शार्दूलविक्रीडितम् । 'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति तल्लक्षणात् ।

राजतां राजराजोऽयं राजराजो महोदयैः ।
तेजसा वयसा शूरः क्षत्रचूडामणिर्गुणैः ॥ १०६ ॥

इति श्रीमद्वादीभसिंहसूरिविरचिते
क्षत्रचूडामणौ मुक्तिश्रीलम्भो नाम
**एकादशो लम्बः ।**

---

श्लो. १०६. गुणैः क्षत्रचूडामणिः, तेजसा वयसा च शूरः, महोदयैः राजराजः, अयं राजराजो राजताम्, इत्यन्वयः । क्षत्रचूडामणिः,— क्षतः नाशात्त्रायत इति क्षत्त्रः, क्षत्त्रवर्णः । सुपीति योगविभागात्कः । ‘क्षणु हिंसायाम्’ इति धातोः संपदादित्वात्क्विप् । ‘गमादीनाम्’ इति वक्तव्यादनुनासिकलोपे तुगागमे च क्षदिति रूपं सिद्धम् । क्षत्त्रस्य क्षत्त्रवर्णस्य चूडामणिः शिरोरत्नम् । ‘गुणैः क्षत्रचूडामणिः’ इत्यनेनास्मिन्नाजनि क्षत्त्रशब्दः **अश्वकर्णा**दिवन्न केवलरूढः, किंतु पङ्कजादिवद्योगरूढ इत्यर्थः । ‘क्षतात्किल त्रायत इत्युदग्रः क्षत्त्रस्य शब्दो भुवनेषु रूढः ।’ रघुवंशे २स. ५३ श्लो । तेजसा, कोशदण्डादिजेन प्रभावेण । महोदयैः, महद्भिरैश्वर्यैः । राजराजः, कुबेरः अत्र कुबेरकल्प इत्यर्थः । ‘राजराजो धनाधिपः ।’ इत्यमरः । अयम्, **जीवंधरः** । राजराजः, राज्ञां राजा । देवानां देव इति वत् । ‘वृषेव देवो देवानां राज्ञां राजा बभूव सः ।’ इति रघुवंशे, १७ स. ७७ श्लो.

समाप्तोऽयं ग्रन्थः ।

# व्याख्यानपरिशिष्टम् ।

—:*:—

ल. १. श्लो. ८. अस्यानुरूपाभिप्रायः श्लोकः —

'कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥'
इति रघुवंशे स.१. श्लो.३२.

ल. १. श्लो २३. स्वप्नत्रयम्,—'कश्चन तरुरशोकोऽपि केनचित्कुठारपाणिना छेदनशोकं प्रापितः, (२) जातश्च हाटकमकुटघटितो बालाशोकविटपी, (३) तत्परिसरेऽष्टापि माला दृष्टाः ।' इति जी. च. का.

'आर्यपुत्र स्वप्ने विकसितकुसुमसौरभसंभ्रमदलिकुलमुखरितहरिदवकाशम्, अहिमकरमार्गलङ्घनजङ्घालविटपनिबिडितवियदाभोगम्, अभिनवघनपरिषदभिभावुकपलाशपटलकवचितवपुषम्, अरुणकिरणशोणकिसलयप्रसूनदर्शिताकालसन्ध्यम्, कमप्यशोकशाखिनमवालोकिषि। स च क्षणेन क्षोणीरुहः कुलधरणीधर इव कुलिशपतनेन शतधा शकलीकृततनुरपतदवनीपृष्ठे । समुदतिष्ठच्च तस्य तरोर्मूलादकठोरदलपुटलुठितेन लोहितिम्ना लिम्पन्लोचनपथं, अधरितदिवसकरबिम्बेन जाम्बूनदघटितेन किरीटेन शोभितशिखरभागः, तुङ्गविशालकवलितवियदन्तरालः कोऽपि कङ्केलिः । तत्र च प्रालम्बिष्ट प्रथमानपरिमलतरलमधुकरमालं मालाष्टकम् ।' इति ग. चि. म.

अक्रमात्, स्वप्नक्रमं विहाय । दृष्टनष्टस्याशोकपादपस्य फलमनुक्त्वा तदितरस्य स्वप्नद्वयस्य फलं वक्तुमारभतेत्यर्थः ।

ल. १. श्लो. २५. 'बालाशोकः समौलिकः । आचष्टे सोऽयम् सूनुम् ।' अत्र क्रमो विवक्षितः । मौलिः सूनुं, बालाशोकः तस्योदयं चावेदयतीत्यर्थः ।

'कथयति कनकमकुटः कल्याणि ते तनयम् । तस्योदयमावेदयति पतितपादपमूलरूढः कठोरेतरः कङ्केलिः, अमुष्य च वधूः सूचयन्ति ताः पुष्पस्रजः ।' इति ग. चि. म.

'पुत्रं नृपालतिलकं कुलरत्नदीपं
प्राप्नोषि देवि सुरराजदिशेव सूर्यम् ।

दृष्टो यतः समकुटो नवबालवृक्षः
कान्ता भवन्ति खलु तस्य तदष्टमालाः ॥'
इति जी. च. का.

'कदाचिद्विजयादेवी सुप्ता गर्भगृहे सुखम् ।
मकुटं भूभुजा हेमघण्डाष्टकविराजितम् ॥
दत्तं स्वस्यै श्रिताशोकतरोर्मूलं च केनचित् ।
छिन्नं परशुना जातं पुनर्बालमहीरुहम् ॥
निशायाः पश्चिमे यामे स्वप्नावेतौ प्रसन्नधीः ।
विलोक्य सा तयोर्ज्ञातुं फलमभ्येत्य भूपतिम् ॥
सप्रश्रयं समीक्ष्यैनमन्वयुङ्क्त मदत्यये ।
अष्टौ लम्भानवाप्यान्ते क्षितेर्भोक्तारमात्मजम् ।
आप्स्यस्याशु त्वमित्याह महीपालः प्रियाप्रियम् ॥'
इति **गुणभद्राचार्य**विरचित उत्तरपुराणे ।

**ल. १. श्लो. ५३.** दात्रम्, लवित्रम् ॥ परिपन्थविधायिनः,— अवस्कन्दनार्थं पन्थानं वर्जयित्वा व्याप्य वावस्थानं परिपन्थः । तस्य विधायिनः तच्छीलस्य । पन्थानमवरुध्य प्रसह्यावस्कन्दनशीलस्य पारिपन्थिकस्येत्यर्थः । अयमर्थः 'परिपन्थं च तिष्ठति' इति सूत्रेण गम्यते । 'पन्थानं वर्जयित्वा व्याप्य वा तिष्ठति पारिपन्थिकश्चोरः' इति सिद्धान्तकौमुद्याम् ॥

**ल. ४. श्लो. ७.** पञ्चमन्त्रम् — 'ओं णमो अलिहंताणम्, ओं णमो सिद्धाणम्, ओं णमो आइरिआणम्, ओं णमो उवज्झाआणम्, ओं णमो लोए सव्वसाहूणम् ।' इति पञ्चपरमेष्ठिनमस्काररूपं मन्त्रम् ॥ 'ओं नमोऽर्हद्भ्यः, ओं नमः सिद्धेभ्यः, ओं नम आचार्येभ्यः, ओं नम उपाध्यायेभ्यः, ओं नमो लोके सर्वसाधुभ्यः' इति तच्छाया ॥

**ल. ५. श्लो. १९.** 'द्वेष्योऽपि संमतः शिष्टः तस्यार्तस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥'
इति रघुवंशे स. १. श्लो. २८.

**ल. ६. श्लो. १.** असक्तो हि सुखं भुङ्क्ते,–'असक्तः सुखमन्वभूत्'
इति रघुवंशे स. १ श्लो. २१.

ल. ७. श्लो. १०. मह्य, पूज्य ।

ल. ९. श्लो. ४. विदूषकः,—'एकदेशविद्यस्तु क्रीडनको विश्वास्यश्च विदूषकः । वैहासिको वा । स च वेश्यां नागरिकं वा कचित्प्रमाद्यन्तं लब्धप्रणयत्वादपवदत इति विदूषकः । विविधेन हासेन चरतीति वैहासिकः ।' इति वात्स्यायनसूत्रव्याख्यायाम् ।

ल. ९. श्लो. १२. 'मक्षिकापक्षमलाच्छादनचर्मच्छायाप्रतारिताविवेकिनि * * कर्मशिल्पिना कौशलार्पितपेशलभ्रमे चर्मयन्त्रमित्रे गात्रेऽस्मिन्मा कार्षीरत्यादरम् ।' इति ग. चि. म. ७. लम्बके.

---

# शोधनपत्रम् ।

| पृष्ठम् । | पङ्क्तिः । | अशुद्धपाठः । | शुद्धपाठः । |
|---|---|---|---|
| ३ | ७ | ततत्स्याज्यौ | ततस्त्याज्यौ |
| ४ | १९ | ꯒன்ꯝꯗ | ꯒன்ꯝ |
| ,, | १७ | ꯒன்ꯝ | ꯒன்ꯝꯗ |
| ९ | १३ | परिपन्थिविधायिनः | परिपन्थविधायिनः |
| ४८ | ७ | कुमरो | कुमारो |
| ६२ | ७ | इत्यार्यविद्यासुधानधौ | इत्यार्यविद्यासुधाकरे |
| १२१ | ११ | अङ्कक्ष | अङ्कक्ष- |
| १२३ | १८ | पारितापाय | परितापाय |
| ,, | २२ | व्यरज्यत । | व्यरज्यत ।' |
| १२८ | २६ | सुषिर | सुषिरे |
| १२९ | ६ | योगभावो | योगभावौ |
| १३० | २६ | पोक्षमार्गे | मोक्षमार्गे |